दितिपद्यास्तमवेतं तज्जातिमत्येव समवेतीत्यसमवेतमेव जातिमदसमवेतं तथा च समवायेन तदभावः केवलान्वयीति भावः
अतएव प्रकृतातिव्याप्तेरेव न समवायेनेति पूर्वं साध्यतावच्छेदकसंबंधत्वप्रकारेणोक्तं इदानीं तु समवायत्वेनेति भेदः । संयो
गेन वेति यत्संयोगेन संयुक्तं तज्जातिमत्येवेति जातिमदसंयुक्तमसंयुक्तमेवेति तदभावः पूर्ववत्केवलान्वयीत्यर्थः । अथ साध्यवद
समवेतस्याभावः संयोगेन वक्तव्यस्तदा जातिमदसमवेतस्य घटादेः संयोगेन मेयत्वाधिकरणे सत्त्वान्नातिव्याप्तिरिति म
नसि कृत्याह इदं न जातिमदिति साध्यवदिति जात्यभाववत्ति जात्यादौ समवायाप्रसिद्धेरित्यर्थः । आदिना संयुक्तस्यैत्य परिग्रहः ।
साधनतावच्छेदकेनेति साध्यवदवृत्तित्वमित्यत्रान्वितं एवमपरमपि इदमित्यादिरूपमित्रं गुणत्वादित्यत्र हेतुतावच्छेदकसंबं

धेन रूपभिन्नवृत्तीनां रूपत्वशुक्लत्वादीनां गुणत्वाधिकरणेऽविसत्वात्तानिव्याप्तिः घटत्वादिति प्रतद्धित्ति तथा च यद्यत्समवेतं तत्तद्देत
द्रूपभिन्नेसमवेतमेवात एव घटादिकं विहाय रूपपर्यन्तानुधावनमिति घटादिमात्रवृत्तिस्तु तदीयरूपादावेव सुलभत्वात् । घट
भिन्नमिति । अत्र विषयतासंबंधेन यत्संबंधं तत्त्वस्थं घट[illegible]भिन्नेसंबंधमिति घटमात्रविषयकस्याप्रसिद्धेः तथा च घटभिन्नेवि
षयतासंबंधेन यन्नवर्त्तते तत्र वर्त्तत एव विषयतासंबंधेन ज्ञानत्वविषयत्वात्तस्याभावः सार्वत्रिक इत्यतिव्याप्तिरिति भावः ।
नावीत्यादि द्रव्यंसत्वादित्यत्र द्रव्यत्वाधिकरणे महाकालेसंबंधमात्रेण यन्नवर्त्तते तन्नवर्त्तत एव कुत्रापि तथा च तादृशाभावः
सत्वाधिकरणे सुलभ एवेति भावः । ननु केचिदित्युक्तेनेत्यन्वयि न तु येन येन संबंधेन साध्यवत्ति न वर्त्तते तेन तेन तस्याभाव इत्यत्र
न यत्तदर्थयोरनुगमाच्च साध्यवद्वृत्तिपदार्थाभावस्य सामान्याभावरूपत्वेन घटत्वे अतएव सकलेत्युक्तमत आह विशेष
णेनेति । तत्तद्व्यक्तित्व इति स्वरूपभेदविशेष इत्यर्थः । ननु तत्तद्व्यक्तित्वस्य संप्रदायमतेन तत्तद्व्यक्तिमात्रवृत्तिरूपाद्यात्मकत्व

याविशेषणताविशेषेणावृत्तित्वमसंभवीत्यत आह तत्तदिति। अथ तु अन्यान्यत्वेन तद्व्यक्तिमात्ररूपाद्यात्मकमननुगमात् नन्वेकमेव
यत्र व्याप्तिरूपाधिकरणं द्रव्यादिकं तत्रान्यान्यत्वं नास्तीति तथा च पूर्वदोषतादवस्थ्यमित्यत आह तत्तदिति। तद्व्यक्तिमात्रवृत्तिरसा
धारणः कश्चन धर्मः। अत्र च विषयत्वस्य यो विशेषणताविशेषः स एव प्रवेशनीयः। पूर्वमभावस्य विशेषणताविशेषः इदानीं
तु प्रमाविषयत्वस्य विशेषणताविशेष इत्यभिप्रेत्य पक्षान्तरमित्यपि कश्चित्। तेनैवेति विशेषणताविशेषेणैवेत्यर्थः। सा
मान्याभावप्रतियोगितावच्छेदकं पुनर्विशेषणताविशेषेण साध्यवदवृत्तित्वमिति मिश्राणां वृत्तीयमत आह केचित्त्वित्या
दि। असाध्यानीति बहुवचनं व्यापकत्वमाविष्कर्तुं अन्यथा धूमवान् वह्नेरित्यत्र कस्यचित्साध्यासमानाधिकरणस्य हेतुसमा
मानाधिकरणाऽनधिकरणतयाऽसिद्धिव्याप्तिः स्यादिति सावत्वस्य व्यापकत्वरूपतया व्याप्तेर्हेतुनिष्ठतया च तथैवाह साध्ये
त्यादि कलितार्थ इत्यनेन धूमवान् वह्नेरित्यत्र धूमव्याप्यवह्निनिष्ठसामानाधिकरण्यं तादृशाभावव्यापकाभावप्रतियोग्य

वेति सामान्यपर्यंतेनत्वात्र सामान्याभावो वक्तुं शक्यते उत्क्रमेणाभिधानादिति अत्र यथा धुतेर्द्ध्वंसत्वादित्यत्र द्रव्यत्वाधिकरणो
न्महाकाले वृत्तिमन्मात्रस्यैव वृत्तेः संबंधसामान्येन द्रव्यत्वसामानाधिकरण्यानधिकरणतासमवृत्तेरेव तत्र हेतुसामानाधिकरण्या
नधिकरणत्वमेवेत्यत आह अथवेत्यादि परं अग्रिमसित्यर्थः क्रमेणास्संबंधविवक्षायाः फलमाह तेनेत्यादि हेतावित्यंतेन साध्य
तावच्छेदकसंबंधेनेत्यस्य फलकथनं अयमर्थः साध्यतावच्छेदकसंबंधेन साध्यवत्वाकथने संबंधसामान्येनैव साध्यवान्क
क्षेत्यः तत्र च कालोपि निवेशनीये हेतुतावच्छेदककालिकसंबंधेन तद्वृत्तित्वाभावस्यावृत्तत्वेव तत्र वेतादृशहेतुसामानाधिकर
ण्याभावो स्यैवेति तत्रैव तस्मिन्समवायसंबंधेन पृथिवीत्वस्याधिकरणं हृदयान्यमन्यं च तत्र जन्यमात्रस्य कालो
पाधित्वेपि अव्ययमात्रीयपदार्थस्य यावत् पृथिवीत्वसमवायिषु कालिकसंबंधेन अवृत्तित्वेन कालिकसंबंधेन हेत्व
धिकरणो महाकाले तेनैव संबंधेन वृत्तित्वेन तत्र व्याप्तिः अत एव पृथिवीत्वपर्यंतानुधावनं व्यर्थमदत्ते हेतुतावच्छेद

अ॰ सि॰ ह्य
४०

कसंबंधेनेतास्य व्याप्तिमाह द्रव्यत्वादेश्चेति एतत्सदामे द्रव्यं सत्वादित्यादौ द्रव्यत्वसमवायिनि कालेपि संबंधसामान्येनावृत्तेमा
नस्य ताहृशसमानाधिकरण्याभाववत्वादिति व्याप्तिः तद्दानेन द्रव्यत्वसमवायिसमवेतत्वाभाववति गुणत्वादौ सत्वसमवायिगुण
समवेतत्वसत्वात् व्याप्तिः अव्याप्तिः स्यादतो हेतावन्यदादाय तत्तत्सामान्यं गुणत्वे तु स्यामोदायापि तदितिविरुद्धस्य गुणत्वस्यांतरालि
धानमिति हेतुसामानाधिकरण्याभावेत्यस्य संबंधव्याप्तिमाह नवेत्यादिसांद्रत्वादेरिति दृष्टांतावित्यनेनान्वितं समवायेने
त्यपि तथैव तथा चायं वह्निमानेतद्रूपावित्यत्र वह्निसंयोगिन्यसमवेते कालपरि[redacted] मायां स्पंदत्वेन तत्र द्वितीयदले प्रथमहेतु
तावच्छेदकसंबंधादानेऽपि तद्रूपस्याधिकरणां महाकालस्पंदश्चेति नतत्समवेतत्वं तदुभयोरवेत्यव्याप्तिप्रसक्तेः तद्दानेन स राम
मवायेन तदधिकरणोपर्वतादौ सुतरां तदभाववृत्तित्वग्रहसमवायेनैव सुतरामन्वितं वृत्ताधिकरणत्र समवायेन पूर्वत्र हेतौ बोध्यात ४०
थाच रमहेतुतावच्छेदकसंबंधादानेव वह्निसंयोगिसमवेतत्वाभाववतो घटादे समवायेन रूपविशेषाधिकरणोपर्वतादौ

संयोगेनहृद्रेरव्याप्तिप्रसक्तिः तत्पदद्दानेनस्वसमवायेनतत्रवृत्त्यभावोवर्त्ततएवेतिभावः नचस्पंदावच्छिन्नकालस्येवखंडकालत्वात्
स्पंदमात्रस्यकथंतदधिकरणत्वमितिवाच्यंस्पंदावच्छिन्नकालस्यकालावच्छिन्नस्पंदस्यवाधिकरणतायांविनिगमनाविरहे
णतदुभयकारणतायामेवविश्रामात्तव्यावर्त्तकत्वेनवान्यावश्यकत्वेनस्पंदादेरेवाधिकरणत्वस्यांगीकर्तुमुचितत्वात्खं
कालसिद्धिस्तुप्रमाणांतरेणैवेतिभावः। नन्वेतावतैवसामंजस्येसाधिकरणपदंव्यर्थमेवननुसामानाधिकरण्यज्ञानस्य
हेतुत्वेलाभार्थंतदितिमिश्रैरुक्तमेवसमयमितिवाच्यं एवमपिलसंगोवैयर्थ्यस्यदुरुद्धरत्वादित्यभिप्रेत्याहसंबंधविशेषे
णेतिनन्वित्यमितिद्रव्यत्ववद्भिन्नंगुणत्वादित्यादौविशेषणताविशेषेणसाध्यवतितद्रूपभिन्नेसमवायेनयन्नवर्त्ततेतत्
त्ववर्त्ततएवकुत्रापीत्यतिव्याप्तिरेवंघटभिन्नंसत्तानादित्यत्रापिअत्रेदंचिंत्यंसाध्यतावच्छेदकसंबंधेनसाध्यवत्तिवृत्ति
रीत्याविशेषणताविशेषेणयन्नवर्त्ततेतत्त्वहेतुतावच्छेदकसंबंधेनहेत्वधिकरणेविशेषणताविशेषेणनवर्त्तिष्य

अ०शि०रु नन्वस्तु तर्हि नायं दोष इति ननु स्वविवक्षायां मूले कस्य दोषासंगतिरित्यत आह यथाश्रुतमिति यथासंभवमिति यत्र विकल्पे
४१ य इष्टत्वेन तत्र तथेत्यर्थः। तेन तदधिकरणानधिकरणत्वस्य केवलान्वयिनि असिद्धावपि न क्षतिः तथा सतीति नानाधिकरणानां ता
दृशबुद्धिनियामकत्वकल्पनमपेक्ष्य लाघवादेकस्यैवाभावः कल्प्यतेऽधिकरणभेदेनाभावभेदे तु अधिकरणसमसंख्याभा
वकल्पनमतिरिक्तकल्पनं चेति महद्गौरवमेवेति भावः। ननु प्रतियोगिसामानाधिकरण्यादिविरुद्धधर्माध्यास एवाभा
वभेदक इत्यत आह संयोगाद्यभावस्येति प्रतियोगीति अत्र इदं पदं स्वरूपकथनपरं व्यावृत्त्यभावादेतत्प्रतियोग्यधिकर
णावृत्तित्वस्य प्रतियोगिसामानाधिकरण्याद्युपपादकत्वे न तत्रापि तद्वापत्त्येतेति तद्वारणाय इदमेवेति तथा च इदं व्यावच्छेदे राम
नैवेत्यर्थः। एवमग्रेऽपि स्वाधिकरणाभिन्नत्वेति अव्याप्यवृत्तित्वस्य निरुक्तिः स्वाधिकरणेति अत्र गुणादपदादाने स्वाधिकरणा ४१
भूतवृत्त्यत्यन्ताभावाप्रतियोगित्वस्य सामान्याभावरूपतया तादृश इदं व्यावृत्तिप्रकृताभावेऽसंभव इति तत्पदयुक्तं स्वेति

अन्योन्याभावगर्भलक्षणपक्षे अत्यंताभावगर्भलक्षणमभिप्रेत्याह साध्येतितत्र तत्प्रतियोगिना साध्येन समं सामानाधिकरण
मेव संबंध इति ध्येयं। न तु साध्यत्वं सिद्धिविषयत्वं साधनत्वं च सिद्धिकरणत्वं तत्कथं मूलोक्ता माश्रय इत्यत आह साध्यत्व
साधनत्वे वृत्तिवह्नित्वावच्छिन्नो वह्निरिति। न तु तत्तद्धेतुरेव वह्नित्वावच्छिन्ने तयात्तस्य चान्योन्याभावप्रतियोगितावच्छेदक
याहृदमसंगतमिति वाच्यं। परंपरया तादृशधर्मस्यानवच्छेदकत्वमिति सिद्धांतलक्षणमीत्याविवक्षणादिति अतएव
उपष्टंभकप्रतीतिमाह धूमवानिति विशेषेतीत्यनंतरं तथा चेति शरणीयं मूलमनुक्त्वाह वैयधिकरणमिति
वीत्यादि द्रव्यत्वानधिकरणाधिकरणत्वस्य पृथिवीत्वेऽसत्वादतिप्रसंगादिति भावः। धूमवान्वह्नेरित्यत्र कद
गोलकीयवह्न्यनधिकरणाधिकरणत्वं धूमे वर्त्तत इति अखंडहेतुत्वानुसरणं धर्मपदेन तु मूलोक्तं स्वरूपक
मेवेति। यद्वा वीत्यादि द्रव्यं पृथिवीत्वादित्यत्र लिखितेत्यादि रूपवान्पृथिवीत्वादित्यत्र बोध्यं रूपस्य प्रतिव्यक्ति

आ॰टी॰कृ॰

४२

त्वात्। तादृशेति साधनसमानाधिकरणेत्यर्थः न हीत्यादि पृथिवीत्वादिसमानाधिकरणधर्मस्य सर्वस्यैवाधिकरणेरूपं तत्र स्वरूपत्व
स्यापि वृत्तिरनस्तादृशधर्मानधिकरणमात्रवृत्तित्वावच्छेदकत्वं तस्य व्याहतमिति नन्ववच्छेदकत्वमनतिरिक्तवृत्तित्वं तेषां च द्रव्यत्वं
मेयत्वादित्यत्र द्रव्यत्वस्य मेयत्वसामानाधिकरण्याद्गुणत्वाद्यनधिकरणमात्रवृत्तित्वावच्छेदकत्वं न संभवति तादृशवृत्तित्वानधिकर
णेवृत्तित्वसामान्याभाववति गगनादौ सत्त्वात् तथा चानवच्छेदकत्वमित्यतिव्याप्तिरित्यत आह किंचेति तद्वृत्तित्वं प्राग् तादृशवृत्तिता
तिरिक्ते धर्मे वृत्तित्वमेव वक्तव्यं गगनस्य तु धर्मत्वमेव नास्ति धर्मरूपाणि यानि द्रव्याणि तानि गुणत्वानधिकरणमात्रवृत्तीन्येवेति
भावः एतदेव विवृणोति तेनेत्यादि अत्र च तादृशधर्मानधिकरणोऽवृत्तित्वानवच्छेदकेत्यादि विवक्षितो द्वितीयधर्मपदं व्यर्थ
मिति विभावनीयं ननु समवायेन ज्ञानवान् जातिमत्त्वादित्यादौ उभयत्वस्य सत्तावृत्तितया संयोगस्य तादृशधर्मानधिकर
णमात्रवृत्तित्वशून्यतया तादृशवृत्तित्वरूपमवच्छेदकत्वं व्याहतमेवेत्यतिव्याप्तिः अत आह वस्तुतस्त्विति स्वं च अवच्छेदकत्वे

राम

४२

नाभिमतं तथा चोभयत्वावच्छिन्नाधिकरणताया द्रव्यमात्रवृत्तित्वेन द्रव्यस्य च तादृशधर्मानधिकरणत्वेन नातिव्याप्तिरिति म
त्रपदं च द्रव्यं पृथिवीत्वादित्यत्र पृथिवीत्वसमानाधिकरणघटत्वादेरनधिकरणवृत्त्येव द्रव्यत्वत्वावच्छिन्नं द्रव्यत्वमि
त्यव्याप्तिवारणाय एतदेवं स्पष्टयति तेनेत्यादिना तादृशवृत्तिताशून्यधर्मावच्छिन्नकत्वमेव वक्तव्यं उभयत्वस्य सत्ता
वृत्तित्वेपि तदपर्याप्तत्वादित्यतः स्पष्टतरमाह गुणान्यत्वेति अत्र च विशिष्टवृत्तिधर्मस्य विशेषणपर्याप्तत्वस्वीका
रादिति ध्येयं। प्रमेयत्वादेरितीति परं तु घटत्वाद्येव तदनधिकरणाधिकरणत्वमुक्तमिति भावः। विशेषणादान
प्रयासादाह वस्तुतस्त्विति। न [illegible] णादेत्यादिवैयधिकरण्यावच्छेदकस्यैव यावत्त्वविवक्षणात् प्रमेयत्वमादायाप्रसि
द्धिः वैयधिकरण्यस्य संबंधभेदेन अनया सामान्याभावासंभवात्तदभावकूटमादि कर्तुमाह यद्यदिति नन्विदं सत्ताव
ज्जातिमत्त्वादित्यत्र सत्तात्वस्य गुणकर्मा[illegible]न्यसत्तात्वाभिमततया तस्य च तादृशावच्छेदकत्वेनातिव्याप्तिरित्यत आह

अशिक्र
४३

यावत्ताहृशेति। तथा च ताहृशावच्छेदकत्वं गुणकर्मान्यसत्तात्वे पर्याप्ततया शुद्धसत्तात्वे तस्याभावइति मूलसंगमाय विकल्पय
तितथा चेत्यादिनन्वस्तु मूलं विरुद्धं तदधिकरणानधिकरणत्वरूपवैयधिकरण्यविवक्षणादेव लक्षणासुस्थमित्यत आह
एतेनेति महानसादावित्यादिकं शेषेणेत्यर्थः। एतदेव योजयति समवायितयेत्यादि संबंधविशेषेणेति। येन संबंधेन धर्मस्य हे
त्वधिकरणवृत्तित्वं तेन तदधिकरणे साध्यतावच्छेदकसंबंधेनावृत्तित्वविवक्षाया मित्यर्थः। यद्वा हेतुतावच्छेदकसंबंधेन
हेत्वधिकरणे विशेषणताविशेषेण यद्वृत्तित्वे विशेषणताविशेषेण तदधिकरणे साध्यतावच्छेदकसंबंधेनावृत्तित्वमि
ति। समव्याप्तेत्यादि व्याप्तिसामान्यनिरूपणमभिप्रेत्य तथा अयोगोलकव्यः। अन्यथा वह्निधूमव्याप्तिनिरूपणे तदप्रवेशा राम
त्तदनापत्तेरिति। एवमुत्तरत्रापि। अतएव तत्रादिपदमपि व्याख्यातं लक्षणांतरं विवृणुमाह यत्रेति द्रव्यं सत्त्वादित्यत्र संयोगस्योपा ४३
धिलक्षणागमनं प्रकृते ऽविरुद्धं नहि मयेदं स्वतंत्रमुपाधिलक्षणं क्रियते किंतु अनौपाधिकव्याप्तिघटकतयेति येन तस्या

व्याप्तिराशंकेत्तं कदाचित्तत्त्वेनाप्रतियोगिव्यधिकरणपदप्रक्षेपमभिप्रेत्याह नानाव्यक्तिकइति। अखंडः सर्वे साध्यवद्वृत्तिरेकः त
थाच साध्यवन्निष्ठाभावप्रतियोगित्वं तस्य नास्तीति सर्वेषामेकजातीयसंबंधमभिप्रेत्याहां तत्त इति तद्वदिति साध्यवदित्यर्थः। ननु
साध्यवत्त्वप्रकारकप्रमाविषयत्वमेव तथाविधं वर्त्तत इति अलंतादृशाभावपर्य्यन्तानुधावनेनेति चेन्न संप्रदायमते विषयतायाः
स्वरूपसंबंधात्मिकायाः प्रतिव्यक्तिभिन्नाया ऐक्याभावात्। अभावीयविशेषणताविशेषोऽप्येकतया तदित्यपि कश्चित्। ननु
विशेषणांतरविशिष्टस्य विशेष्यापेक्षयाऽन्यत्वमते विशेष्यस्य न तदभावप्रतियोगित्वमित्यत आह छित्वावच्छिन्नस्येति यदि
कारकत्वकूटाभावस्यैव छित्वावच्छिन्नाभावत्वादिनत्वमभिप्रेत्य तदित्यादि अत्राप्यनवच्छेदके यादृशप्रकारतया तादृशप्र
कारतयैव तथावच्छेदकं ग्राह्यं तेन सद्धेतौ शुद्धस्यानवच्छेदकस्यापि किंचिद्विशिष्टतया अवच्छेदकत्वेऽपि न क्षतिः। अनवस्था
मिति प्रतियोगित्वस्य सहानवस्थाननियमलक्षणतया तत्र च नियमांतरप्रविष्टतया अनवस्थेत्यर्थः। क्रमेणापूरणीयस्य व्या

अशिकृ वृत्तिमाह तेनेत्यादि वक्तव्येति तत्संबंधावच्छिन्नाभाववति तेन संबंधेन वृत्तिः प्रतियोगिनो वक्तव्येत्यर्थः तथापि तादात्म्यसंबंधावच्छिन्ना
४४ न्योन्याभाववति तादात्म्येन वृत्तेरप्रसिद्धेर्वृत्तित्वमप्यप्रसिद्धमित्यत आह इत्थं चेति तथा च वृत्तित्वमित्यत्र संबंधत्वविवक्षणादव्या
प्त्युद्धारः एतदेव स्फुटयति अन्योन्याभावस्येति तद्वृत्तीति समवायसंबंधावच्छिन्नसत्ताभाववतीत्यर्थः। जात्यादिस्वरूपमेवे
ति तत्समवेतत्वस्याप्रसिद्धेः तादृशेति प्रतियोगितावच्छेदकसंबंधेन प्रतियोगिसंबंधं यदधिकरणं तद्वृत्तित्वमित्यर्थः त
द्घटेन तादृशाभावग्रहः व्यधिकरणेति संयोगसंबंधावच्छिन्नजात्यभावस्य संयोगसंबंधावच्छिन्नजात्यधिकरणावृत्तित्वे गा राम
त्वे संयोगसंबंधावच्छिन्नजात्यधिकरणमेवाप्रसिद्धमिति सिद्धान्ते ति सर्वेषु संयोगेषु जातिप्रतियोगिकत्वं तदभावाधिकरणा ४४
नुयोगिकत्वसामान्योभया इति निर्वक्ष्यमाणत्वादित्यर्थः अप्रसक्तिरन्योन्याभावप्रतियोगिनि तस्यान्योन्याभावाभावा
त्मकत्वाभावात्। अतिप्र दकेनस्य तदात्मकत्वादिति। प्रकृतेति व्यापकत्वोपयोगिप्रतियोगितामात्रस्येत्यर्थः

मात्रपदेनान्योन्याभावप्रतियोगिताप्रतिक्षिप्ता तथा चेदं पर्य्यवसन्नं तद्वन्निष्ठो योऽत्यन्ताभावस्तदभावाभावरूपत्वं यत्प्रतियोगित्वं च
दभावो यत्र तद्व्यापकमित्यर्थः वैयर्थ्यमिति धूमवति वर्त्तते योऽन्योन्याभावश्चार्द्रेन्धनस्य तदभावाभावरूपत्वमार्द्रेन्धनस्य नास्तीति
अन्योन्याभाववारकात्यन्ताभावपदं निरर्थकमिति न चात्यन्तपदस्येव वैयर्थ्यभावपर्य्येतं [illegible] किमर्थमिति वाच्यं तन्निष्ठप्रतियोगि
त्वमित्यस्य सार्थक्यस्यादिति न चैवं धूमव्यापकत्वमार्द्रेन्धनादावसंभवि धूमनिष्ठस्य प्रागभावादेरभावरूपत्वादार्द्रेन्धनस्येत्य
त आह सर्वत्रेति । अत्रायोगोलकान्यत्वादेरेवोपाधित्वमार्द्रेन्धनादेरनुपाधित्वं तु संयोगानुपाधित्ववद्व्याप्तिलक्षणेन दोषका
रमिति ननु तथा चार्द्रेन्धनादीनामुपाधित्वव्यवहारः सांप्रिकानां भज्येतेत्यत आह नित्यसाधारणेति तथा चार्द्रेन्धनादेरपि अ
योगोलकान्यत्वेनैवोपाधिता न चार्द्रेन्धनत्वमेव प्रागभावप्रतियोगितानवच्छेदकमिति तेनैव रूपेणोपाधित्वसंभवे किमर्थ
मेतावत्प्रबंधेनेति वाच्यं तादृशप्रागभावप्रतियोगितात्वेनानुगतीकृतप्रतियोगितानतिरिक्तवृत्तित्वेन तेषां विवादग्रस्त[illegible]

अप्रि० रू ॥ त्वान्नित्यसाधारण्यविवक्षणोक्तविवादादिति इतरथाभेदप्रतियोगिता साधारण्यानिरूपणोनन्वितमिदमसंगतं आर्द्रेंधनादीनां दर्शितनि-
४५ त्यसाधारण्यरूपादिमत्त्वेन भेदप्रतियोगित्वेपि अयोगोलकावृत्तित्वादिरूपेण उपाधित्वस्य दुर्वारत्वादिति तदवच्छिन्नभेदस्य धूम-
वत्त्वसंभवात् धूमवन्निष्ठाभावसामान्यप्रतियोगितानवच्छेदकत्वं वह्निमन्निष्ठाभावप्रतियोगितावच्छेदकत्वं च तत्रास्तु नमिति कृच्छ्र-
ष्टतव्याप्तिलक्षणोक्तदोषः येन तदर्थमत्यंताभावपदं सार्थकमिति चेन्न एतस्य रूपांतरेणाप्युपाधित्वव्यवस्थापने तात्पर्यकत्वात् पर्व-
तो वह्निमान् धूमवदवयववत् धूमवदन्यतरत्वादित्यत्र धूमवति वह्निमति धूमकदवयवावृत्तिभेदस्य सुलभत्वाच्चेति एवं घटाभा-
वोऽभाववत्वात् इत्यत्र घटाभावाद्यवृत्तिभेदे घटाभावत्वाधिकरणासत्वादव्याप्तिरिति तथा चात्यंताभावत्वनिरूपितप्रतियोगित्वला- राम
भाय तदिति संक्षेपः। समानप्रकारकमेव ज्ञानं प्रतिबंधकमित्यभिप्रेत्याह विरहेत्यादि प्राचीनमते प्रतियोगितावच्छेदकविशि- ४५
ष्टज्ञानस्य प्रतिबंधकत्वेपि समानप्रकारकत्वनादिनो मते तादात्म्येन प्रतियोगिज्ञानमेव प्रतिबंधकमिति भावः। प्रतियोगिज्ञान-

मितितादात्म्येनेत्यर्थः ननु प्रतिबंधकत्वं कारणीभूताभावप्रतियोगित्वं तच्चाँश्रयादिग्रस्तमित्यत आह प्रतिबंधकत्वं चेति घटतदभाव
ज्ञानयोरेकत्रावर्त्तमानत्वं असंभवग्रस्तमित्यत आह एककालावच्छेदेनेति एककालावच्छेदेनेत्याद्युक्ततथैवेत्यत आह एकत्रावर्त्ति
मानत्वमिति घटाभावज्ञानेन समं घटांकुरस्य ज्ञानमेककालावच्छेदेनैकत्रात्मनि न जातं तत्रांकुरे घटाभावप्रतियोगित्वापत्ति
रेवं घटत्वेपि तदापत्तिर्घटान्योन्याभावधीविरोधित्वादित्यत आह अभावपदस्येति तथा च स्वाभावज्ञानप्रतिबंधकज्ञानविष
यत्वमिति लक्षणार्थः वह्न्यभावाभाववत्त्वरसादाह वस्तुतस्त्विति ननु एवं त्रुटयति एकसंबंधेत्यादि वह्निमान् धूमादित्यादौ द्रव्यत्व
स्य समवायसंबंधेन प्रतियोगितानवच्छेदकीभूतस्यापि धूमवह्निसंयोगसंबंधावच्छिन्नतादृशप्रतियोगितावच्छेदकत्व
मित्याशंक्य चेयं यत्संबंधेत्यादि तथा च धूमाधिकरणीयसमवायसंबंधावच्छिन्नाभावप्रतियोगित्वं तत्र नास्तीति भावः। तथा चे
ति इत्थमन्योन्याभावमादाय नातिप्रसंगगंधोपि। स चेति अस्वरसइत्यर्थः व्यधिकरणेति तेन संबंधेन प्रतियोगिभ्रमाभावे

अ॰शि॰ह ४६ तत्र ज्ञानस्याभावज्ञानाप्रतिबंधकतया तादृशप्रतियोगित्वं तत्राव्याप्तमिति भावः। अभावज्ञानप्रतिबंधकज्ञानविषयत्वमित्यत्रगौर
वमाविष्कुर्वन्नाह स्वाभावेत्यादि संबंधित्वमप्येतल्लाघवादाह स्वाभावज्ञानेति। उभयत्रैव प्रतियोगिनिष्ठत्वमासादयितुं विशेष्यानु
धावनं लक्षणेतिति दूर्बलक्षणे एतद्भ्रमयाप्रवेशात्तेवैयर्थ्यमिति। इदं यत्स्वाभावकत्वं पुनरित्तोपिलघुतरमिति ध्येयं। नन्वेतदेवा
स्तु प्रतियोगित्वमित्यत एतदपि दूषयति स्वाभावइत्यादि तत्र अव्यर्थत्वं तथा त्वोवित्यात् प्रतियोगित्वोचित्यात्। न तु संबंधमर्या
दया प्रविष्टयोः प्रतियोगितयोः प्रवेशे तादृशलक्षणमविरुद्धमेवेत्यत आह अभावत्वेति सप्रतियोगिकपदार्थत्वमभावत्व
मिति प्रतियोगित्वरूपप्रकारकतयैव प्रवेशस्तस्माच्चयद्भूति भावः। ननु द्व्यादिवद्धकमिन्नत्वमभावत्वं विलक्षणप्रती राम ४६
त्यनुरोधेनाखंडोपाधिर्वा नतद्रूपतः प्रतिबंधकत्वानुसरणं नतु तादृशव्यवहारविषयत्वमेव तद्दुष्कत्वमित्यत आह तथा
विधेति। अभावत्वादिप्रकारकेत्यर्थः। यत्साध्यस्येत्यत्र मूले तु व्यधिकरणतायां व्याप्तेर्हेतुनिष्ठत्वमसंभवीत्यतो वैयधि

करणं प्रदर्शयति यत्समानाधिकरणेति तथा हीत्यादीति धूमवान्वह्नेरित्यत्र तादृशप्रतियोगितावच्छेदकत्वस्य गोत्वत्वस्य साध्यस
मानाधिकरणात्यन्ताभावप्रतियोगितावच्छेदकत्वमित्यतो यावदिति एवमुत्तरत्रापि वाच्यत्वत्वमादाय बोध्यं उक्तदोषइति मूलोक्त
दोषइत्यर्थः। एकसंबंधावच्छिन्नत्वस्याननुगमादाह विशेषणत्वेति प्रतियोगितावच्छेदकमात्रस्येति अत्र मात्रपदं तथा च हेतु
समानाधिकरणात्यन्ताभावप्रतियोगितावच्छेदकं सुतरामेव तथेति भावः प्रतियोगितावच्छेदकत्वेपीति अर्थं तं प्रथमलक्ष
णस्य यथोक्तविवक्षया व्यतिरेके नातिव्याप्तिप्रदर्शके द्वितीयस्य तु तद्व्यतिरेके नातिव्याप्तिं प्रदर्शयति। एकसंबंधेत्या
दि अन्यत्सुगमं। संबंधविशेषस्य प्रवेशे गौरवादाह वस्तुतइति यद्धर्मावच्छिन्नेति साध्यतावच्छेदकावच्छिन्नेत्यर्थः।
तेन सद्धेतौ हेतुसमानाधिकरणान्योन्याभावप्रतियोगितानवच्छेदकानां महानसत्वादीनां तत्र साध्यसमानाधिकर
णान्योन्याभावप्रतियोगितानवच्छेदकत्वेपि न क्षतिः। एवमुत्तरत्रापि बोध्यं तुल्याधिकरणात्यन्तमं निराकर्तुमाह यावत्ता

अशि.रु
४७

मिति दूषणमिति मूलस्य हेतुं दूरयति केवलेति।ननु साध्याव्यभिचारित्वस्य तत्त्वे केवलान्वयिन्यव्याप्तिरेव दोष इति यथो
क्तमेव सम्यगित्यत आह स्यादेतदिति मूलोक्तदोषान्वयोऽपयितुं मूलन्यूनतामुद्भावयितुं वा मूलोक्तं लक्षणं विकल्पयति किं कस्मिन्नित्या
दिना साध्याश्रयस्येत्यादिदूषयंश्च न्यूनतोद्धारणाय सकलधूमस्येत्यादिग्रंथदर्शनात् व्याप्तेः साध्यनिष्ठत्वमाविष्कर्तुं प्रथम
मेव विकल्पयति आद्य इति स्यात्तत्रोपाद्यस्तामाह व्याप्तेरिति पृथिवीत्यादिना पृथिवीत्वव्यापकानां गंधादीनां यावतामधि
करणमेकमसंभवीति जातिपर्यंतं अत्रापि जातित्वेन व्यापकानां तावज्जातीनामधिकरणं तथेति तत्त्वेन व्यापकत्वं बो
ध्यं न त्वत्तथापि तेन तेन व्यापकत्वं निरूच्य साधारणं व्यापकत्वमेव हेतुरस्तु एकसंबंधेन हेतुत्वलाभाय इत्यादोपादानात्
अत एवेति वक्तव्य इति काद्य व्याप्तेः पृथिवीत्यादावतिव्याप्तेः श्रुन्यपदे व्याप्तेरित्यादेश्च दोषस्यानिरूकल्पेऽसंभवात् इ
तरः प्रथमकल्पीयद्वितीयः।ननु विकल्पक्रमादेव साध्येनेत्यादिलाभेपि मूलोक्तं तत्सामर्थ्यं कथयति अर्थाभिधानेति।

राम
४७

एकव्यक्तिसाध्यकाव्याप्तेरेवेत्येवकारेण नानेत्यादिव्यवच्छेदः। विषयव्याप्त इति अयोगोलकीयवह्निसमानाधिकरणस्य धूमे
ऽभावादित्यर्थः समव्याप्तेऽपि एतद्दूषणासावि[illegible] कर्तुं न्यूनतापरिहारेण समव्याप्तेऽपि वेति एकाधिकरणीयनानासाध्यकसम
व्याप्तहेतौ यत्साध्यसामानाधिकरण्यस्य हेतौ सत्त्वादाह संरक्षापरिमाणादावित्यादि भावाच्चेति सकलसाध्यसंबंधस्ये
त्यनेनान्वितं तृतीयचतुर्थयोः स्वोक्तयोः दूषणास्वयमेव दूरयति तृतीय इति यथासंभवमिति एकमात्रवृत्तिसाध्यके सा
ध्यसमानाधिकरणावच्छिन्नप्रसिद्ध्या चतुर्थे दूषणासंभवः। च स्यादेतु उभयोरेवाप्रसिद्धेः। न च साध्याश्रयया वृत्ति
त्वं यद्धर्मावच्छिन्नस्य तिवो यां यावद्व्यक्तिषु गुणावच्छिन्नमिति वक्तव्यं यावदित्यशेषार्थकत्वमेव चतुर्थे प्रत्येकपददानादेव ना
व्याप्तिरित्यत आह सत्त्वादाविति कालिकेन संबंधवृत्यस्य लक्षणस्य यावत्साधनाश्रयाश्रितेत्यादिमूललिखनसार्थक
त्वायाह अर्थपरित्वावेति यथैवेति अर्थपरिष्कारपूर्वकमित्यर्थः न्यूनतापरीहाराय स्वयं विवक्षितत्वादिति दूषयति नाह

अभिम शेति यद्धर्मावच्छिन्नेति साध्यतावच्छेदकावच्छिन्नेत्यर्थः। तेन गुणकर्मान्यत्वसत्तावान्द्रव्यत्वादित्यादौ गुणत्वनिष्ठस्य साध्यसामा
४८ नाधिकरण्यस्य हेतुसामानाधिकरण्यव्यापकत्वेऽपि न क्षतिः। साध्याभाववद्वृत्तित्वविरहस्य पूर्वोक्ताव्यभिचारित्वेनाभिन्न
तयानन्तः प्रश्नो येनान्यद्व्यावृष्टे साध्यं विनेति विनेतिसप्तम्यंतमव्ययं सप्तम्याश्चावच्छेदकत्वं तच्चानतिरिक्तवृत्तित्वं।
तथा च साध्याभावो यदभाववानिति [illegible]क वृत्तिरिति लभ्यते अविनेत्यस्य तत्प्रागुक्तस्याभावः प्रत्याय्यते इदमेव प्रदर्शय
ति साध्याभावेत्ति केनचिदित्यस्य मूल[illegible]स्य व्याख्यानं किंचिद्रूपेति तथा च किंचिद्रूपावच्छिन्नेन साध्येन सह व्यभिचारिसंबं
धस्य व्याप्तित्वादित्यर्थः। ननु तदेव द्रढयति धूमादेरिति अन्वयव्यभिचारस्य कस्यचित्प्रतिबंधकत्वेनाप्युपपत्तेर्व्यतिरेक राम
व्यभिचारमाह हेत्वंतरवृत्तिवह्निमान् धूमादित्यादौ आलोकेव्यभिचारग्रहेऽपि अनुमितिरित्यर्थः। ननु तद्धेतुनिष्ठव्यभि ४८
चारग्रहाभावो वक्तव्य इत्यत आह तत्रैवेति ननुगतहेतुतावच्छेदकप्रकारेण व्यभिचारग्रहाभावो वक्तव्य इत्यत आह

हेतुतावच्छेदकेति अयं वह्न्यभाववद्वृत्तिमानित्यादावित्यर्थः तथा च कारणीभूताभावप्रतियोगिज्ञानप्रकारप्रकारकसामाना
धिकरण्यज्ञानस्याव्यभिचारः इति भावः विवदन्ते चेति व्यापकत्वादिभ्रान्तेत्यर्थः अव्यभिचारग्रहस्यैव हेतुत्वं मन्यमाना इति
शेषः ननु प्रकृतहेतुतावच्छेदकेन यत्र व्यभिचारग्रहः प्रतिबन्धको भवति तत्र तदभावः कारणं अन्यत्र सामानाधिकरण्यज्ञानमा
त्रमित्यतो दूषणान्तरमाह व्यभिचारेति उचितमिति व्यभिचारज्ञानाभावस्य कारणतायां स्वतन्त्रज्ञानप्रवेशापत्त्या गौरवेण सामा
नाधिकरण्यज्ञानमेव विषयतया ऽव्यभिचारोऽवच्छेदक इति भावः। नयेत्यादि अस्माकं तु व्यभिचारज्ञानाभावत्वेनैव कारणा
त्वमिति हृदयं व्यभिचारज्ञानस्येत्यादि अयमाशयः भवतामव्यभिचारत्ववद्विशेष्यकत्वे सति व्यभिचारप्रकारकत्वं व्य
भिचारज्ञानस्य भ्रमत्वं तत्र धर्मिणि तदभावाप्रकारकत्वं वा प्रामाण्यप्रकारकत्वं न भ्रमत्वस्य निश्चयः तदविषयीभूतव्य
भिचारज्ञानाभावत्वेन कारणत्वं अस्माकं तु नाहप्राभ्रमत्वज्ञानाविषयीभूततद्धर्मिकव्यभिचाराप्रकारकाव्यभिचारज्ञान

व्यभि क्र ४९

त्वेन हेतुत्वमिति भ्रमत्वनिश्चयविषयनिश्चययोर्महत्त्वात्तस्यामिति नन्वेतत् ज्ञानमात्रवृत्तिनानाधर्मप्रकारक एवाप्रामाण्यग्रहः संभवति
तथा च तावत् ज्ञानानास्कंदितत्वमेव वक्तव्यं इत्थं च तत्तद्व्यक्तिविश्रांतत्वे कलाघवं एवं यत्र विषयविशेषे व्यभिचारज्ञाने भ्रमत्वेमिताय
एव न ज्ञानमात्रनस्य हेतुतापत्तेरित्यतो दोषांतरमाह नानाविधेति ननु अव्यभिचारग्रहस्य प्रयोजनं पद्मे साध्यावच्छेदः तत्र सामा
नाधिकरण्यस्य विशेषणत्वेन भविष्यतीत्याशयेन तद्दूषयति सामानाधिकरण्येत्यादि यत्तु केवलान्वय्यनुमितौ अव्यभिचारस्य
लाभिन्नत्वे केवलान्वयित्वमिति वदंति तन्मतापेक्षया विस्वमते लाघवं प्रकटयति केवलान्वयित्यस्येति वक्ष्यमाणार्थे कवृत्तिमत्वे
घटितापेक्षया लाघवादाह अन्योन्याभावेति साधनवन्निष्ठवृत्तिविशेषणं तद्वृत्तित्वस्य साधनवद्वृत्तित्वस्य इदं तु न्योन्याभावावि
शेषणं तथा च वृत्तिमदत्यंताभाव इत्यत्र साधनवद्वृत्तिमदत्यंताभावाप्रतियोगित्वमेवोभयसाधारणमस्तु एवं साधनवद्वृत्तित्व
स्यान्योन्याभावविशेषणतायां साधनवद्वृत्त्यन्योन्याभावप्रतियोगितानवच्छेदकत्वमप्युभयसाधारणमिति शेषमिति इतोपि

राम ४९

लाघवेन साधनवदन्यावृत्तित्वादिज्ञानमेवानुमितिकारणमित्यादिकमिति ॥०॥ नद्धूमो वह्निन्नेति इदं पृथिवीवृत्तित्वविशिष्टद्रव्यत्ववन्
गंधवत्त्वादित्यत्र तादृशप्रतियोगितानवच्छेदकविशिष्टद्रव्यत्वत्वाश्रयसामानाधिकरण्यं जलावच्छेदेनापि द्रव्यत्वावच्छेदकपर्याप्तं तदुपहि-
तार्थकं वह्निमान्धूमादित्यत्र द्रव्यत्वेन रूपेण धूमादेर्व्याप्यत्ववारणायाह तद्रूपविशिष्टस्येति। तत्रैव तद्व्यक्तित्वेन व्यापकत्ववारणाय
ह तद्धर्मावच्छिन्नेति। व्याप्तेः सामान्यरूपतालाभाय यावदिति ननु दण्डिमान् दण्डसंयोगादित्यत्र तत्तद्दण्डस्य साध्यतावच्छेदकस्य तादृश-
प्रतियोगितानवच्छेदकत्वेऽपि घटे तत्तद्दण्डावच्छिन्नाभावस्य दण्डसामानाधिकरण्यावृत्तित्वादित्यत आह दण्डाद्यवृत्तीति परं परेति ननु दण्डत्व-
स्य तादृशप्रतियोगितानवच्छेदकत्वेऽनुमितौ व्यापकतावच्छेदकप्रकारकत्वनियमस्याध्यांशे दण्डत्वात्कामप्रवृत्तिः नीलः पटइति
वत् न च दण्डप्रकारकत्वनियामकसत्त्वात् दण्डीत्येवाकारानुमितिवाच्यं तथाप्यंशिकस्य तस्य तद्वैरत्वापत्तेरिति चेन्न परंपरासंबंधमि-
त्यत्र हि परंपरासंबंधोऽवस्तुविशेषणां न त्वनुमितौ तादृशपरंपरायाः तादृशपरंपरासंबंधत्वं तथैवानुभवात् अन्यथा दण्डान्तरवत्यपि स्त

अशिक्र ले दंडांतरावच्छिन्नाभावत्वान्न दंडी नास्तीति बुद्ध्यापत्तेः तथा च तावत्प्रकारतापरंपरैव दंडत्वस्य तत्रावच्छेदकत्वं वाच्यं तदिहापि
५० समानमिति न च दंडस्य च ५ दंडत्वेनानवच्छेदकत्वमिति वाच्यं विशेषणतोक्तमत्रमतातिप्रसंगादिति अत एवाहुः परंपरासंबंध
मिति न तु संबंधेनेति फलबलेन तथैव कल्पनादिति एवं दंडिसाध्यककव्यभिचारित्वादिदोषः। किं तु साध्यादिभेदेन व्याप्तिभेदात्त्रा
वच्छेदकतानवच्छेदकमेव वक्तव्यं तथा च तादृशरूपावच्छिन्नावच्छेदकमेवावच्छेदकतानुमितौ भासत इत्याहुः यद्रूपविशिष्टत्वस्य फल
माहुरुक्तं चेति साधनस्येत्यादि यद्यपि विशिष्टसत्वमपि सत्वमेव तत्र गुणः इत्यपि तथापि गुरोन विशिष्टसत्ता किं तु द्रव्यमिति प्रती
त्या तथैवाधिकरणत्वे कल्पनमिति भावः ऐक्यमिति एवं वहीत्यादिग्रंथस्य च कर्त्तव्यो नीयइति। रासभादीतिन च तेन रूपविशि राम
ष्टस्येत्यादि विवक्षणादेव रासभेतत्सत्वेऽपि न क्षतिरिति वाच्यं वह्निनिरूपितधूमव्याप्तेरनतिरिक्तत्वे एव निर्वक्तव्यादि तेत्रान ५०
थासामानाधिकरण्यमात्रमेव वह्निधूमव्याप्तिरित्यस्यापि सुवचत्वादित्यत इतीति सामानाधिकरण्यवतीत्यर्थः अस्मिन्

त्वे धूमत्वस्यावच्छेदकत्वमुपहितानुपहितभेदेन समर्थनीयमिति न च धूमत्वस्य व्याप्तिरूपत्वे व्याप्यधूमवानित्यस्य तादृशधूमत्ववद्धूम
वानित्याकारापत्तिः अन्यत्वादेरिष्टत्वादेव प्राप्तेर्नु सामानाधिकरण्यपर्याप्तस्यैव व्याप्तिपदार्थत्वात् न च हेतुतावच्छेदकविशिष्टहेतौ ता
दृशसामानाधिकरण्यमित्युक्तावेव विनिगमनाविरहः न यावद्धेतुनिष्ठसामानाधिकरण्यमित्येव वक्तव्यमिति वाच्यं इदं द्रव्यं पृथि
वीत्वविशिष्टसत्त्वादित्यत्र जलत्वावच्छिन्नद्रव्यत्वनिरूपितसत्तासामानाधिकरण्यस्यापि प्रकृतहेतुव्याप्तित्वापत्तेः अथैवमपि
साहित्यसमनियतसामानाधिकरण्यमेव किमिति वा नोक्तमिति इत्थं च प्रागुपदर्शितं तद्धूमावच्छिन्नेनेत्यत्रावच्छिन्नत्वं व्यर्थमेव उप
दर्शितव्यावृत्तेरनेनैव निराकरणादिति अभिन्नेवेति तथा च ग्रन्थः सम्मुखतयैव जगतीति भावः इह प्रागल्भ्यं दूषयति यत्त्विति।
तत्रेत्यसमानाधिकरणत्वं तत्रत्वेति तथा च संयोगत्वावच्छिन्नाभावो न योग्य इति भावः ननु यं महारजनसंयोगी एव त्वादित्य
त्र महारजनसंयोगाभावस्य योग्यत्वात् नास्मिन्महारजनसंयोगो नास्तीति बुद्धेर्दुर्निवारकत्वमित्यत आह परिन इति प्राचीन

आ॰शि॰रू॰
५१

मते यन्नदर्थो वय्यनुगतावित्यत आह एकेति। एतेनउपदर्शितोपाधिनाव्यर्थेति अभावत्वादित्यस्य न साध्यैकत्वादित्यर्थः द्रव्यमात्रस्य
पक्षत्वात् अन्यत्र साध्यवत्त्वादिति। ननु तथैवव्यक्तव्यमित्यत आह अप्रयोजकत्वादिति ननु निरुपाधिसहचार एवानुकूलतर्क इत्य
तःसंप्रदायमत आह निर्गुणत्वादेरिति। ननु प्रमेयत्वस्याभावावच्छेदकत्वे गुणावच्छेदकत्वमेव किं न स्यात् गुणागुणाभावयोः प्रमेय
त्वस्य तुल्यत्वादिति प्रतियोग्यनवच्छेदकं सत् यद्विरुद्धं तदभावावच्छेदकं इत्यत आह यथा चेति प्रतिदंडिभिन्नत्वेऽन्वितं अ
त्र केचित् आकाशादिसंयोग एव व्याप्यवृत्तिरिति न तत्सामान्याभावो वृक्षादौ न च संयोगमात्रस्याव्याप्यवृत्तित्वमिति सिद्धांतविरो
धः आकाशरूपाधिकरणतानादायैवाव्याप्यवृत्तित्वस्य सुवचनत्वादिति गुणस्येति सामान्याभाव इत्यत्रान्वितं वृत्तेरित्यादि वृ
त्ते हुताशनसंयोगस्य शिखरावच्छेदेनाभावे हुताशनः शिखरावच्छेदेन वर्तत इति विरुद्धमित्यर्थः। न च संयोगसमवायस्य वृ
त्तेः स्वीकारेपि संयोगाद्वृत्तित्ववदिदमप्युपपत्स्यत इति वाच्यं तत्रापि संयोगावच्छिन्नसमवायस्यैव तद्वृत्तित्वादिति वस्तुतः प्रतीति

राम
५१

रेव नियामिका इदं वत्तद्धपष्टंभकत्नयेति एवं समवायसंबंधेनापि द्रव्यस्याव्याप्यवृत्तित्वं बोध्यं अतएव दशासु न पट इति प्रतीतिः सर्वेजन
सिद्धेति। एवं पताद्दृशप्रतीतेः सर्वजनसिद्धत्वेन तत्र असमानाधिकरणां तं। सर्वथैवेति कालतो देशतश्चाव्याप्यर्थः। केचित्तु सर्वथैवेति।
स्वरसात् कदाचित् अव्याप्यवृत्तिसाध्यकेपि न देयं तथा संयोगाभाववान् गुणत्वादित्यादावित्याहुः। ननु अनुगमार्थमेव देयमित्य
त आह साध्यभेदेनेति विशिष्टसत्तावानित्यत्र विशिष्टसत्तायाः सावेभोऽसमतेऽविशिष्टत्वमपि प्रत्याह भूतत्वेति केचित्तु नोपदेयमि
त्यादिनाव्याप्यवृत्तिसाध्यके तद्दानस्य प्रतिषेधात् कथमेतदिति अस्वरसात् भूतत्वेत्यादि ग्रंथमुत्थापयंति। नत्वात्रापि भूतत्वमू
र्तत्वे व्याप्यवृत्ती इति तथैव विरोधः भूतत्वस्य बहिरिंद्रियग्राह्यविशेषगुणवत्त्वस्य एवं अवच्छिन्नपरिमाणवत्त्वस्य मूर्तत्वस्य
पि तन्मतेऽवयविनि कालभेदमादायाव्याप्यवृत्तित्वादित्याहुः तन्न ज्ञानिमान्नभावत्वादित्यादेः ग्रंथस्य प्रतियोग्यसामानाधि
करणपविचारे स्वयं वक्ष्यमाणस्य संदर्भविरोधादिति न च तन्मते नोपादेयमित्यादिविरोधः कथमुक्तमिति वाच्यं तस्यस्वा

अधिक्र तं चैतयोर्वोक्तत्वादिति प्रकोक्तिमादायैव सामान्यतयाऽप्यावतारादिति तस्मादुक्तमेव सम्यक् अनन्तरवानुपदंस्तावेभोममतमेव निरा
५२ कृतमितिसहजं तद्वृत्तिकेवलस्यैव प्रतियोगिनोऽसमानाधिकरणत्वादित्यर्थः अनेनोद्देशिमूर्त्तत्वस्य तत्प्रतियोगित्वादितितदवच्छि
भावादिति अनतिरिक्तवृत्त्यनुपपत्तेरुभयत्वस्यापि प्रत्यक्षसिद्धत्वादित्यनेनान्वितं व्याप्तिरवेति तथा च तद्रूपमेव तदिति भावः।
तथा तेऽपि उभयत्वाश्रयाधिकरणत्वेऽपि प्रतियोग्यसामानाधिकरणस्येति तत्त्वाभावेत्यन्वितं क्रमेणाव्याप्तिमाहन्यथेति दुर्ल
भत्वापत्तेरिति सर्वत्रस्वात्मकभेदस्य प्रतियोग्यभावांतरसमानाधिकरणत्वादित्यर्थः तद्धानेनाभावांतरस्य भेदत्वनिरूपि
तप्रतियोगित्वमेवेति नन्वेतिः अभावसाध्यकेति पटत्वाभाववान् घटत्वादित्यादौ घटत्वसमानाधिकरणस्य तादृशगो
त्वाभावस्य पटत्वाभावभिन्नत्वात् पटत्वाभावत्वं तत्प्रतियोगितावच्छेदकमेवेत्यव्याप्तेः संप्रदायइत्यनास्थायां तथाविव राम
क्षितेऽपि हेतुसमानाधिकरणाभावेसाध्यंनास्तीतिप्रतीतेः स्पेनसाध्याभावात्मकतया न हेतुध्वंसवान् तत्कपालत्वादित्या ५२

दावव्याप्तिर्दुरुद्धरैवेति पर्यवसितार्थोऽपि बोध्यः । ननु तस्यात्यंताभावस्यात्यंताभावत्वनिरूपकप्रतियोगित्वघटध्वंससमानाधिकरणत्वा
त् कथमव्याप्तिः किं चैवं प्रतियोग्यसमानाधिकरणत्वाभावोऽप्रसिद्धः सर्वेषामेवाभावानां ध्वंसरूपप्रतियोग्यसमानाधिकर
णत्वादिति चेन्न अव्याप्तिपदस्यासंभवार्थत्वात् तावद्व्याप्यमात्रविवक्षायामनुमेतत्प्रसक्तिगंधोऽपि गोध्वंसवत्त्वे नेति प्राचीनमते ग
वात्यंताभावस्य नित्यप्रतियोगिकत्वादिति भावः । सिद्धांते तु यावद्गोत्वाधिकरणे महाप्रलये ध्वंसप्रागभावसामान्याभाववा
दिनां मते गोसामान्यध्वंससत्त्वान्न गोत्वस्यात्यंताभावप्रतियोगितावच्छेदकत्वं संभवतीति नातिप्रसंगः । अत एवोत्तरत्रि
न्महाप्रलयव्याप्तत्वहेतुमाह यदेति अत्र हेतौ व्यभिचाराधिकरणं खंडयति एवं महाप्रलयस्य तु जन्याभावानधिकर
णत्वात् अत्र च द्व्यणुकसामान्यध्वंसो बाधित एव उत्पत्स्यमानद्व्यणुकानां प्रागभावसत्त्वादिति न तु द्व्यणुकस्य स्वम
तेऽसिद्धत्वात् स्पंदस्य च प्रलयकालीनत्वे युक्त्याद्यभावाद्बहुत्वं तरं साध्यांतरं चाह यदादृष्टेति ज्ञानमात्रसाध्यके ईश्व

अशिक्ष ५३ रज्ञानस्यापि प्रलये विद्यमानत्वात् नैयायिकमतेन व्यभिचारित्वमतस्तदुपपादयितुमाह जन्यमिति। सर्वमतसाधारण्यायेमा
हदुःख – तिनतु खण्डप्रलयेपि ब्रह्माण्डान्तर्वर्त्तिदुःखसत्वात् न व्यभिचारित्वं सर्वेषां मते महाप्रलयाव्यवहितप्राक्काले ऽदृष्टवति
सामान्यध्वंसमादाय व्याप्तिर्व्याप्तिकारणासंभवाद् इत्यत आह यदा यस्येति अत्र यद्यपि महाप्रलयाव्यवहितप्राक्काले यस्यादृ
ष्टं वर्त्तते तदीयज्ञानसामान्यध्वंसोपि संभवितुमर्हति तथापि तदन्यपुरुषो बोद्धव्यः तस्य चरमज्ञाननाशस्तु निमित्तं विना
शादेवेति तदयं खण्डप्रलयवादीत्यादि पदेन तत्पूर्वकालवर्त्तिग्रहः मतेपीत्यपिनाक्षरसः सूचितः अन्यथा महाप्रलये सामा
न्यध्वंसवत्वे मानाभावः नचेदानीं घट इति श्याममानास्तीति प्रतीत्या सामान्यध्वंसः कल्प्यस्तत्र नास्तीत्यनुरोधेनात्यन्ताभा राम ५३
वस्यैव इति त्वोपगमात् ध्वंसत्वेन सामान्यावच्छिन्नप्रतियोगिताकत्वविषयत्वस्य कुत्राप्यसिद्धत्वादिति भावः वस्तुत
स्तु तत्तद्व्यक्तित्वेन तत्तत्प्रतियोगिकध्वंसत्वेन कार्यकारणभावस्वीकारात् सामान्यधर्मावच्छिन्नतयोरभावः कारणाभावा

दिति। विरोधाभावादिति न च विरोधाभावेऽपि साधकाभावः सृष्टिकालेऽनित्याद्यवच्छेदेन प्रत्यक्षसिद्धस्य तदभावस्य प्रलयेऽपला-
पासंभवादिति अन्यथा अत्यंताभावस्य प्रतियोग्यादिविनयविरोधित्वे कालमात्रेत्यत्र मात्रशब्दः कृत्स्नार्थकः एकस्य सृष्टि-
कालस्य देशभेदः प्रतियोग्यनधिकरणरूपः तथा च अत्यंताभाववत्त्वं अपरस्य प्रलयस्य तु शब्देन सृष्ट्यवच्छेदः स्वरूपा-
वच्छिन्नमित्यत्र तथात्वमित्यनुषज्यते ध्वंसादिनासमं अत्यंताभावस्याविरोधएवेति हृदयं। न च ध्वंसेनेति नन्वत्यंताभावस्य
ध्वंसएव प्रतियोगी तथा च तदानीमपि प्रतियोगिसमानाधिकरणएवेति वा अप्रतियोगिकालेऽपि इदानीं ध्वंसो नास्तीति
(कु) ध्यां तदत्यंताभावस्य पृथकत्वेन व्यवस्थापयतादिति भावः। नियमघटितमिति तथा चात्मा प्रयदृत्यर्थः। तद्वदन्यो-
न्ति अत एव विधेयसाध्ये इष्टकत्वमित्यत्र तद्वदन्यावृत्तित्वमेवोक्तमिति तत्र जन्यत्वे अभ्युपेत्याह एवमिति नियमांत-
वस्य हेतुसमानाधिकरणोत्यादिरूपस्य अत्र जन्यत्वेन कोतिरित्यत्र हेतुमाह वक्ष्यते चेति तथा च संसर्गाभावे नियमा

अवेशादेव नात्माश्रयः तादात्म्यावच्छिन्नाभावस्यैव संसर्गाभावत्वात् प्रज्ञानविरह इति तथा च वैयर्थ्यात् तन्निवेशपभित्ति आ
व्याप्तिरिति तादात्म्यावच्छिन्नसाध्यकत्वत्यर्थः। तत्र संसर्गाभावस्य तादात्म्यावच्छिन्नप्रतियोगिताकत्वविरहात् ननु विषयतया
ज्ञानस्य वृत्तित्वे मानाभावः अत आह ज्ञानवानित्यादि व्यवहारस्तु विषयत्वप्रकारक एवानुव्यवसायो ननु ज्ञाननिष्ठं
विषयित्वमेव स्वीक्रियतामिति लीलावत्यां स्वयमेव व्यञ्जितमित्यत आह विशेषगुणवानिति व्यभिचारित्वमुपपादयितुं
विशेषेति द्रव्यत्वादित्येनावृत्तेव व्यभिचारित्वे विमनोरूपव्यभिचारनिरूपकाधिकरणे विशेषगुणस्य केनापि संबन्धे
नासत्वेन तदाद्यैव व्यभिचारोद्धारः शक्यत इति विशिनष्टि मनोन्येति तथा च दिक्कालादावेव व्यभिचाराधिकरणे तत्र च
दिशि दैशिकेन कालेन च कालिकेन साध्यस्य व्यभिचारः। ननु स्वमते दिक्कालयोरपीश्वराभिन्नत्वेनेदं सदनुमानमेवेत्यत आ- 
ह जातिमानिति एकार्थेति जातिः सतीत्यादिव्यवहारात् सत्तादेस्तेन तत्रोपगम इत्यर्थः ननु तादात्म्येन साध्यतायां संसर्गा

भावमादाय लक्षणासमन्वये तस्य साध्यतावच्छेदकसंबंधावच्छिन्नप्रतियोगिताऽप्रसिद्धिरित्यन्योन्याभावमादायैव तत्समन्वयः
तत्र च प्रतियोगितावच्छेदकसंबंधेन तदधिकरणाप्रसिद्धिमत आह संबंधित्वेति एतदेव योजयति भवति चैवमिति नन्विदं क
पिसंयोगि एतत्त्वादित्यत्र कपिसंयोगाभावोपि गुणादौ कपिसंयोगवद्वृत्तित्वाभाववानेव तथा च सोपि प्रतियोग्यसामानाधि
करण एवेत्यव्याप्तिरत आह तद्विशिष्टस्येति वृत्तित्वाभावविशिष्टस्येत्यर्थः तथा च एतत्त्वाधिकरणवृत्तेर्गुणादेर्विशिष्ट
मिति एतदेवाह तेनेति अव्याप्त्युद्धारनीतिः संयोगिसत्त्वादित्यत्र संयोगाभावस्य संयोगवद्वृत्तित्वेन तद्भिन्नत्वाभावात् न वृत्तित्वा
भावस्यावच्छेदकभेदेन वृत्तिभावः प्रतीतेरिति द्रव्यत्वे गुणे न पृथिवीत्वसामानाधिकरण्यमित्याद्युक्तयुक्तेरित्यर्थः
वस्तुतस्तु मूलकारः तत्रेति प्रतियोगिवैयधिकरण्यावच्छेदकावच्छिन्नमित्यर्थः हेत्वधिकरणावृत्तितेन कपिसंयोगि एतत्त्वा
दित्यत्र संयोगाभावस्यैव गुणे प्रतियोगिवैयधिकरण्यावच्छेदकावच्छिन्नत्वेपि नाव्याप्तिः ननु हेत्वधिकरणे प्रतियोग्यनधि

अग्नि रु
५५

करणवृत्तित्वावच्छिन्नो योऽभाव इत्यपेक्षया प्रतियोग्यनधिकरणीभूतहेत्वधिकरणावृत्तिरिति लब्धमिति तदेव निष्कृष्य दर्शयति निष्कर्षे इ
त्यन्तेन प्रतियोगितावच्छेदकेति यत्किंचिदित्यन्तेन तुल्याधिकरणं प्रतियोगितानवच्छेदकयावत्वमसंभवादेव दूरपराहतमिति अत्र त्वेन
धिकरणमित्यत्र सामान्याभावः तादृशयत्किंचिदवच्छेदकावच्छिन्नयत्किंचिदनधिकरणत्वं तु पूर्वविकल्पेनोक्तप्रायमिति रकेति।
एकस्य यावत्संयोगानधिकरणत्वादित्यर्थः ननु स्यमते संयोगसामान्याभाववत्त्वान्नसत्वादिति सद्धेतुरेव जन्येत्र उत्पत्तिकालावच्छेदे
न नित्ये च महाप्रलयावच्छेदेन तदभावोपगमादित्यत आह साध्यान्तरमाह द्रव्यत्वाभाववानिति प्रथमे योजयति साध्याभाववत्त इति तत्प्रतियो
गिसंयोगरूपसाध्याभावप्रतियोगि अयमर्थः संयोगानां यथा संयोगत्वावच्छिन्नाभावाभावा त्मकत्वं तथा संयोगविशेषाभावाभावा राम
त्मकत्वमपि इति संयोगविशेषाभावसामानाधिकरण्येनैव प्रतियोग्यसामानाधिकरण्याभाव इति भावः द्वितीये योजयति नित्यवृत्ति ५५
त्वादीति ननु नित्यवृत्तित्वविशिष्टद्रव्यत्वाभावस्याभावो नित्यवृत्तित्वविशिष्टद्रव्यत्वं तच्च द्रव्यत्वातिरिक्तमेवेत्यत आह स्वाभावेति

त्वानुसरणात् हि साध्यतावच्छेदकेनेति दुत्यं वहृत्यनियामकसंबंधस्याभावप्रतियोगितानवच्छेदकत्वेपि तेन संबंधेन प्रतियोग्यसंबंधि निघ
ष्टाद्यभावप्रवत्तथाविधः प्रसिद्धवृत्तिनः साध्यतावच्छेदकसंबंधत्वं संयोगत्वेनैवेति न्यूनतादृशसंयोगत्वेन तथात्वे दृशसंयोगस्य प्रति
योगितानवच्छेदकत्वेपि संयोगसंबंधावच्छिन्नतथाविधाभावमादायैव लक्षणसमन्वये किमर्थमेतावता प्रयासेनेति वाच्यं वृत्तिनि
यामकसंयोगमात्रस्याभावप्रतियोगितावच्छेदकत्वादिमते वृत्तिनियामकसंयोगेन गगनाभावः सार्वत्रिकः प्रतियोगिव्यधिकरण
श्चेत्यव्याप्तितादवस्थ्यात् अत एव तथाविधसंयोगस्यैव साध्यतावच्छेदकत्वमभिप्रेत्यैवाव्याप्तिवारणाय वृत्तिनत्वसंयुक्तद्रव्यस्यापि व्या
वस्थापनात् कथं गमनस्य पृथिवीत्वव्यापकत्वमिति चिंत्यं पृथिवीत्वस्य तदितरपृथिवीपरत्वात् कथमन्यथा सुरभ्यसुरभिकपा
लारब्धघटस्य निर्गंधतया पृथिवीत्वस्य गंधव्याप्यत्वलिखनमपि संगच्छेत व्यवस्थापनं संपादितमन्यत्रेति। पृथिव्यादेरित्युपल
मनसाधारणमेतत्। न चैवमिति वृत्तिनियामकसंबंधेनेत्यर्थः। असंबंधित्वादिति तथाविधतादृशसामानाधिकरण्ये तस्य नास्तीति

भावः ननु साधनत्वेन व्यापकत्वज्ञानमेव कारणमिति पेवणीयंतित्ते तन्मते तदनुमितिः स्यादित्यत आह व्यापकत्वादिति। ननु वृत्त्यनियामकसं
बंधेन कुत्रापि व्यापकत्वादिकमित्यत आह व्यक्तीभविष्यतीति इदं ग्रन्थकृत्प्रतिपाद्यं उपविष्टादिति व्यतिरेकव्याप्त्यादावित्यर्थः। तत्र नाशस्येनापि
व्याप्त्यादेरेव स्थाप्यत्वादित्येके केचित्तु ननु वृत्तिनियामकसंबंधेन गगनस्य कथमव्यापकत्वं गगनाभावस्य प्रतियोग्यधिकरणाप्रसिद्धा
प्रतियोगिवैयधिकरण्याभावादित्यत आह व्यक्तीभविष्यतीति उपविष्टादिति अग्रेऽत्रैव तदभावस्यापि खंडशः प्रतियोगिवैयधिकर
ण्यव्यवस्थापनादित्यर्थमाहुः। नन्वित्यादि अपृष्टद्रव्यातिरिक्तेति महाकालाभावार्थं विशेषणम्। तादविशेषः कालिकसंबंधः। अव्याप्य
वृत्तीति तत्रैव प्रतियोगिवैयधिकरण्यपदोपादानादिति भावः। अव्याप्यवृत्तिप्रमेयत्वादिकमेव ननु ज्ञात्यादि तस्यापि अवच्छेदभेदेनाभा ॥ राम
वसत्त्वात् तस्येत्यादि स्वं प्रतियोगितासंसर्गं बंधावच्छिन्नत्वस्येति असंभवादित्यमेनान्वितं इदं च प्रथमविवक्षानुसारेण द्वितीये त्वाह तेने ॥ ५८
ति केचित्तु महाकालो घटवान् कालपरिमाणात् इत्यादौ महाकालान्यत्वविशिष्टघटाभावस्य नित्यान्यत्वविशिष्टसंयोगाभावस्य प्रतियोगिव्य

धिकरणस्य महाकाले असंभवात् । कालिकसंबंधेन प्रतियोगिरूपं घटसंयोगसंबंधि घटादिभिन्नत्वे हेतुना महाकालस्य विद्यमानत्वादित्येव
सर्वसामंजस्ये द्वित्वावच्छिन्नाभावानुसरणं व्यर्थमित्याहुः । प्रतियोगिव्यधिकरणहेतुसमानाधिकरणाभावस्य सार्वभौमीयं अर्थमा
र्गं क्व दूषयति नचेत्यादि तादृशसंबंधः साध्यतावच्छेदकसंबंधः । इदं वादृतीत्यनेनान्वितं साध्यतावच्छेदकसंबंधविवक्षायाः प्रयोज
नमाह सत्ताद्यधिकरणेति इदं गुणवत्संयोगवद्गुणान्यत्वे सत्तिसत्त्वादित्यादौ विपर्ययः अतएव व्यभिचारस्य लमाह कर्मणा
वृत्तिहेतौ गुणान्यत्वपदानुपादाने नित्यगुणस्य व्यभिचाराधिकरणतया तत्र संबंधसामान्येन वा वृत्तिप्रतियोगित्वं गुणाद्यभाव
स्य संभवतीति नातिव्याप्तिः स्यात् तद्वत्त्वं च कर्ममात्रस्यैव व्यभिचाराधिकरणतया तत्र च विषयतासंबंधेन ज्ञानस्य वृत्तेः एवं विषय
तायावृत्त्यनियामकत्वेऽपि कर्मणः कालोपाधित्वेन कालिकसंबंधेनाधिवृत्तेरतिव्याप्तिः स्यादिति तद्वारणाय साध्यतावच्छे
दकसंबंधानुधावनमिति भावः । यत्किंचिदित्यस्य प्रयोजनं तु आयोरेव व्यावृत्तिः न तदाने गुणस्य समवायसंबंधेनापि न हेत्वधिकरणता

मान्यवृत्तित्वाभावस्तस्य द्रव्यवृत्तित्वात् प्रतियोगिवैयधिकरण्य तावच्छेदकविशिष्टेत्यस्य प्रयोजनमाह भूतत्वेति द्वित्वावच्छिन्नाभावस्य मनो
वृत्तिप्रतियोगिकत्वेपि द्वित्वावच्छिन्नाभावस्य मनोवृत्तिप्रतियोगिकत्वेपि द्वित्वावच्छिन्नस्य मनस्यऽभावात् प्रतियोगिवैयधिकर
ण्यं न तत्र मूल मतिरिति भावः ननु प्रतियोगिताविशिष्टस्यैवावृत्तित्वमुच्यतां द्वित्वावच्छिन्नाभावस्य तेनु प्रतियोगितायाः व्यासज्य वृ
त्तित्वोपगमादेव नातिव्याप्तिरित्यत आह गुणेतिमनोगुणादीति यथासंख्यं बोध्यं। सामान्यपदस्य फलमाह संयोगेति अन्य
था द्रव्यं कपिसंयोगिएतत्वादित्यत्र कस्यचित्संयोगस्य तद्वृत्तित्वेन तदभावस्यापि निरुक्तप्रतियोगिवैयधिकरण्यावृत्तेरि
ति विशिष्टस्येति न च घटेदं गुणकर्मान्यत्वविशिष्टसत्त्वात् जातिमत्वादित्यत्र तदभावस्य निरुक्तप्रतियोगिवैयधिकरण्याभा
वादतिव्याप्तिः स्यादिति भावः विशिष्टस्येतिदिक्तो च वादिमतेपि दूषणांतरमाह समवायेनेति केचित्तु प्रतियोगितावच्छेदक
स्य तेन संबंधेन हेत्वधिकरणीभूत यत्किंचिद्व्यक्तिवृत्तितानवच्छेदकत्वविवक्षणात् उक्तातिव्याप्तिमुद्धृत्य उत्तरग्रंथमवता

रयाँ त्वक्तुः अत्र व्याप्तिमेव समर्थयति जातिमदिति अयमर्थः। मेयत्वस्याधिकरणां द्विविधं जातिमज्जातिशून्यं च तत्र जातिमन्मेये तद्वृत्तित्वप्रतियोगि
काभावास्तेषां प्रतियोगिता जातित्वेनावच्छिन्ना जातिशून्ये व तत्तत्संबंधेनावृत्तत्वप्रसिद्धिः स्फुटैवेति न तु जातेर्व्याप्यवृत्तित्वादत्र प्रतियो
गिवैयधिकरण्यपदमेव न देयमित्यत आह संयोगादीति इदमेव समर्थयति अव्याप्यवृत्तित्व इदमपि पूर्वदेव बोध्यं। साध्यतावच्छेदकेत्या
दि वह्निमान् धूमादित्यादौ आयोगात्मकीयवह्निसंयोगस्य साध्यतावच्छेदकीभूतस्य निरुक्तो न याभावसत्वादनुत्पत्तिकालावच्छि
न्नपर्वतादिवृत्तिवह्न्यभावस्याप्रतियोगिवैयधिकरण्यापादकत्वात्तैः स्यादत आह सामान्यइति निरुक्तेति प्रतियोगितावच्छेदका
वच्छिन्नेत्यर्थः अनुयोगिकत्वसामान्येत्यत्र सामान्यपददा— हृदादिनिष्ठपर्वतानुयोगिकत्वव्यक्तिविशेषाभावमादाय वह्नित्वा
वच्छिन्नाभावसत्त्वात्तत्रैवाव्याप्तिवारणाय। यत्किंचित्पदस्य प्रयोजनं दर्शयन् विवक्षितस्य फलं दर्शयति धूमसंयोग इति।
अयमर्थः। धूमवान् वह्नेरित्यत्र वह्न्यधिकरणसामान्यानुयोगिकत्वाभावासत्वेऽपि तद्विशेषायोगोलकानुयोगिकत्वविरहा

…रिक
९०

ष्टित्वावच्छिन्नाभावसत्त्वे प्रतियोगिवैयधिकरण्यप्रत्यय इति। अनुयोगिकत्वस्येति षष्ठ्यन्तं विरहादित्यनेनान्वितं निरूप्य द
स्य फलमाह वैजात्यत्वेति। अयं वैजात्यत्वविशिष्टैतद्दण्डवान् एतद्दण्डादि तत्र वैजात्यस्यैव व्यभिचाराधिकरणतया दण्डसंयो
गेषु यावत्सु तदुभयसत्त्वेपि वैजात्यीयदण्डसंयोगस्य वैजात्यत्वविशिष्टदण्डीयत्वाभावादेवोभयाभावः। अखण्डसमवाय
संबंधमादाय। निरूपकस्य प्रयोजनमाह गुणकर्मोभयत्वेपीति यन्मते कालादेः सर्वाधिकरणतया तेषु गग
नीयत्वस्यापि सत्त्वेन तदप्रसिद्धेः तन्मते आह स्वरूपसंबन्धेनेति। स्वरूपसंबन्धः कालिकसंबन्धः निरूपकप्रतियोगिता
वच्छेदकावच्छिन्नप्रतियोगितावच्छेदकसंबन्धावच्छिन्नं च सामान्य इति तेन धूमवान्वह्नेरित्यादौ तादृशघटाभावप्रति
योगितायां ष्टित्वावच्छिन्नाभावसत्त्वेपि तथाविधधूमाभावप्रतियोगितायामेवोभयसत्त्वान्नातिव्याप्तिः। अनुमेयवान्
वाच्यत्वादित्यत्र मेयत्वावच्छिन्नाभावस्याप्रसिद्ध्याऽव्याप्तिरत आह समवायसंबन्धेनेति। एवं संयोगसंबन्धेनापि बोध्यं

राम
९०

एतद्विवक्षाया अन्यदपि प्रयोजनमाह अत एवेत्यादि वह्निधूमोभयवान् वह्नेरित्यादौ तादृशप्रतियोगिकत्वविरहेऽपि
द्रव्यं जातेरित्यादौ नातिव्याप्तिरिति योजना वकारस्तु आमादिकपदवत् पूर्वमतेव वह्निधूमोभयवान् वह्नेरित्यादौ वह्नित्वाव-
च्छिन्नीयत्वाभावादेव व्यासज्यवृत्तिप्रतियोगिताकाभावसत्त्वात् नातिव्याप्तिसंभावना द्रव्यं जातेरित्यादौ तु समवायस्यैक्यात् तत्त्
त्रोभयवत्त्वेन व्यासज्यवृत्त्यभावाभावादेव तदभावस्य प्रतियोगिवैयधिकरण्याभावात् अतिव्याप्तिः अस्यां विवक्षायां तु न
कुत्रापि दोषः द्वित्वत्वनिष्ठप्रतियोगितायां तदुभयसत्त्वादिति यद्यपि द्रव्यत्वावच्छिन्ने समवाय एव साध्यतावच्छेदकवृत्ति
विभाव्यते तदापि प्रकृते साध्यतावच्छेदकवृत्ति विभाव्यते तदापि प्रकृते साध्यतावच्छेदकसंबंधनिष्ठं यादृशमनुयोगित्वं
तादृशमेव वक्तव्यं अन्यथा धूमवान् वह्नेरित्यत्र धूमसंयोगेऽपि धूमानधिकरणीभूतायोगोलकस्य कालोपाधितया त-
दनुयोगिकत्वविशेषस्य विद्यमानत्वादतिव्याप्तिस्तथा च जातिमान् मेयत्वादित्यत्र समवाये मेयत्वाधिकरणजात्या

अशिक
६९

दिनिरूपितं यत्समवायीयमनुयोगिकत्वं तदप्रसिद्धमित्युभयाभावाभाववद्वृत्ति बोध्यं ननु वह्निधूमोभयवान् धूमादित्यत्र पूर्वेद्विवृत्ता
यामव्याप्तिः संयोगेषु यावत्सु उभयीत्वहेत्वधिकरणानुयोगिकत्वयोरभावेन पर्वतादिनिष्ठस्य तदभावस्याप्रतियोगित्वाधि
करणत्वादिति चेन्न उभयीयसंयोगत्वप्रकारेण उभयीत्वस्य हेत्वधिकरणानुयोगिकत्वस्य च सत्त्वात् उभयीयसंयोगः एको
ऽनेको वा इत्यन्यदेतत् अन्यथा एकस्यापि संयोगस्य द्वितयीयानात्मकत्वे अत्रोभयमिति प्रतीतेरेव दुर्लभत्वापत्तेर्द्वित्वमा
त्रावच्छेदकलक्षणासंभवादेव नाव्याप्तिरित्यपि कश्चित् वह्निधूमोभयवान् वह्नेरित्यादावुक्तग्रंथसंदर्भविरोधात् ननु प्रति
योगित्वादिप्रवेशे आत्माश्रय इत्यत आह प्रतियोगित्वादीति आदिपदादधिकरणत्वादिपरिग्रहः ननु प्रतियोगित्व
स्य प्रतियोगित्वत्वेन लक्षणाप्रवेशात् विनासंबंधत्वं तत्प्रवेशो विरुद्ध इत्यत आह दर्शितं चेति विशेष्यविशेषणान्यविशिष्ट
धीविषयत्वरूपमित्यर्थः ननु वह्न्यभाववान् मेयत्वादित्यत्र सप्तमपदार्थरूपाभावाप्रतियोगित्वादतिव्याप्तिरित्यत आह

राम
६९

भावश्चेवेति युक्तं चैतत् घटाभावो नास्तीति प्रतीतेः प्रमात्वानुरोधेनाभावान्तरकल्पने प्रयासाभावादिति इममेव समर्थयति अत इति ननु
यादृशप्रतियोगितानवच्छेदकावच्छिन्नानधिकरणत्वं हेतुमत्तस्तादृशप्रतियोगितायामुक्तोभयाभावविवक्षणादेव सामंजस्ये
भावपदं व्यर्थमिति अत आह तदपि वेति एकदेशिन इति यथावस्तुतस्तं नात्माश्रयादिरिति भावः ननु भूत्वमेव प्रमेयधूमत्वं
विशिष्टस्यानतिरिक्तत्वात् तद्धावच्छेदकमेवेत्यत आह कंबुग्रीवादिमत्त्वमिति ननु कंबुग्रीवादिमत्त्वमपि न लघ्ववच्छेदकांत
रनियतं तस्य सौवर्णघट इव तथा घटत्वजात्यतिरिक्तवृत्तित्वादित्यत आह घ्राणग्राह्येति गंधत्वसमनैयत्यार्थं गुणत्वेति
यत्किंचिदेकेति वह्निमान् धूमादित्यत्र धूमसमानाधिकरणतत्तद्व्यभावप्रतियोगितानतिरिक्तवृत्तित्वेरव वह्नित्वमिति न
ह्वारणा यत्किंचिदेकेति न चानुपदमेवोक्तं तदपि वेत्यनेन विरोधः प्रतियोगितानुगमार्थमेव तद्धानस्यादित्वादिति न
नु प्रतियोगितान्यूनवृत्तित्वं तद्धर्मं तथा च वह्निघटवृत्तिहित्वावच्छिन्नप्रतियोगितायां न्यूनवृत्त्येव वह्नित्वमिति तासीति

अगिरु ६२ एतेन तातितातिवृत्तिवह्नित्वावच्छिन्नाभावेन अतएवेति। सामान्याभावस्य नानाप्रतियोगिताकल्पनमपेक्ष्य लाघवादेकैव प्रतियोगिता कल्प्य
तेन यत्रैकप्रतियोगितानतिरिक्तवृत्तित्वमेव वक्तव्यमित्यभावो न हि वैशसीयवृत्तिमेव योग्यमिति तेष्वपि दर्शितता तातितातिवृत्तिवह्नित्वावच्छिन्नाभावेन नि
रस्ताः। ननु प्रमेयधूमत्वादीनामनवच्छेदकत्वेपि तद्वह्निमत्त्वाप्रसिद्धेरेव न व्याप्तिलक्षणगतिव्याप्तिरित्यत आह लघुरूपेति। स्वं पारिभाषि
कमवच्छेदकं ननु किमर्थं स्वसमाने त्यादि विवक्षितं। न च वह्नित्वावच्छिन्नाभावस्य स्वरूपसंबंधरूपवह्नित्वावच्छेदकानतिरिक्तवृत्तित्वेन वह्नि
त्वस्यावच्छेदकत्वापत्तिरिति वाच्यं। अवच्छेदकतापर्याप्त्यनुकसंबंधावच्छिन्नाभाववद्वृत्तित्वस्य विवक्षितत्वात्। अन्यथा संयोगसंबंधेन धूम
त्वाभाववद्वृत्तित्वेन धूमत्वस्यानवच्छेदकत्वापत्तिः। तथा च पर्याप्त्याख्यसंबंधेन वह्नित्वस्यावच्छेदकत्वे तत्संबंधावच्छिन्नाभाववद्वृत्तित्वेना राम
वच्छेदकत्वाभावादिति मैवं अव्याप्त्यनवच्छेदकत्वनिर्वाहार्थं प्रतियोगिव्यधिकरणपदस्यावश्यकत्वे वह्नित्वस्यावच्छेदकत्वप्रसक्तौ ६२
तद्विवक्षितत्वादिति ननु तादृशतादृशवृत्तित्वं वह्नित्वसमनियतमेवेत्यत आह तत्त्वं चेति तथा च वह्नित्वपर्याप्त्यधिकरणपर्याप्त्यत्वं

नह्नित्वस्येति न वह्नित्वमवच्छेदकमिति न तथात्वे न वह्नित्वाधिकरणोक्तव्याप्तौ त्रयमेकवृत्तित्वं दृष्टांतार्थे ननु वह्निधूमोभयवान् धूमादि
त्यत्रासम्भवादाय तादृशवह्नित्वमेव स्वरूपमवच्छेदकं व्यासज्यवृत्तितया वह्नित्वमिव पर्याप्तं कंवेत्यत आह हेत्वादिकमिति। ननु प्र
तियोगिता धर्मिकोभयाभाववति वह्न्यां धूमसमानाधिकरणाभावप्रतियोगिता यावद्वह्नित्वानतिरिक्तवृत्तित्व दूद्भित्वावच्छिन्नत्व
साध्यतावच्छेदकसंबंधावच्छिन्नत्वोभयसत्त्वादव्याप्तिरित्यत आह एवं वेति तथा च साध्यतावच्छेदकान्यूनवृत्तिधर्मावच्छिन्न
त्वाभावसत्त्वादुभयाभावोऽसत्त एवेति। तत्राव्याप्तिः। प्रमेयवह्निमान् धूमादित्यत्राव्याप्तिः प्रमेयवह्निमान् धूमादित्यत्रातिव्या
प्तिः प्रमेयवह्नित्वावच्छिन्नत्वस्याप्रसिद्धेरिति वह्न्यभावादत एवेति दूषणादाह वस्तुतस्त्विति तद्वह्निन्नेति तत्प्रतियोगिसमाना
धिकरणहेतुसमानाधिकरणाभावप्रतियोगितावच्छेदकं स्वरूपसंबंधरूपं तद्वह्नित्वाभाववत्तिवृत्तिविशिष्टसामान्यसंबं
धं तत्त्वादिभाविकमवच्छेदकमित्यर्थः भवति हि वह्निसमानाधिकरणान्यतमाभावप्रतियोगितावच्छेदकं यद्धूमत्वं तद्वह्नि

अ॰ शि॰ कृ॰ ६३ न्नाभाववत्तिप्रमेयधूमत्वविशिष्टसामान्यमसंबंधमेवेति प्रमेयधूमत्वस्य पारिभाषिकमवच्छेदकत्वमव्याहतमेव ननु धूमसमा
नाधिकरणाभावानामभावप्रतियोगितावच्छेदकं महानसीयवह्नित्वं तदवच्छिन्नाभाववत्तिवह्नित्वविशिष्टं यत्किंचित्संबंधमे
वेति वह्नित्वस्याधिकरणत्वमिति चेन्न आह सामान्येति स्य विशिष्टस्याप्रतियोगित्वात् सामान्याभावेन घटत्वं इति ह्ययं तादात्म्ये
न वह्निमति साध्यस्य स्वरूपसंबंधरूपप्रतियोगितावच्छेदकं यत्महानसीयवह्निमत्त्वं तदवच्छिन्नाभाववत्ति तादात्म्येन वृत्तेरप्रसि
द्धेः सादृत्तित्वरूपपारिभाषिकावच्छेदकाप्रसिद्धौ नञ्द्वित्वं साध्यतावच्छेदकत्वस्य प्रसिद्धमित्यव्याप्तिरतो संबंधेति तथा
च तादात्म्येन संबंधत्वं प्रसिद्धमिति तदसंबंधत्वरूपावच्छेदकप्रसिद्धौ न द्वित्वं साध्यतावच्छेदकस्याप्रतीतमिति ध्येयं। राम ६३
अत्र तदवच्छिन्नमित्यत्र येन संबंधेन स्वरूपसंबंधस्वरूपमवच्छेदकत्वं तेनैव साध्यतावच्छेदकसंबंधेन वा तदवच्छिन्न
त्वं बोध्यं तेन संयोगेन धूमे साध्ये व्यभिचारिणि संयोगेन स्वरूपसंबंधरूपावच्छेदकीभूत धूमत्वावच्छिन्नसमवायसं

तत्रैव संयोगसंबंधावच्छिन्नतदभाववति स्वावयवे समवायेन धूमादेः इत्यव्याप्तिदोषः।३

बंधावच्छिन्नाभाववत्ति महानसादौ धूमत्वविशिष्टस्य संबंधत्वेऽपि न क्षतिः। असंबंधत्वमपि तेनैव साध्यतावच्छेदकसंबंधेन वा
तेन ज्ञानवान् द्रव्यत्वादित्यत्र तादृशप्रतियोगितावच्छेदकीभूततद्वह्न्यभाववति घटादौ विषयतासंबंधेन ज्ञानस्य संबं
धत्वेऽपि न क्षतिः। ननु जातिमान् मेयत्वादित्यत्र मेयत्वस्य सामान्यादिकं यत्र तदभावप्रतियोगितावच्छेदकं यज्जातित्वं तदव
च्छिन्नाभाववत्ति सामान्यादौ साध्यतावच्छेदकीभूतसमवायसंबंधेन संबंधत्वस्याप्रसिद्ध्या जातित्वस्य पारिभाषिकमवच्छेदक
त्वं स्यादत इत्यत आह स्वविशिष्टेति पर्याप्त्या पारिभाषिकमवच्छेदकं संबंधितावच्छिन्नत्वं चापि तादृशप्रतियोगितावच्छेदकत्वसंग्रहाय संबं
धानुधावनं तत्कार्यं स्वरूपसंबंधरूपावच्छेदकत्वविवक्षया भवति हि जातित्वविशिष्टसंबंधिनिवृत्ते ये येऽभावास्त
त्प्रतियोगितावच्छेदकं तादृशजातित्वमिति जातित्वस्य न पारिभाषिकावच्छेदकत्वहानिः। अत्र प्रतियोगित्वं संबंधित्वं
च साध्यतावच्छेदकसंबंधेनेति स्वयमेव वक्तव्यं तेन धूमत्वविशिष्टसंबंधिनि स्वावयवे वर्तमानो योऽभावस्तत्प्रतियो

गितावच्छेदकत्वेपि धूमत्वस्य न क्षतिः। न वा धूमत्वस्य विशिष्टसंबंधितिपर्वतादौ योऽभावः समवायसंबंधेन तत्प्रतियोगितावच्छेदकत्वेपि धूम
त्वस्य न क्षतिः। अत एवेति यत्र परवर्षे द्रुमयभुक्तमिति भावः। न च वृत्तिरिति अवच्छेदकानतिरिक्तवृत्तित्वविवक्षणे तु क्षतिरिति भावः। नन्वेकालिकसंबं
धेन घटादौ साध्ये महाकालत्ववति मात्रो हेतौ हेतुसमानाधिकरणाभावप्रतियोगिव्यधिकरणाभावीयसाध्यतावच्छेदकसंबंधावच्छिन्नप्रतियो
गितावच्छेदकमप्रसिद्धं न च गगनत्वादिकमेव तथाविधं सुलभं गगनत्वविशिष्टसंबंधाप्रसिद्ध्या तस्य पारिभाषिकावच्छेदकत्वावि
रहात् एवं गगनादेर्वृत्तिमत्वे तु अनुगमसप्रसिद्धिः। किं चेश्वरज्ञानं घटवन्नित्यज्ञानत्वादित्यत्र नितममेवतादृशावच्छेदकाप्रसि
द्धिरित्यतोऽवच्छेदकघटितं लक्षणं विहाय पूर्वोक्तप्रतियोगिताधर्मिकोऽन्याभाव विवक्षया यद्धर्मान्यूनवृत्तितौ कोसत्तावान् जाने
रित्यत्रैव गुणकर्मान्यसत्तायावच्छिन्नप्रतियोगितायान सत्तायान्यूनवृत्तिगुणकर्मान्यसत्तात्वावच्छिन्नत्वसत्वात् उभयाभावात्वेनाव्या
प्तेराह। एवमिति स्वं साध्यतावच्छेदकं पदव्याप्तिः पूर्ववत् बोध्या अत्र वह्न्यूर्ध्वोकस्य त्रैकालपरिमाणासमानाधिकरणाऽसमवायसंबंधा

वच्छिन्नघटाभावप्रतियोगितायां घटत्वविशिष्टसंबंधिनिष्ठाभावप्रतियोगितानवच्छेदकीभूत घटत्वावच्छिन्नत्वसत्वेपि कालिकसंबंधावच्छि-
न्नत्वविरहादेवोभयाभाव इति क्रमेणलक्षणसमन्वय इति तु घ्राणग्राह्यगुणवान्पृथिवीत्यादि तत्र पृथिवीत्वसमानाधिकरणात्यंताभा-
वप्रतियोगितायां घ्राणग्राह्यगुणत्वंविशिष्टसंबंधनिष्ठाभावप्रतियोगितानवच्छेदकीभूतगंधत्वावच्छिन्नत्वाभावे ग्राह्यगंधत्वे तादृशाव-
च्छेदकत्वाभावस्तत्प्रतियोगिकोवा तदवच्छिन्नोवा आद्ये तु गंधत्वादेरपि घ्राणग्राह्यगुणत्वविशिष्टसंबंधिनिष्ठाभावप्रतियोगितानवच्छेद-
कत्वापत्तिर्गंधत्वनिष्ठस्य तदवच्छेदकत्वस्य तत्त्वाभावात् तथा च तदवच्छिन्नप्रतियोगितायामुभयसत्वादेरव्याप्तिलक्षणाव्याप्तिः अन्त्ये तादृशा-
वच्छेदकत्वाभावस्य सामान्याभावतया तत्र घ्राणग्राह्यगुणत्वविशिष्टसंबंधिनिष्ठाभावप्रतियोगितावच्छेदकत्वत्वं गौरवेणाहित्वा गं-
धत्वविशिष्टसंबंधिनिष्ठाभावप्रतियोगित्वावच्छेदकत्वमेवावच्छेदकं कल्प्यते लाघवात् तथा च कथमस्य लक्षणस्यावतार इति प्र-
कृतसाध्यतावच्छेदकविशिष्टसंबंधिनिष्ठाभावप्रतियोगितावच्छेदकत्वत्वावच्छिन्नाभावस्याप्रसिद्धेरित्यत आह तादृशप्रतियोगिता

अशिह्रु० ॥ श्चेति केचित्तु हेतुसमानाधिकरणात्यंताभावप्रतियोगिताशून्यावच्छिन्न [illegible] त्वमित्यत्र प्रतियोगितात्वस्य तदुभयाभावव्याप्य
६५ त्वमित्येवार्थः तथा चेयं पृथिवी घ्राणग्राह्यगुणा दित्यत्र घ्राणग्राह्य [illegible] समानाधिकरणात्यंताभावप्रतियोगितात्वं विहाय लाघवे
नगंधसमानाधिकरणात्यंताभावप्रतियोगितात्वेनैव व्याप्यतावच्छेदकत्वं [illegible] स्यात् इत्यस्वरसादाह तादृशप्रतियोगिता [illegible] त
त्संदर्भे विरोधादुपन्निते न [illegible] सामान्याभावस्य [illegible] नो [illegible] नेद कूटविवदोऽवच्छेदकस्यैव विशेषतोग्रहणा
त्तु चितमिति वाच्यं प्रथमोपस्थितत्वेन प्रतियोगितया एव विशिष्य [illegible] न च तथापि एकावच्छेदकावच्छिन्ननानाप्रतियोगितानां
रणत्वं कल्प्यं इत्याशयः ननु प्रागभावे त्वन्मतेपि तेनैव कपमूलावच्छेदेन संयोगो नोत्पद्यते इति तस्य तदवच्छेदेनैव वृत्तिर्वाच्या एवं स्यावच्छे
देन कार्यजनकत्वमित्यपि वरं तदपेक्षया जनकीत तत्स्वाभावस्यैव तदवच्छेदेनकारणत्वं कल्प्यतामित्यत आह धारावाहिकेति इदं च सामग्री
सत्वस्यैकारणाय निर्विकल्पकस्य तृतीयक्षणे नाशात्प्रतिबंधकीभूतस्याभावस्य विद्यमानत्वात्तुर्यक्षणे पुनरुत्पादःसंभवत्येवेति
भावः द्वितीयादि ज्ञान प्रतिबंधकत्व कल्पने चातिगौरवात्प्रागभावः कल्प्यत इत्याशयः सविकल्पकस्य तु स्वाव्यवहितपूर्ववर्त्तिज्ञानस्या
पि हेतुत्वेन वारणासंभवत्यतो निर्विकल्पकपर्यंतानुधावनं तन्प्रादेशिकत्वात्प्रागभावप्रादेशिकत्वात् अत्रेदमकृत्रिबीजं तन्न निर्विक
ल्पकज्ञानोत्पत्तिकालोत्पत्तिक ध्वंसविशेषस्यैव प्रतिबंधकत्वं कल्प्यते न तु कार्यस्यैवेति अन्ये त्विति पूर्वोक्तं यद्घटादिनियामकत्वेन प्रा
गभावकल्पनं तस्यैवायं निष्कर्षः अयमभिप्रायः उभयसमवायिकारणकस्य द्वयोरेवकारणत्वादनन्यथासिद्धत्वकल्पनं प्रागभावकल्प

अ०शि० ११६ नेतुकल्पनात्रयमिति गौरवं स्फुटमेव बहुसमवेतस्य कारणतानि यदि क्रमिकोत्पन्नानि तदा प्रथमोत्पन्नयोर्द्वित्वादिकं उत्पद्यमानस्यैका
त्वमेव कारणं कल्प्यते लाघवात् तावतैवातिप्रसंगभंगात् यद्येकदोत्पन्नानि तदा तावद्वृत्तीन्यपेक्षाबुद्धिजनितद्वित्वत्रित्वादिसंख्याविशे
षस्यैव नियामकत्वं न प्रागभावस्येति संभवेदीत्यं तात्पर्यः युगपद्द्वित्वत्रित्वोत्पत्तौ त्रयाणां तत्त्वेन तत्त्वेनानन्यथासिद्धकल्पने विविनिगमना
विरहश्चतुर्थ्यैव प्रागभावस्य लाघवमेव तत्पार्थ क्रमोत्पन्नेषु पूर्वोक्तन्यायेन प्रथमोत्पन्नानां द्वित्वादिकं चरमोत्पन्नस्यैकत्वं वेत्पन्नयोः
विशिष्य कारणतायां नियामकत्वसंभवेपि युगपदुत्पन्नस्य जनित्येन विनाप्रागभावं नान्यथासिद्धिरिति । अन्ये द्वित्वस्य रसो ज्ञावनं ता
द्वीजं तु यथानन्यथासिद्धिस्तथैव तद्रूपेक्षाबुद्धेरेव विशेषरूपेण हेतुत्वकल्पने लाघवमिति न तद्रुपस्थिते विशिष्टफलोपहितकारणतापस्थि
तिं विनेत्यर्थः इच्छा कृतीत्यत्र यथासंख्यमन्वयः योगपद्यस्येति युगपदुत्पन्नस्येति वेत्यर्थः अत एव विशेषपदमपार्थकं इदं चापे राम
क्षाबुद्धिं विहायान्यत्र बोध्यं ज्ञानादेरिति फलोपधायकज्ञानादिभिन्नज्ञानादिसाक्षात्कारवृत्त्यर्थः । योवीपपद्येति सामान्यलक्षणायास्त्व ११६

त्रासामर्थ्यादिति भावः इच्छाकृत्यनुपपत्त्यादेरिति अन्वयज्ञानं तु सामान्यलक्षणया व्यासेन व्यतिरेकज्ञानस्य तु धूमो वह्निव्याप्यः कस्यचि-
ज्ज्ञानत एव संभवेत्र अलं तत्कल्पनेनेति भावः । अनुपेत्यान्वयज्ञानमपि साधयति कृत्यनुत्पादेरिति स्मरणोत्तिम घटद्वित्त्स्मरणं ज्ञानजन्यं
स्मरणत्वादित्यर्थः विशेषगुणयोग्यविशेषस्य प्रमाणमूलकत्वमभिप्रेत्याह विशेषाणीति । ननु गोत्वं सकलगोत्ववृत्तित्वविशेषि-
तं सकलं त — ज्ञानं च विना सामान्यलक्षणां नेति प्रागुक्तमनुमानं प्रांचयन्निषेधयन्ति गोत्वेनेति नन्वीदृशोपोत्थितत्वे ज्ञानं कुत्रापीदितं ज्ञायं
जनयोगोत्वादित्यत्र अयं सास्नावान् गोत्वादित्यत्र इदं गोपदश्च वृत्तिनिमित्तं तादात्म्येन गोत्वादित्यत्र वा आद्ये गवेतरासमवेतत्वमेव
गमकमस्तु अखण्डाभावत्वेन वै यथोक्तवृत्तीयगवेतरासमवेतस्याकाशादेरपि प्रसक्तत्वेन समवेतत्वविशेषितं तदस्तु समवायः सं-
बंधो वा द्वितीये तदेतत्तृतीये गोरूपादीनां साध्याभाववत्यायेन हारणायमतोपि भ्रमाभावात्र नियोगित्वमेव विशेषणमस्तु साकल्ये तु न
कुत्रापुपयुक्तमिति अपहृत्कार्यः सामान्येति व्यासज्यवृत्तिधर्मस्य साकल्यस्य गोत्वसामान्यप्रत्यासत्त्या ग्राह्यत्वादित्यर्थः । मा

अशिक्ष
११७

न्तस्येति मात्रपदेन समानविषयत्वशक्तिक्षेपः ननु यत्र रजतत्वासंसर्गाग्रहस्तत्रैव रजतत्वप्रकारकेच्छा नातः शुक्तावपि तदनुपपत्तिः नापि रज
तत्वाभाववत्त्वाग्रह्यमाणे घटादौ तदापत्तिरित्यत आह अनुपस्थितेति शुक्तावेव रजतत्वप्रकारकेच्छायां जायमानायां असंसर्गाग्रहाद्वि
शेषणविशिष्टत्वं कुतो ह्यत्र हि भेदव इत्यत्र नियामकाभावः ननु अधिकरणप्रकारकेच्छाया निखिलस्यैव विशेष्यत्वेनोत्पत्तिविरहः इत्यभावस्तत्त
तदुपादानप्रत्यक्षाभावादेवेत्यत आह वस्तुतस्त्विति असंसर्गाग्रहस्य तत्तदधिकरणतावच्छेदकप्रकारासंसर्गग्रहाभावरूपतया तद्विषयत्व
स्यैव लघुत्वमिति ननु वादिना तद्विषयकज्ञानत्वेन तदिच्छात्वेन कार्यकारणभावो नाभ्युपेयते अत एव तत्प्रकारकज्ञाने तद्विषयत्वस्य नियाम राम
कत्वं तु न कारणताया संभवात् गुरोरप्यसंसर्गाग्रहस्य प्रतिबंधकाभावत्वेन हेतुत्वादित्यभिप्रेत्याह अस्तु वेति पूर्वतोऽपि लाघवमाह वस्तुत ११७
स्त्वित्यादिनेति नवीनाः (तथा च समानविषयत्वस्याकारणत्वेऽपि प्रत्यासत्तितयानियामकत्वमस्तीति भावः ननु शुक्तिरजतयोः रजत
शुक्ती इति ज्ञानात् रजतेरजतत्वेनेच्छापत्तिः समानविषयत्वस्य प्रत्यासत्तेस्तत्र सत्त्वादित्यत आह असंसर्गाग्रहादेरिति तथा च कारणा

भूतज्ञानप्रकारतानिरूपकविशेष्यतावच्छेदेनैव तस्य हेतुत्वोपगमात्रातिप्रसंग इति भावः ननु संसर्गाग्रहस्याकारणत्वेन प्रतियोगिविद्यमानत्वा
दिवेलक्षित्येन क्रमप्रमावेलक्षण्यमुक्तं भवतेत्यत आह कारणोत्पत्त्येन कारणाय थार्थत्वायथार्थत्वविशेषस्य कार्यताट्टशविशेषप्रयोजकत्वे
न अभ्युपेत्याह त्वद्दिशापीति उपस्थितेति उपस्थितं यद्द्वज्ञातं तत्त्रयोरज्ञातभेदग्रहाभाव इत्यर्थः उपस्थितरजतप्रतियोगिकोयोभेदोऽविद्यमा
नस्तद्ग्रह इति वा दोषाणामिति दोषत्वस्यैकस्याभावात् रजतभेदग्रह प्रतिबंधकत्वेनानुगमे सुतरां गौरवमिति न च तदिति सुखत्वा
वच्छेदेन सिद्धत्वज्ञानमित्यर्थः। ऊहनीयमिति न च तत्तत्कांतावलोकत्वेनान्यत्रैवेच्छा एवंविध कुसृष्टिकल्पनस्यानौचित्यपराहतत्वा
दिति। अथेत्यादि अत्र यद्यपि सिद्धत्वनिश्चयस्य प्रतिबंधकत्वेन स्याप्रामाण्यज्ञानानास्कंदितत्वं वक्तव्यं असिद्धत्वज्ञानस्य तत्वेऽप्रामाण्य
निश्चयानास्कंदितत्वं विशेषणमिति गौरवस्फुटमेवेति मेवंशंकाघटनेतथापि यत्र विषयविशेषेऽप्रामाण्यज्ञानमेव न जातं तत्राप्यसि
द्धज्ञानहेतुत्वाभ्युपगमे विनापि सामान्यलक्षणां निर्वाह इत्यभिप्रायेण तदिति स्मर्त्तव्यं यद्वात्र सिद्धत्वज्ञानहेतुत्वाभ्युपगमेपि सामान्य

अशिक ११८ लक्षणानादरइतिसमाधिसौकर्यादिदमितितदेकस्यमते ज्ञानद्वयमितिगुरुमते सिद्धे असिद्धत्वज्ञाने अन्यथाख्यात्यापत्तेरितिसामान्येतितत्त्व
त्यासत्याहिस्वसिद्धसुखज्ञानंनतुतत्त्वेनेतिभावः असिद्धएवइच्छाकृतीस्वाभाव्यादितिसंप्रदायमनुरुंधन्नाह वस्तुतस्त्विति प्रागभावमभ्युपे
त्याह अयंकालइति अयंविद्यमानः अत्रचोभयोरपिसमानसंवित्संवेद्यतान्यायेनविद्यमानप्रागभावप्रतियोगित्वादिरूपस्य असिद्धत्व
स्यभानंबोध्यं प्रागभावानंगीकारेत्वाह सुखोत्पत्तीतिद्वितीयलक्षणइतिसुखकालीनध्वंसप्रतियोगित्वेनार्थांतरवारणायसुखउत्पा
देतिवस्तुतोनित्यसुखस्येश्वरेस्वयमेवव्यवस्थापितत्वात् नतदादायार्थांतरवारणायनदितिध्येयं।कालत्वादितिमहाप्रलयान
भ्युपगमेनतदभ्युपगमेत्वाह एतादृशेति प्रलयान्येत्यर्थः अन्यतुकालस्यस्थूलत्वं बोध्यं तेनचरमसुखकालमादायनव्यभिचारः।नि राम ११८
पुणानरमितिपाकानुमाने अनुसंधेयमिति।संशयेति घटइतिवानघटइतिवानिश्चयएव प्रकृतसंशयप्रतिबंधकइत्यर्थः।
ननुयदितादृशनिश्चयस्यैवविरोधित्वंनहि घटत्वांशेघटत्वप्रकारकस्यघटत्ववानितिनिश्चयस्याविरोधित्वमापद्येतेत्यतआह

घटत्ववानिति। न च यादृशयत्कोटिकसंशयस्तादृशतत्कोटिमदवृत्तिधर्मदर्शनस्यापि व्यावर्त्तकधर्मदर्शनतया तद्घटकप्रतिबंधक
त्वमित्यननुगमः। तस्य तत्तद्धर्मीधर्मीप्रतिमिथ्याज्ञानवासनायाः कारणत्वं नास्तां वाकुत्वं चाननुगमेन। न च आद्यतत्त्वज्ञानप्रागभा
वत्वं कल्प्यते लाघवात्। न चाद्यतत्त्वज्ञानात्वं नाभाव एव कारणं आद्यतत्त्वज्ञाननाशानंतरं तत्सत्त्वोपगमेन तदुत्पत्तिप्रसंगात्। न
चाद्यतत्त्वज्ञानकालोत्पन्नध्वंस एव प्रतिबंधकः तत्रात्मनि तत्कालेऽवच्छेदभेदेन तादृशध्वंसानां बहूनां संभवात् विनिगमनाविरहात्
न च तत्कालोत्पन्नव्याप्यवृत्तित्वादिध्वंस एव प्रतिबंधकः तथापि तत्तद्ध्वंसघटत्वान्यतरत्वावच्छिन्नाभावादिकमादाय विनिगमना
विरहात् न च तन्नियामकत्वेऽभ्युपगमस्याभावत्वेमानाभावस्तस्य विनाशित्वे नानादित्वे नवाभावत्वे पर्यवसानादित्याहुः मूलोक्तो
ज्ञानस्य विचारसहत्वेन तदुपपद्यादृशप्रसंगादिति साध्यत्वसाधनत्वयोर्व्याप्यत्वव्यापकत्वरूपतया सोपाधौ न संभवत इति व्या
चष्टे सोपाधाविति। अभिमानस्य विशेषणत्वे यत्र सत् दसंभवस्तत्राव्याप्तिरित्यत आह योयदिति एकरूपेणेति। तेन वह्निव्यापक

अशि क द्रव्यत्वादेर्वह्नित्वादिना साधनाव्यापकत्वेऽपि नातिव्याप्तिः तथा धूमाभावज्ञानं न व्याप्तिग्रहकं सिद्धासिद्धपराहतत्वात् इति मूलोक्तान्योन्याश्रयोऽसं
११९ भव इति तं व्यवस्थापयति व्यापकत्वमिति अयमर्थः धूमवान् वह्नेरित्यादौ धूमव्यापकत्वमार्द्रेन्धनादौ ग्राह्यं न तु यावदार्द्रेन्धनादिव्यापकः व्याप
त्वे ज्ञानसाध्यं त ~ ज्ञानं च यावत्साध्यवत्तिनिस्यार्द्रेन्धनादेर्धूमादिव्यापकत्वज्ञानाधीनमिति तज्ज्ञानमेतादृशान्योन्याश्रयत्वं अपदार्थव्याख्यानमि
ति संप्रदायत्वेनोक्तं ननु द्रव्यं सत्वादित्यादौ सत्ताधिकरणीभूतगुणादिनिष्ठसंयोगाभावाधिकरणद्रव्यवृत्तित्वेन संयोगस्य न साधनाव्याप
कत्वमित्यत आह तदधिकरणाधिकरणत्वेति ननु स्वरूपसंबंधविशेषस्यापि संयोगनिष्ठप्रतियोगित्वस्य संयोगाभावाधिकरणाधिकरणत्व
स्य सामानाधिकरण्यात् कथं विरोधित्वमित्यत आह प्रतियोगीति ननु प्रतियोगित्वं मूल एव वर्त्तते इति निष्कृष्य दर्शयति प्रतियोगीति अत्र यद्य राम
पि सत्तासामानाधिकरणा द्रव्यमात्रसमवेतत्वावच्छिन्नाभावाधिकरणानधिकरणत्वमादाय संयोगस्य प्रतियोगित्वं सुलभमिति साध ११९
नाव्यापकत्वं संभवत्येव तथापि स्वाभावमादाय वक्तुं शक्यत इत्यपि प्रायेतोन्नदिति ध्येयं ननु पक्षेतर इति मूलमसंगतं इतरपदस्य सर्वा

नामतया सर्वनामकार्योपत्तेरित्यत आह पदार्थ इति तथा चोपसर्जनतया न सर्वनामकार्यमिति ननु बहुव्रीहिणापि पदान्तरार्थभेदप्रतियोगित्व
ध्वंसान्यत्वसाधनव्यापकमेवपूर्वत्रेऽपि प्रमेयत्वादीनां सत्त्वादत आह भावेति अत्र यद्यपि भावप्रधाननिर्देशस्यावश्यकत्वेन तत एव सर्वनाम
कार्याभावे बहुव्रीहिर्निरर्थक एव तथापि दार्ढ्यार्थं तदुक्तमिति भावप्रधाननिर्देशोऽस्तु हि तत्तु नायामाह तादात्म्येनेति अत्रापि बहुव्रीहि
रावश्यक एवान्यथा सर्वनामकार्योपत्तेः अत एव तस्य व्यापकत्वादेव भवति हि व्यतिरेकिणि यत्संबंधेन व्यापकत्वं तत्संबंधाभावा
देव व्याप्याभावसिद्धिरिति दूनस्थापव्वते तत्त्वस्य व्यापकत्वेन दोषाय इति तस्यात्रवेशादित्यर्थः तथा वीतियेन रूपेण साध्यव्याप
कतातेन रूपेणाभावस्य हेतुतायां वैयर्थ्याभावादित्यर्थः प्राग् भ्रममाह यद्यपीति व्यतिरेकव्याप्तेरभावेऽपि केवलान्वयिन्यन्वयव्या
प्तेराह व्यतिरेकिणोरिति साध्यसाधनयोरित्यर्थः इदं कपिसंयोगि एतत्त्वादित्यत्र व्यतिरेकव्याप्त्यभावे तत्सत्त्वादाह व्याप्यवृत्तीति अ
त्र यद्यपि ठक्कुरव्याप्तेः साध्यस्य व्याप्यवृत्तिव्यतिरेकित्वविशेषणमसमुचितं नतु हेतोस्तथाप्यन्वयव्याप्तेरीदृशव्याप्तिसमनियमाभिप्रा

अशीकृ १२० येन रूपवत्संयोगादित्यत्रातिव्याप्तिवारणाय आकाशाभाववान्मेयत्वादित्यत्र व्यभिचारवारणाय च तदिति ध्येयं वस्तुतस्तु व्याप्यवृत्ति
र्योर्व्यतिरेकस्तत्प्रतियोगिनोः साध्यसाधनयोरित्यर्थः हेतुकत्वे तिइदं शरीरं हेतुकं अहेतुकत्वादित्यत्र व्यतिरेके शरीरहेतुकत्वं न व्याप्यं
शरीरपदवैयर्थ्यादित्यर्थः। ननु व्यतिरेकपदेन सप्तमपदार्थोऽभावो वाच्य इत्यत आह एवमपीति यद्यपि तत्रान्वयेऽपि व्याप्तिर्मोक्ता इ
त्यत आह एवमपीति तद्गृहीतं इति इदं च सत्यपि पक्षे नायकत्वाभिप्रायेण इतरथा साधनव्यापकत्वादेव नोपाधिरिति। ननु पूर्वं पक्षेतरा
वान्तव साध्यव्यापकत्वे उक्ते अस्त्वित्यादिना मूलकृता ज्ञानमादाय यद् दूषणं दत्तं तत्कथं तत्र इत्यभिप्रायं पूरयति यद्दूषयतयेति त
त्स्वरूपं साध्यव्यापकत्वे सति साधनाव्यापकत्वं न तूपाधिमात्रमिति मूलेन संगतं पक्षवृत्तीनामेवोपाधीनां पक्षे साध्यसंदेहेऽपि व्याप
कत्वाद्दलेरित्यत आह सत्यपीति पक्षे निश्चायेतन्मते उपाधीनां पक्षवृत्तित्वं नास्त्येवेति व्यभिचारोन्नायकत्वमत्वे पक्षवृत्तेरुपाधित्व राम
स्वीकारेण मूलस्थमुपाधिपदं संकोचयतया व्याचष्टे इतरथेति ह्रदो धूमवान् वह्नेरित्यत्रार्द्रेन्धनादेर्नोपाधित्वं स्यादित्यर्थः विपक्षे १२०

व्यावर्त्तकेति पक्षेतेनरवह्निमत्त्वादावतिव्याप्तिः स्यादित्यर्थः। ननु व्याघातदूषकत्वं तेनैव पूर्वपक्षनिष्पकरणेन तथापि चेति मूलं नावतरतीत्यत आह विप
क्षाव्यावर्त्तकेति आशंकेत्याहेत्यनेनान्वितं विपक्षाव्यावर्त्तकविशेषणानवच्छिन्नेत्यादिविवक्षणेनैवातिव्याप्तिवारणे तथापि चेत्यादिनामूलो
क्तं यया आतेन घटत्वदूषकत्वतो भिप्रायं [illegible] यतिपक्षेतरस्येति सत्त्वप्रतिपक्षे साधारणापायताव तन्मात्रस्येति व्यावच्छेदे साध्यव्यतिरेकेति तथा च मूले
मात्रपदेन विपक्षाव्यावर्त्तकविशेषणानवच्छिन्नेत्यादिप्रतिक्षेपः। ननु दूषकत्वं तावत्प्रतिबंधकज्ञानविषयत्वं तच्च व्यापकत्वस्यासंभ
वीत्यत आह दोषइति ननु पक्षेतरत्वस्य ज्ञातत्वेन घटत्वेन स्यान्तरदूषितयेवतां त्रिकेः पारिभाषितत्वादित्यतः दूरयन्ति तदुत्तरस्येति ननु दूष
णासमर्थत्वे उपाधित्वाभावदूतिविरुद्धं अतो व्यावर्त्तत्वे उपाधित्वं न स्वीकारदूति ननु अनुपदमेव पक्षेतरत्वस्य दूषणासमर्थत्वव्यवस्था
पनादर्थेत्यादिमूलस्य तद्वारकविशेषणादितात्पर्येकत्वेन घटत्वदूत्यत आह दूषकताबीजेति। ननु व्यभिचारोन्नायकत्व प्रतिक्षेपमुपक्र
म्यतथाहीति मूलस्य व्याख्यनाव प्रदर्शकत्वेन घटतदूत्यत आह व्यभिचारादीति आदिपदग्राह्य त्वासिद्धिग्रहणां ननु तत्रापि व्यभिचाराभा

अ॰ शि॰
१२२

याऽदर्शनेन न्यूनत्वं अथ सत्प्रतिपक्षमात्रदर्शनविरोधश्चेत्यत आह अव्याप्यत्वादिनेति। आदिनाव्यभिचारित्वग्रहः एवमग्रेऽपि किंचित्त्वा
दि अत्र यद्यपि तादृशतर्कोत्थापनयैव सत्प्रतिपक्षेऽपि सत्प्रतिपक्षोत्थापनं संभवत्येव तथापि सत्प्रतिपक्षोन्नायकत्वेन उपाधिमात्र
स्य दूषकत्वमभ्युपगन्तुं तः सत्प्रतिपक्षे सत्प्रतिपक्षोत्थापनमुद्रया दूषणासमर्थस्य उपाधेरुद्भावनं कर्तुं न युक्तमिति भावः किं वे
वमित्यस्य एवमिति व्याचष्टे एवमिति व्यतिरेकदूतिमूलं असाधारणस्य दुर्घटत्वेन दुर्घटं यद्यपि तथापि अग्रे निष्कृष्टस्य ल
एवसमाधेयमिति परित्यक्तं ननु बाधेऽवतीर्णे असाधारणाभावादेव उपाधिर्भवितुमर्हत्येवेति मन्वित्यादिमूलासंगतिरित्यतो
व्याचष्टे बाधस्येति ननु वैयर्थ्यं किं करिष्यति व्याप्तिबलादेव उपाधिस्तत्र न भविष्यतीत्याशंक्य निषेधतिमूलेन चेति। प्रकृते इति तथा राम
चास्यां व्याप्तौ अविशिष्टायो बाधः स इह शाड्ग इत्यर्थः विशेषाद्दोषारूपेणाह तदनभ्युपगमादूतिने ओमात्रेतिमूलं हेतुमतीत्यायु १२२
क्त व्याप्युपष्टंभेनेव योजनीयं। अन्यथा दीधितिस्तु तन्माभावेणासंगत्यापत्तेः तत्समशीलं तत्समव्याप्तमित्यर्थः। शून्यत्वादेरित्यादि

पदेन रसवद्रूपत्वादिपरिग्रहः शुद्धपदस्योपादानफलमाह रूपवत्त्वेति वह्निरनुष्णः कृतकत्वादित्यत्र रूपवत्त्वावच्छिन्नानुष्णत्वं व्यापकं
गुरुत्वं रूपवत्त्वावच्छिन्नकृतकत्वस्य साधनस्य पक्षेऽव्यापकत्वं चेति न व्यभुपाधिरिति न चैतदिति अतेजस्त्वव्यतिरेकं तेजस्त्वमि
त्यर्थः पक्ष इति अयमुष्णस्तेजस्त्वादित्यत्र तेजोमात्रस्यैव पक्षतया तत्र चोष्णत्वासिद्धौ उष्णत्वेन प्रमितस्याभावात्सपक्षाभावः सिद्धौ
वा तत्रैव तेजसि उष्णत्वेन प्रमीयमाने तेजस्त्वस्य वर्तमानत्वादित्यर्थः इत्यभिप्रायादिति यद्यपि पक्षमात्रवृत्तित्वेनासाधारणत्वं सा
माराइवणो न्नायकत्वं घटत्वेन तथाप्यापातत एव ग्रंथो योजित इति ध्येयं जलादावित्यादि तथा च पक्षस्य नाप्रसिद्धिरित्यर्थः अप
र इत्यस्य रसोद्भावनं तु हीजं तु भवतु जले उष्णत्वं नमं तेजसि तत्र प्रतीतं न वा प्रतीतं चेत्पर्वतेतरत्ववन्नोपाधित्वं प्रतीतं चेत्सप
क्षेत्त्वावच्छिन्ना व्यावृत्तेरेव नासाधारणत्वमिति ग्रीष्मोष्णतीति अस्यानुद्भूतरूपत्वेन तेजस्त्वाग्रहः स्यं नवतीति भावः अन्य इत्य
स्य रसोद्भावनं तु हीजं तु तादृशासाधारणस्य ज्ञानाभावे ... तयानान्वेयव्याप्त्यादिप्रतिरोधकत्वमत्वमिति व्याशीति अन्वय

अशिकु
१२२ व्याप्तीत्यर्थः इदं च स्वमतेन साध्यवद्वृत्तित्वस्यासाधारण्यस्य च यं वक्ष्यमाणत्वादिति उभयोरपि व्यतिरेकव्याप्त्या सत्प्रतिपक्षो-
न्नायकत्वमसाधारण्यदूषकताबीजं मतिकृन्मते त्वाह व्यतिरेकेति आद्यः अन्वयव्याप्तिग्रहः प्रतिबंधकः व्यतिरेकित्वादिति न
त्वान्वयव्याप्तिग्रहप्रतिबंधेपि व्यतिरेकव्याप्तेरेव समीसिद्धिरिति तदनवकाशात् सत्प्रतिपक्षानवकाशात् असाधारण्य-
स्य तद्देवफलकत्वमिति प्रागुक्तरीत्या यथाहीत्याद्युक्तरीत्या अनुद्भावनीयता अर्थोपाधेः तस्मादितीति तथा च यथाहीत्यादि-
नाव्यभिचारानुमितिरेव खंडिता न तु संशय इति भावः ननूपाधिरेवेति मूलमसंगतं अप्रयोजकत्वसंशयादिनापि व्यभि-
चारसंशयदर्शनात् एवं च कृतानुपयुक्तं चेत्यत एवकारं भिन्नक्रमेण योजयन्नाह तदुक्तमिति। तथा च एवकारादेवान्यदूषणा-
व्यवच्छेदलाभ इति न्यूनतां नाशयति उपादीयतां चेति परमाशंकनां विपक्षत्वमाविष्कर्तुं पदं संकोचयति जन्येति
वस्तुतः साध्याभाववत्वं विपक्षत्वमित्यभिप्रेत्य आद्यं निष्कृत्तसाध्याभाववत्वं तत्वमित्यभिप्रेत्य द्वितीयमित्यपि केचित्। राम
१२२

अनुमितेत्वादावित्यादिपदेन पर्वतीयवह्न्यादिपरिग्रहः तथा दूषकताया मित्यादिमूलस्य पौनरुक्त्यमाशंक्यावतारयति त्यादि
निकामाह नन्वित्यादि तथा च मूले दूषकं व्यभिचारोन्नायकत्वमात्रमुक्तं संप्रति तु व्यभिचारोन्नायकव्यभिचारप्रतियोगित्वमिति
विशेषः मूले क साध्यप्रयोजकत्वस्य सद्भावे पि सत्वेनाव्याप्तशंकया दूरयन्नाह साधनाव्यापकेति साध्यान्वयोन्नायकत्वे
न साध्यव्याप्यत्वं साध्यव्यतिरेकोन्नायकव्यतिरेकप्रतियोगित्वेन साध्यव्यापकत्वं आर्द्रेन्धनादेव पक्षेतरवारणाभिप्रायः
अन्यथा तस्यानियामकत्वेति प्रसंगात् श्रावणत्वादेरप्युपाधितापत्तेरित्यर्थः ननु तथान्वयव्यतिरेकयोः प्रदर्शनायत्तत्वेपि नो मूलो
क्तं विरुद्धमित्यत आह अभवनमिति तद्वाचीति पक्षेतरवह्निसत्वस्य तादृशप्रयोजकत्वसत्वादिति व्याप्तिर्दुर्वारेति यद्धर्मेति स
म्बन्धेनोन्नीयमानयद्धर्मेत्यर्थः। तदुपाधिपदं एवमग्रे पि यथेति जपाकुसुमेत्यादावुपाध्येनान्वयः उपाध्यन्तर्निवि
ष्टसंक्रमेलोहितेत्यादिनः सम्बन्धर्थान्वयश्च यथा श्रेति अत्र यद्यपि साधनस्य हृस्यव्याप्यव्याप्यस्य परत्वादृष्टान्ते वेपम्यं तथापि स्फुटत्वानु

रोधेन तथात्वं कथमित्याशयः शब्दादेव साधनाव्यापकत्वलाभाय प्रकारमाह अस्तीत्यादि इह शब्दप्रतीतेस्याभावप्रतियोगित्वमाविष्क
र्तुमाह नेहेति व्यवहारस्तादृशशब्दः यद्यपि प्रतीतिरेव विषयसाधिका न तथापि दार्ढ्यायैतदुक्तं तो प्रतीतिव्यवहारो उक्तप्रतीत्योर्य
थाक्रमं विषयमाह तत्रयदीति अस्ति हीति वक्तव्यमात्मन्ज्ञानुरोधात् कुरुमपि विषयमाह तदव्याप्यत्वेति यत्पदस्योपाधिपरता
याः संमुखेन उक्तस्य संबंधत्वमुपपादयन्नाह यदि वेति । उभयथेति आद्ये यत्पदेन तादृशधर्म एव वक्तव्यः अंत्ये उपाधिरेव
स च धर्मः संबंध एवेत्यर्थः ननु व्यभिचारसंबंधेन यदभावस्य साध्यव्यभिचारविरोधित्वे उक्ते साध्यव्याप्यत्वमेव लब्धं तथा च व
ह्निमान् धूमादित्यत्र आलोकादेरप्युपाधितापत्तेरित्यत आह तदभावस्येति तत्सत्वे उपाधिव्यभिचाराभावस्य उपाध्यव्याप्यत्वा
भावस्य तेन संबंधेन उपाध्यभावस्य वासत्वे व्यभिचारविरहः साध्यव्यभिचारविरहः एतेन यत्पदोल्लिखितस्य व्याप्यत्वमागतं व्या
प्यव्या[illegible]व्यस्य व्याप्यत्वनियमात् । साध्यव्यापकत्वलाभायाह तद्विरहिणीति उपाध्यभावविरहिणीत्यर्थः उपाध्यभावविरह

अनुपाधिव्यभिचारो व्याप्यत्वं वा तत्र द्वितीये उपाध्यव्याप्यत्वस्याहत्तावपि सत्त्वेन न साध्यव्यभिचाराभावाद्व्यभिचारइत्यत आह धर्मे
तिइत्थं च यत्र दोष्टित्विति तस्य व्यापकत्वलाभः व्यापकव्यभिचारिणो व्याप्यव्यभिचारनियमात् नन्वत्र कल्पे व्यापकता साभायग
न्साध्यभावविरहव्यभिचाराचालेवनीयौ तौ वाच्यतानेवेति अत्र तयोरपि विशेषाविशेषणाभावव्यत्यासेन व्यापकत्वलाभमाविष्क
र्तुं विरोधमाह तत्सत्त्वइति तत्राप्याद्यदलं पूर्ववदेव व्यभिचारविरहिणि साध्यव्यभिचारविरहिणि तथाच यत्र यत्र धर्मे साध्यव्य
भिचारविरहस्तत्र तत्सत्त्वं उपाध्यभावसत्त्वं उपाध्यभावस्य वर्तिन एवेति इत्थं च साध्यव्यापकत्वलाभः साध्यव्यभिचारित्वोन्नेयाभावप्र
तियोगित्वाद्यपदार्थस्य तत्रापि व्यभिचारविरहिणि गगनादौ उपाधिव्याप्यत्वरूपोध्यभावासत्त्वाद्व्यभिचार इति धर्मपदं विषमव्याप
काभावस्य विषमव्यापकव्याप्यत्वस्य तत्सत्त्वेपीति वह्निमान् धूमादित्यादौ द्रव्यत्वेसत्त्वे व्याप्यत्वसत्त्वेपि वह्निव्यभिचारसत्त्वात्
व्यापकरूपविषयमव्यापकएव एवं च विरोधाद्यदलोपयोगो व्यञ्जितः प्रत्यक्षकल्पानुसारेण द्वितीयदलस्योपयोगमाह नापीति साध्यव्य

आलोक
१२४

चेति वह्निमान् धूमादित्यादौ विषमव्याप्यस्यालोकादेर्योऽभावः व्याप्यत्वं तस्याभावेऽपि आलोकाद्यव्याप्ये पीतियावत् साध्ये तस्मिन्सत्यपि
साध्यव्यभिचारात् इत्यत्र प्रथमकल्पस्यांतिमदलोपयोगः सूचितः नन्वेतावता साध्यसमव्याप्तत्र उपाधिरित्यायातं तथा वह्निमान् धूमा
दित्यत्र वह्निसामग्र्यादेस्तत्त्वापत्तिरित्यत आह तादृशेति तथा च व्यभिचारादिसंबंधेन वह्निसामग्र्या धूमाद्यवृत्तित्वान्न तत्रोपाधित्वमि
ति अत एवेति यत एव तूपाधेर्व्यभिचारोऽव्याप्यत्वं वा संबंधः अत एव तेन संबंधेन तदभावस्तादृशव्याप्यव्याप्यत्वरूपोऽनौपाधिक
त्वमिति विरोधघटकदलयोः क्रमेण फलमाह व्याप्तीति अदिश्चेति उपाध्याकाशेऽन्यवृत्त्यनवच्छिन्नत्वस्याकाशावृत्तित्वेऽपि उपाधिमादाये
वं तादृशविरोधग्रहणसंभवात् अत एव मात्रपदं अन्यथा तादृशधर्मस्य वृत्तिमदं तद्वृत्तित्वेन तादात्म्यलक्षणासमन्वयः स्यादिति भा राम
वः तदेति यदभाववृत्त्यत्र यत्पदेन धर्मिविशेषोपि वृत्तिमान् धर्त्तव्यः धर्मविशेषस्त्वावश्यक एव अन्यथा तेषामपि द्रव्यत्वादिना व्युपाधि १२४
तापत्तेः अत्रैवेति। अत्रेमूलोक्तानुमानेऽनित्यत्वव्यापकप्रमेयत्वव्यभिचाराप्रसिद्ध्यान्मूलासंगतिरिति भावः तदव्याप्यत्वस्य वृत्ता

वधिसत्वेन तत्कल्पनस्यावतार इति व्यतिरेकीतिगुणानित्यावित्तिधीविशेष्यकत्वादीतिभावः॥ अथैति अयमेतद्वृत्तियावद्धर्मवान्मेयत्वादित्यादौ
साध्यभिन्नस्य साध्यसमव्याप्तस्याभावादुपाध्यभावसत्वेनातिव्याप्तिरितिभावः॥ तत्रत्येति तत्साध्यकेत्यर्थः॥ इत्थंचसाध्यंचनोपाधिरित्यभि
प्रेत्यावतारणिकान्तरं च साध्यस्योपाधित्वमभिप्रेत्य ज्ञानमादायाभोक्तरे एवेतिकेचित्त। यस्येत्यादि विरोधीत्यनेन यत्पदार्थस्य व्याप्य
त्वलाभः सतु स्फुट एव साध्यव्यापक इत्यनेन तस्य साध्यव्यापकत्वं लभ्यते न हि साध्यव्यापके केवलसाध्यव्याप्यव्याप्यत्वमस्ति साध्यव्या
पकनिष्ठव्याप्यत्वप्रतियोगिनः साध्यव्यापकत्वनियमात् अत्र च साध्यनाव्यापकत्वं दूरणीयं अन्यथा वह्निमान् धूमादित्यादौ वह्निसामग्र्या
देरुपाधितास्यादित्यस्वरसः। यदिति वह्निर्यदि धूमसामग्रीव्याप्यः स्यात्तदा धूमव्याप्यः स्यादिति क्रमेणापादनं च प्राग्वदेव साधनव्यापकत्वं
लभ्येव्याप्यत्वं च स्फुटमेव धूमवान्वह्नेरित्यादौ महानसत्वादेरुपाधितावारणाय साध्यव्यापकेति दूरणीयमित्यस्वरसः। नन्वनुमिति
र्भवत्येवेति मूलमसंगतं न हि उपाध्यभावपक्षसत्त्वे नुमितिनिरितरकारणाविलंबेनापि तद्विलंबान् इत्यतो व्याचष्टे यद्व्यतिरेक इत्या

अ॰शि॰कृ॰ दि तथा चानुमितिपदस्यैव व्याप्त्याद्यन्यतमे कारणे कार्ये वचारइति विपक्षमात्रे इति विपक्षगामित्वमात्रस्य व्यभिचारिसाधारणत्वान्मात्रेति विप
१२५ क्षगामित्वमात्रस्य व्यभिचारित्वे विरुद्धेन तदभावइति सपक्षे इति यत्रे त्यादि एकस्मिन्नेवतदुदाहरणे उपाधिप्रकारद्वयं दर्शयन्नाह पक्षे हेतुमति वे
ति तथा च पक्षधर्मावच्छिन्नसाधनावच्छिन्नसाध्यव्यापकत्वं सुघटमिति तेन साधनावच्छिन्नमादौ दर्शयन्नाह हेतुरिति। हेतौ पक्षेतरइत्यत्वे
व द्वाहृत्तेरुपाधेर्न तदवच्छिन्नसाध्यव्यापकत्वं स्यादिति तदुक्तं एकः साधनावच्छिन्नसाध्यव्यापकः उपाधेः पक्षवृत्तित्वेकदाचित्तु तन्न
दन्यतरत्वादि व पक्षधर्मतावच्छिन्नसाध्यव्यापकेन संकरः स्यादित्यत आह पक्षावृत्तिरिति हेत्विति तथा च साधनावच्छिन्नसाध्यव्याप
कत्वं सुघटमिति पक्षधर्मतावच्छिन्नसाध्यव्यापकमाह अपर इति तथा साध्यव्यापकत्वार्थमाह पक्षेति इष्ट इति साध्यवति हेतुस राम
मानाधिकरणत्वे साधनावच्छिन्नसाध्यव्यापकत्वसंभवादाह साध्यवतीति यद्यपि साध्यवति हेतुसमानाधिकरणस्यापि तदा १२५
त्मो भूतरूपवदन्यतरत्वादेर्न विभुत्वरूपसाधनावच्छिन्नसाध्यव्यापकत्वं आत्मान्तरे तदभावात् तथापि साध्यवति हेतुसमानाधिक

रणस्य नियमतो न तत्र संकरशंकापीति हेत्वसमानाधिकरणस्य सुतरां न संकर इत्यभिप्रेत्याह हेत्वसमानाधिकरणेति यथेत्यादि स्वमते
नित्यद्रव्यत्वावच्छिन्नप्रत्यक्षत्वस्य त्रसरेणावपि सत्वाभ्युपगमेन आत्मत्वेन साधनावच्छिन्नसाध्यव्यापकत्वं घटन इत्यत आह विभुत्वादि
ति आद्यहेतौ साध्यवति हेत्वसमानाधिकरणमाह उँनरूपवत्वमिति एतस्य परमाणौ हेतुसमानाधिकरणेपि साध्यवति न तत्सामाना
धिकरणेपि इति भावः द्वितीयहेतौ त्वसमानाधिकरणं स्फुटमेव उभयत्र हेत्वसमानाधिकरणमाह प्रत्यक्षेति अवगतत्वस्य गुणत्वाव
च्छिन्नाभिधेयत्वव्यत्वस्य द्रव्यवृत्तित्वेन वस्तुतोऽव्यापकत्वादाह घट इति। अत्र गंधवत्वावच्छिन्ने प्रमेयत्वं व्यापकं द्रव्यत्वाव्यापकं स्फुटमेव
धूमवद्धेतौ बाधयोगोलकान्यतरत्वादि धर्मस्याद्रेन्धनाभावपि सत्वेन मूलासंगत्यापातन परतया तत्संगमयति न वेति विरुद्धेति तत्र सा
धनावच्छिन्नसाध्यस्याप्रसिद्धेरित्यर्थः। ननु मित्रातनयत्वावच्छिन्ने श्यामत्वव्यापकशाकपाकजत्वव्यभिचारिणोपि कार्यत्वादेर्न
श्यामत्वव्यभिचार इत्यत आह स्वावच्छिन्नेति। तथा च यत्स्वावच्छिन्नयद्व्यापकव्यभिचारी तदवश्यं तद्व्यभिचारि काकत्वे च न काक

अशिक्र
१२६

त्वावच्छिन्नश्यामत्वव्यापकव्यभिचारीति भावः मित्रातनयत्वपक्षकानुमानेन मानुषत्वादिकं दृष्टान्तः ननूक्तदृष्टान्तसाधारणस्यत्व
स्यैकस्याभावादाह साधनवतीति तथा च मित्रातनयत्वं श्यामत्वव्यभिचारि मित्रातनयत्ववति मित्रातनयत्वावच्छिन्नश्यामत्वव्यापक
व्यभिचारित्वादित्यर्थः। काकत्वादिस्तु न तथा तस्य काक एव व्यभिचारात्। तन्नित्यादि मित्रातनयत्वे केवलसाध्यव्यापकव्यभिचारानिर्ण
यदशायां हि एतस्यावकाशः नन्वयं यद्यवच्छेदकांशेन विशेषणे न तदा स्वरूपासिद्धिसंदेहः अवच्छेदकेदन्तेनुनिर्णय इति भावः अखंडा
भावस्येति न तदवच्छिन्न साध्यव्यापके न तत्साध्यव्यापकमवेत्ययमवशोभाव इत्यर्थः ननु तादृशव्यापकत्वावच्छिन्नाभावस्य न हे
नुत्वं प्रमेयत्वादीनां तत्कोटिनिविष्टत्वेन तदभावस्याप्रसिद्धेः नापि तादृशव्यापकप्रतियोगिताकाभावमात्रं तादृशव्यापकाव्य
भिचारि तोपि तादृशव्यापकाकाशोभयाभाववद्वृत्तित्वेन व्यभिचारात्। न च तादृशव्यापकतावच्छेदकं यद्रूपं तदवच्छिन्नाभावव
द्वृत्तित्वमेव हेतुरितिवाच्यं लाघवेन शाकत्वाकडत्वावच्छिन्नाभाववद्वृत्तित्वस्यैव हेतुत्वादित्यभिप्रायादाह येन रूपेणेति ननु वि

राम
१२६

ओषणावतीत्याद्युक्तरूपेण शुद्धसाध्योऽसंभव इत्यत आह शुद्धेति पूर्वोक्तन्यायेनारुचेराह व्यापकत्वेति व्यभिचारानुमानस्य द्वैविध्या
त्मकत्वविषयस्यत्वे ष्टेकं प्रकारमाह प्रायश इति शुद्धेनेत्यर्थस्तेनायोगोलकान्यतरत्वादिनारूपेण वह्निन्साध्यव्यापकतावच्छेदकरूपाव
च्छिन्नप्रतियोगिताकाभाववत्त्वेनैव हेतूकरणीयं अयमेतद्धूमवान्वह्नेरित्यादौ एतद्धूमवद्योगोलकान्यतरत्वाद्यवच्छिन्ने तद्धूम
व्यापकाभावस्य एतद्धूमव्यापकाभावाभिन्नतया अखण्डाभावाभावेन नैतत्प्रकारसंभव इत्यभिप्रायेण प्रायश इत्युक्तं ननु तद्धूमादि
साध्यकव्यभिचारित्वेनैतल्लिङ्गकोक्तेनैव साधकत्वानुमानं व्यर्थं स्यादित्यत आह वस्तुतस्त्विति ननु यत्र व्यभिचारः संदिग्ध
स्तत्र तस्य न हेतुत्वं स्वरूपासिद्धिसंदेहादत आह संदिग्धेति तत्रोपाधेरपि संदेहान्नैतेन साधनत्वमिति यदि च तत्र संदिग्धोपाधि
कत्वमपि हेतूक्रियते तदास्माकमपि संदिग्धव्यभिचारकत्वं तुल्यमित्युक्तं समशीलत्वमिति ननूद्भावनमुपन्यासः तत्र कथमसि
द्धिहेत्वाभास इति मूलासंगतेरुद्भावनमेव व्याचष्टे विशेषणेति तथा च विशिष्टसाधने विशेष्यांशमादाय मूले असिद्धिरुक्ते

अनीकृ तिभावः प्रकृतेति प्रकृतसाध्यानविरोधी शुद्धसाध्यव्यभिचारः असाध्यकस्य विशिष्टव्यभिचारः न तु साधकस्योपाधिव्यभिचार इत्युपाधिव्य
१२७ भिचारस्य शुद्धसाध्यव्यभिचारा साधकत्वमिति निश्चेतुं सिद्धांतवक्ष्यमाणरीत्येत्यर्थः अभिचारेण न यच्च श्यामत्वव्यभिचारिमित्रातन
येशाकपाकजत्वव्यभिचारित्वादिति क्रमेणेत्यर्थः ननु उपाधिमात्रप्रवेशे तत्संभवे पक्षधर्मेति संकोचकमूलमसंगतमित्यत आह
पदृइति ननु व्यभिचारनिरूपकत्वेनैव उपाधिरुपन्यासे नोपाधिरिति मूलमसंगतमित्यत आह आधान्येनेति तथा चायं तत्रोपाधि
रिपुपन्यासो विरुद्ध एवेति भावः विरोधमेव विवृणोति व्याप्यादीति। साध्यव्यभिचारव्याप्तेरुपाधिव्यभिचारवृत्तित्यादित्यर्थः।आ
द्विपदेन पक्षधर्मतापरिग्रहः अत्र तु कोशकारमते नियामकं समव्याप्तमित्यर्थः साध्यवदिति घटअन्यत्वे विभुत्वादित्यत्र
विभुत्वं प्रत्यक्षत्वव्यभिचारि विभुनि आत्मत्वव्यभिचारित्वादित्यादौ व्यभिचारो न्नायके आत्मत्वादावित्यर्थः। रूपकताबीजव राम
त्तिजन्यत्वागमनं दर्शयितुं लक्षणं निवेशयेद्रूपकताबीजाभावमाह वक्ष्यमाणेति। नाधेति शब्दोऽनित्यत्वोन्यादौ शब्दे आनित्य १२७

त्वाभावानिश्चयेनादृश व्यभिचाराप्रसिद्धेः शब्दभिन्नस्य सर्वस्यैव तत्साध्यवत्त्वेन निर्णीयात् वाधावतारे नु पक्ष एव व्यभिचारनिर्णयानुप
पत्तेर्निरर्थक इति भावः । विरोधीनीति तथा सति पर्वतो वह्निमान् धूमादित्यत्र धूमस्य पर्वतीयवह्निव्यभिचारित्वमपीति दोषः स्यादि
ति भावः एवमपि सत्प्रतिपक्षोन्नायकत्वेपि तत्रेति नैयायिकमतेन नत्र सत्प्रतिपक्षस्यानवतारादिति भावः । मीमांसकेति नन्वत्र शब्द
स्यानित्यत्वाभावादिति भावः उभयमतसाधारणमाह शब्देति शब्दत्वं अनित्यत्वातिरिक्त शब्दधर्मातिरिक्त धर्मवदित्यादा
वित्यर्थः ननु पक्षधर्मतावच्छेदकस्य साध्यव्यापकत्वं पक्षतावच्छेदकादेरपि तत्राह पक्षेति आदिपदेन तन्निष्ठयत्किञ्चिद्धर्मान्तरप
रिग्रहः एतन्नेति शब्दः कृतकत्वातिरिक्त शब्दधर्मातिरिक्त धर्मवानित्यादिना यदि स्यात्तर्हि तेन कृतकत्वं साध्यते तदित्यर्थः अस्त्वा
तंत्र्ये दूषणमाह अनित्यत्वेति कृसाधकत्वादिति सत्प्रतिपक्षाद्गमत्वादित्यर्थः । अनित्यद्रव्यासमवेतत्वस्यानित्यद्रव्यसम
वेतत्वेन पर्यवसायितुं परिशेषप्रदर्शनेन मूलं सार्थकयति ।समवेतत्वेनेति ननु असमवेतत्वमादाय अर्थान्तरं असम

अशिकृ वेतत्वेनापि विशेषेणोऽभूदस्तमित्यत आह द्रव्येति तथा चाद्रव्यसमवेतस्यापि तत्वं निर्वहतीति भावः। सावयवत्वइति अवयवपदस्याद्रव्यस
१२८ मवायिकारणार्थकत्वादिति भावः। ननु अनित्यासमवेतमित्येव साध्यं क्रियतां सावयवरूपपदाविशेषणमहिम्नैव नव्यासिद्धिर्भ
विष्यतीत्यत आह स्फुटतरेति द्रव्यसमवेतत्वं तावद्विविधं भवति नित्यद्रव्यसमवेतं अनित्यद्रव्यसमवेतं च तत्रानित्यद्रव्यसमवेतत्वे
साध्यमाने आद्यसाध्यमादायैव विश्राम्यति अनित्यासमवेतत्वे साध्यमानेपि यद्यपि द्रव्यसमवेतत्वपदाविशेषणमहिम्ना तथा
सिद्धिर्भवत्येव तथापि द्रव्यसमवेतस्य यदनित्यासमवेतत्वं तन्नित्यद्रव्योपसंधाने नैवेति नियमप्रतिसंधाने नास्फुटमिति अत एवा
ह पर्यवसानादिति परमाणुनित्यत्वेति सावयवत्वग्रहादेव परमाणुसिद्धिरभ्युपगन्तेति नित्यत्वानुधावनं नित्यत्वसिद्धिदशा राम
शायां नुपन्नत्वसहचारग्रहःसंभवतीति तथानुधावनं। दृष्टानुमानस्य न दृशामधिकृत्येव प्रवृत्तत्वादिति आकाशादाविति १२८
महत्वानधिकरणद्रव्यत्वस्यानवसत्वेपि अन्यत्वविशेषितस्य तस्याभाव आकाशादौ सुलभः साध्यं च तत्र वर्त्तत एवेति भावः ननु

व्याप्तिग्रहो मा स्तु व्याप्तिस्तु तेन विनापि वर्त्तत एवेति तस्यावैयर्थ्यमित्यत आह विशिष्येति। येनु हेतोमहत्त्वावान्तरजातिविशेषः एव प्रविष्टः
न तु बाधकशङ्कान्तराभावान्मूलेन तयोपन्यास इति वदन्ति तन्मतमाह नित्येति नन्वेवमवान्तरकापकर्षव्यवहार एव न तत्र मानमित्यत आह वैम
वेति अननुगतजातिभिरिति हस्तवितस्त्यादिपरिमाणवर्त्तिजातिभिरित्यर्थः ननु अननुगतस्तादृशो व्यवहारोऽननुगताभिस्ताभिः कथं स्या
दित्यत आह तुल्येति तथाच वैमवान्तरोत्कर्षनिरूपितानावाच्छिन्नानिरूपकेनोपाधिना तथानुगम इत्यर्थः संकरेति जन्यमहत्त्वत्वजा
तेर्गगनादिमहत्त्वपरित्याग इति वचनस्यास्तु त्रसरेणुमहत्त्वपरित्यागः घटादिमहत्त्वे संकर इति भावः दार्ढ्येति निस्पर्शद्रव्यसम
वेतत्वस्य नित्यद्रव्यसमवेतत्वप्रयोजनत्वाभिमानेन तथा व्याप्तेर्भिग्रह इत्यर्थः निस्पर्शसमवेतत्वमात्रस्यैव तत्प्रयोजनत्वाभिमाने
गुणत्वादावपि नित्यद्रव्यसमवेतत्वं स्यादिति भावः तेन द्रव्यपदेन पर्यवसितेति द्रव्यपदादाने निस्पर्शसमवेतत्वस्य गुणत्वादा
वपि सत्त्वेन समव्याप्तिभंग इति कश्चिदिति म संकोचस्याशक्तिर्व्यापकत्वेनास्वरससूचनाय तुल्यमिति तथा उक्तन्यायेन सा

मान्यतः सिद्ध नित्यसमवेते अनित्यद्रव्यासमवेतत्वं अथवा नस्पर्शवत्समवेतत्वमिति व्यभिचारः तथा तत्रैवानित्यद्रव्यसमवेतत्वे सत्य
पि निःस्पर्शद्रव्यसमवेतत्वासत्त्वाद्व्यभिचार इति अनित्यद्रव्यासमवेतत्वस्याभावादसत्त्वेऽपि सत्त्वेन निःस्पर्शद्रव्यसमवेतत्वस्य च तत्रा
सत्त्वेन स्पर्शवदसमवेतत्वं प्रतिवदीष्कृतमिति ध्येयं। ननु सोपाधावपि उपाध्यज्ञानदशायां अनुमितेर्भवत्येवेत्यत आह सो
पाधाविति। ननु योग्यत्वं दुर्वचनमित्यत आह पक्ष इति व्यापकतायां साध्यसिद्धेर्विरोधित्वादाह स्वव्यतिरेकेति पक्षवृत्तिसा
ध्यविशेषाभावसिद्धिरपि सत्प्रतिपक्षतया विरोधिनी भवत्येवेति विरोधित्वपर्यंतं इदमेवाह यत्तिभवतीत्यादिना उन्न
रग्रंथानुरोधादाह तथेति। ननु उन्नायकत्वं उन्नयनस्वरूपयोग्यत्वं वक्तव्यं न स्वव्याप्तिपक्षधर्मतारूपं गुरुतरमेव एवं वि
रोधित्वमव्यतिगुरुतरं मूलोक्तलक्षणे साधनाव्यापकत्वं वा निरर्थकमिति मन्वानो निष्कृष्टं साध्यतावच्छेदकावच्छिन्नव्य
तिरेकोपपादनप्रकारमाह वस्तुतस्त्विति उदो धूमान् वह्निमानित्यादौ वह्निसामग्र्यादेरुपाधित्वमेतन्मते निर्वाहयति

नाहयत्रेति नादृशः सत्प्रतिपक्षो नायकः इतरेषां व्यभिचारानुमानवादिनां यथा धूमवान् वह्नेरित्यत्र वर्त्तत इत्याद्रेंधनादेरपि सत्
प्रतिपक्षत्वेन तयाऽस्मदनभिमतस्यापि तत्संग्रहः तथा त्वदभिमतस्यापि वह्निसामग्र्यादेर्न तत्संग्रह इति भावः नन्वास्तामधि
कसंग्रहः किंतु पक्षद्वयेनैरसंग्रहो भवतो केषांचिन्मते [illegible]त आह अपरेषामिति। अपरेषां व्यभिचारानुवादिनां तथा च तथाभ
वतो वह्निसामग्र्यादेरसंग्रहः न दोषाय तथा ममापीति प्रघट्टकार्थः ननु पक्षतावच्छेदकभेदानुपाधेरननुगम इत्यत आह परे
षामिति। तथा च भवतां साधनभेदोऽस्माकं पक्षतावच्छेदकभेद एवेति तुल्यमेव वक्ष्यत इति केचिदित्यादिना यथाकरकाइष्टि (?)
वीत्यं तेन ननु यद्व्यभिचारित्वेनेत्यादेर्न [illegible]रूपत्वेन न [illegible]त्वित्यादिग्रंथो विरुद्ध इत्यत आह लक्षणेति। ननु साध्यव्यभिचा
रित्वमित्यत्र यद्व्यभिचारित्वमित्यस्य न हेतुत्वमित्यतः प्रयोगो न संगच्छते इति चोदयत इतीति न नूनं यन रूपं फलं यत्र न ज्ञातं त
त्रज्ञाप्तिरित्यत आह [illegible] नायकत्वमिति। ननु तथापि सत्यामि (?) [illegible]नयत्वादित्यादौ उपाधिव्यभिचारस्य तत्त्वेन न सा

नव्यी व्याप्ति रू १३०

ष्य व्यभिचार व्याप्यतावृत्त्य व्याप्तिः अथ येनकेन विरूपेण उपाधिव्यभिचारस्य न ह्यव्यत्वं वक्तव्यं तर्हि रूपवान् द्रव्यत्वादित्यत्र
पृथिवीत्वाभावस्य उपाधितापत्तेरित्यत आह तथा चेति यद्व्यभिचारग्रहादेव विवक्षितलाभ इति सूचयन्नाह यद्व्यभिचार
इति । यद्धर्म उपाधितावच्छेदकीभूत धर्म इत्यर्थः । यत्किंचिदित्यस्य फलं शाकपाकजत्वादिपरिग्रहः न वृत्तित्वं वृत्तित्व सामा
न्यं बोध्यं अन्यथा पृथिवीत्वाभावाभावाधिकरणीभूत यत्किंचित्पृथिवीनिष्ठवृत्तित्वस्य सत्तादिवृत्तेः साध्यव्यभिचार व्याप्यत्वाद
नित्याहेस्तादवस्थ्यादिति वह्निमान् धूमादित्यत्र वह्निसामग्र्या उपाधित्ववारणाय साधनवृत्तित्वे इति यद्धर्मेत्यस्य फलमाह ने
नेति । न हूवेति द्रव्यत्वादीत्यर्थः नन्विदं अयुक्तं अवृत्तित्वं हेतुतावच्छेदकसंबंधेन वक्तव्यं अन्यथा वह्निसामग्र्यादौ सत्ति राम
प्रसंगस्य दुरुद्धरत्वात् धूमस्यापि कालिकसंबंधेन ह्रदादिवृत्तित्वात् तथा च गुणत्वादौ साधनतावच्छेदकसंबंधावच्छिन्न १३०
वृत्तित्वाप्रसिद्ध्या कथं वह्न्यादौ तदभावो ग्राह्य इति चेन्न त्वं समवायसंबंधेन हेतुत्वाभिप्रायेणेदं बोध्यं यत्किंचित्त्वादश्रयो

जनं संगमयतीत्युद्देत्यादिना अवच्छेदकं मित्रातनयत्वादि न तु येन केनापि यद्व्यभिचारस्य साध्यव्यभिचारव्याप्यत्वं किमिति
नोक्तमित्यत आह द्रव्यत्वेनेति इदं रूपवत्त्वद्रव्यत्वादित्यादौ द्रव्यत्वं रूपव्यभिचारित्वादित्यनुमानं घटत्वे पृथिवीत्वाभाव
व्यभिचारित्वस्य घटत्वादौ सत्त्वेन व्यभिचारादिति किं चिद्विशेषणाविशिष्टं वाच्यं तद्विशेषणमाह सन्नेति सन्नेति दृष्टां
तार्थं द्रव्यत्वेति स्वरूपासिद्ध्युद्धारार्थं जलत्वेति विशेषणसार्थक्यार्थं अन्यथा सत्त्वाद्द्रव्यत्वाभावविशेषणकधीविशे
ष्यत्वादित्यसोवसम्पत्ते उद्देश्यासिद्धिरिति मात्रपदं स्वघटत्वादिकमादाय याधीस्तद्विशेष्यत्वस्य व्यभिचार इति त
न्निरसनाय लघुप्रकारान्तरमाह जलसमवेतेनेति जलसमवेतं यन्नित्यमित्यर्थः अन्यथा तत्पृथिवीत्वादि व्यभिचारवारणाय त
त्रापि कालिकसंबन्धेन पृथिवीत्वादेरपि जलत्वादिवृत्तित्वादित्यत आह समवेतेनेति जलपृथिवीसंयोगादौ व्यभिचारवा
रणाय नित्येति विशेष्यं वर्जलत्वे व्यभिचारवारणाय पृथिवीत्वेति पृथिवीत्वात्मकोयः पृथिवीत्वाभावाभाव इत्यर्थः।

अशिद्धि

[illegible]

न१

१३१ सामान्यमिति। अत एव द्रव्यत्वेनैवोक्तं किन्तु ननु तस्यैव वारणं किमिति कृतं द्रव्यत्वमत आह नचेति इदं वह्निरेकं तादृशव्यवहारविषय

तावच्छेदकं न हि इदं जलं आकाशादित्यत्र द्रव्यत्वसाधारणं व्याप्यत्वासिद्धत्वनायकत्वं किन्तु पक्षेतरत्वमित्यत आह व्याप्यत्वेति

व्याप्यत्वासिद्धावेव द्रव्यत्वव्यभिचारस्य लघुत्वादित्यर्थः। स्वाव्याप्यत्वेनेति आकाशं जलत्वाव्याप्यं द्रव्यत्वाव्याप्यत्वात् इत्या

दिक्रमेण एवं जातिघटकस्यादरणीयत्वे स्वव्यभिचारेणेति विशेषितेनाविशेषितेन चेत्यर्थः। उक्तरूपाधेः पृथिवीत्वाभावरूपोपा

धेः साध्याभाववृत्तिरूपाभाववृत्त्वोभयाधिकरणं वाद्यादित्युक्ति अत्यन्ताभावप्रतियोगिनः पृथिवीत्वाभावस्य तथात्वेन

संग्रहः इति भावः अत्र साध्यसमानाधिकरणत्वमपि बोध्यं अन्यथा धूमवान् वह्नेरित्यत्र जलत्वादीनामुपाधिनापत्तिरि

तित्रकृत्तत्वदेशामपि तत्परतया योजयति अस्त्विति। नच एवेति तथा ज्ञाने व्यभिचारस्य प्रथमतः स्फूर्तेरिति तदाद्य राम

ययादि तेनानोपाधिव्यवहारस्तदा पृथिवीत्वाभावेपि तुल्यमित्याह तुल्यमिति केचित्तु साध्यसमानाधिकरणत्वेन विशे १३१

षणां नदेयमेव तथा चाति साध्यवत् साध्यविरुद्धसाधारणमेवोपाधित्वमस्तु तत्र व्यवहाराभावाच्चेन्न तत्साधारण्यमिति साध्य
वपरित्यागो ऽपि तदा प्रकृते ऽपि तुल्यमितीत्याहुः । अत एवेति यत एव व्यभिचारानुमापकत्वसत्वेन नोपाधित्वमत एवेत्यर्थः ।
अन्यथा स श्यामो मित्रातनयत्वादित्यत्र मित्रातनयत्वं श्यामत्वव्यभिचारि सत्तामित्रातनयत्व श्याममित्रातनयत्वानीति धी
विशेष्यत्वे सति शाकपाकजत्वव्यभिचारित्वादित्यतो ऽपि व्यभिचारानुमानसंभवे श्यामत्वनिष्ठ शाकपाकजत्वव्याप्यतावच्छे
दकं मित्रातनयत्वं किमिति नेरंगीक्रियते न यावन्तादृशविशेषणानुसरणं तावत्तत्र इति अवश्यमुपाधिव्यभिचारस्य
साध्यव्यभिचारनियम इत्येषामभिप्रेतं तथा च यत् पृथिवीत्वाभाववारणं कृतं तत्तु तादृशं विवक्षितं तत्समीचीनमिति
पृथिवीत्वाभावोपाधौ तादृशविशेषणाभावादिति भावः । ननु दैशिकविशेषणताविशेषणमहाकालभेदे साध्ये का
लिकसंबंधेन घटादिहेतौ खंडकालभेद उपाधिः स्यात् खंडकालभेदाभाववत् साध्यमहाकालभेदाभाववत्सामान्य

अशिक्ष
[redacted]
१३२ खंडकालवृत्तित्वस्य महाकालवृत्तित्वव्याप्यत्वान्महाहेतुवृत्तित्वाच्चाप्येवं द्रव्यमेतत्क्षेहाभिन्नं गुणत्वादित्यादौ तत्क्षेहभेदस्य व्यापा
धितापत्तेः तत्क्षेहवृत्तित्वसामान्येपि तत्क्षेहभेदाभाववदेतत्क्षेहवृत्तित्वव्याप्यत्वादेतत्तत्क्षणवृत्त्याभाववनुत्पन्नात्यधिकरणायो
रूपस्थाव्यापकता तद्वृत्तित्वजातिमादाय यो व्यभिचारः दोषः स नेत्यभिप्रायं न च तत्रेष्टापत्तिः पृथिवीत्वाभाववनुत्पत्तान्नया
हि पृथिवीत्वाभावस्य यत्र साधनाव्यापकत्वं पृथिवीत्वादौ न तत्र साध्यव्यभिचारित्वं यत्र च साध्यव्यभिचारित्वं वाय्वादौ
तत्र न साधनाव्यापकत्वं अत एव प्रागुक्तैरुक्तं सर्वे साध्यसमानाधिकरणाः सदुपाधयः हेतोरेकाश्रये येषां स्वसाध्य
व्यभिचारितेति अत्र च स्वं च साध्यं च स्वसाध्ये तयोरेकस्मिन्नहेत्वधिकरणे व्यभिचारित्वं इत्यर्थो बोध्यः प्रकृते च कालिकसंबं
धेन घटस्याव्यापकत्वं खंडकालभेदे खंडकालमादाय तत्र च न साध्याभावो महाकालभेदस्य विद्यमानत्वात् यत्र राम
च साध्यव्यभिचारो महाकाले तत्र खंडकालभेदस्याविद्यमानत्वादिति नैकत्र हेत्वधिकरणे उभयाभाव एवमत्राप्याद्य १३२

न तु तस्य तत्राह वस्तुतस्त्विति । अत्र केचित् महाकालो महाकालभिन्नो घटादिस्तत्र खंडकालभेदस्योपाधित्वे वारणाय यद्धु
र्मावच्छिन्नाभावे साध्याभावसमानाधिकरणत्वमिति विशेषणं । अयुक्तं तत् तदसत् तथापि महाकालाकाशान्यतरत्वावच्छिन्न
भेदवान् घटादिस्तत्र खंडकालाकाशान्यतरत्वावच्छिन्नभेदस्योपाधित्वदुर्वारापत्तेः आकाशमादाय तत्रापि उपाध्यभाव
स्य साध्याभावसमानाधिकरणत्वात् । अपरे तु तादृशाधिकरणवृत्तित्वं तत्र न व्याप्यं अर्थविशेषणत्वात् किंतु कालवृत्तित्व
मिति तत्र नास्ति व्याप्तिः तदप्यसत् तादृशानुमानस्य तृतीयस्य दुष्टत्वापत्तेः । अन्ये तु तादृशाधिकरणवृत्तित्वं साध्यव्य
भिचारव्याप्यं इत्यस्य तादृशाधिकरणवृत्तित्वावच्छिन्नस्य साध्यव्यभिचारानुमापकत्वमर्थमाहुः । तदुन्मत्तप्रलपनं असंभवापत्तेः
न हि उपाधिव्यभिचार एव साध्यव्यभिचारः तस्मादेतदस्वरसात् वस्तुतस्त्वित्युक्तं समीचीनमिति विभिन्नं । न तु द्रव्यं सत्त्वादि
त्यत्र संयोगोपाधावव्याप्तिः तत्र साध्यवति गुणादौ संयोगाभावेन द्रव्यत्वाभावस्यानुत्रनायं तत्र सा केवलान्वयित्वेन व्यभि

ग्गौ
अनिरु
१३३

वारित्यादित्यत आहयद्वहितिलाघवादिति यद्धर्मावच्छिन्नाभावाधिकरणवृत्तित्वं इत्यत्र प्रकृते वृत्तित्वं साध्यव्यभिचार इत्यत्रान्या वृत्ति
त्वं इत्यादिक्रमेण लाघवमित्यर्थः। अत एवेति पूर्वविवक्षायां इदं स्नेहवद्द्रव्यत्वादित्यादौ त्रभयत्वेन प्रकारेण जलत्वतेजस्त्व
योरप्युपाधित्वं स्यात् न च धर्मावच्छिन्नाभावाधिकरणीभूतयत् किंचिद्वृत्तित्वस्य साध्यव्यभिचारव्याप्यत्वात् इहतु तादृ
शोभयवत्तोऽप्रसिद्धत्वेन तद्वदन्यस्याऽप्रसिद्धेर्नातिव्याप्तिरिति भावः। ननु प्रकृतलक्षणवाक्येनायमर्थः कथं प्राप्यत इत्य
त आहयद्व्यभिचारित्वेनेति तथाहीति इदं साधनवत्साध्याभाववत्त्वं उपाधिमदन्यत्वात् इत्यत्र पक्षतावच्छेदकीभूतसा
धनेन समं साध्याभावसामानाधिकरण्यं भासते न तथात्र व्यभिचारो विभासत एवेति। अत एवाह हेतुमद्वृत्तिः च विषयेति। राम
अत्रैवेति अनयोर्विवक्षयोरित्यर्थः। अवच्छिन्नेति उपाधितावच्छेदकावच्छिन्नेत्यर्थः। तेन द्रव्यं सत्त्वादित्यत्र गुणवृत्तिस १३३
त्त्वेन नोपाधिनेति। साध्यसमानाधिकरणेति यदवच्छिन्नस्य कुत्रचित्साध्यसमानाधिकरणत्वमित्यर्थः। अन्यथाऽ

त्वं जातिमत्त्वादित्यत्र गुणावृत्तिसत्तात्वस्य साध्यसमानाधिकरणावृत्तित्वात् उपाधित्वं दुरुद्धरमिति यद्वा साध्यसमानाधिकरण
वृत्तित्वेन साध्याधिकरणानिरूपिताधेयतावच्छेदकत्वेन प्रथमविवक्षानुसारेण फलमाह तेनेति। द्वितीयविवक्षायां तु ल
क्षणे दत्त्ववदन्यत्वादिना साध्याभावसाधनात् विशेषणादानादिप्रयासेऽपि तद्वदन्यत्वे व्यर्थस्य दुरुद्धरत्वादिति। द्वितीयव्याख्या
नुसारेणाह न वेति। इदं तेजो द्रव्यत्वादित्यत्र स्पर्शसामान्याभावः जातिसामान्याभावश्चोपाधिः स्यात् यदि चनेन विशेषणामि
ति तत्रापि स्पर्शसामान्याभावस्य स्वमत्ते जन्यतेजसि साध्यसमानाधिकरणत्वेन जात्यभावपर्यन्तानुधावनं। द्रव्यं तेजस्त्वा
भाववत् शीतस्पर्शान् द्रव्यत्वं वा तेजस्त्वव्यभिचारि शीतस्पर्शवद्वृत्तित्वादित्यादिक्रमेणेत्यर्थः। व्यभिचारस्य स्फुट
त्वर प्रतिपत्त्यर्थं द्वितीयानुसरणं न त्विदं कंबुग्रीवादिमत् द्रव्यत्वादित्यत्र द्रव्यत्वं कंबुग्रीवादिमत्त्वव्यभिचारि घटत्व
व्यभिचारव्यभिचारित्वात् घटरूपादिवृत्तिधर्मवत् अवृत्तिपरिमाणादिवद्वा इत्यत्र एवं कंबुग्रीवादिमत्त्व परिमाना

इदं१

अ॰सि॰ टी॰
भक्ति दित्यत्र द्रव्यं गगनादिकं कंबुग्रीवादिमत्त्वाभाववत् घटत्वव्यभिचारित्वाभावात् घटत्ववदित्यादौ घटत्वस्य घटादिवृत्तित्वेन तत्र य
१३४ कंबुग्रीवादिमत्त्वव्यभिचारित्वसत्त्वात्। घटत्वाभावस्य कपालादिवृत्तित्वेन तत्र कंबुग्रीवादिमत्त्वाभावस्य सत्त्वेनासाध
वात्। घटत्वादेरेव गमकत्वमिति घटत्वव्यभिचारित्वापाद्यो अव्याप्तिरित्यत आह द्रव्यत्वादिनेति। अत्र घटत्वव्यभिचारित्वा
दौ वृत्तित्वं समवायेन बोध्यं तथा च घटत्वादेर्लघुत्वेऽपि नाइशाखंडाभावनिष्ठत्वेन व्याप्तेस्तेनानवच्छेद्यत्वादिति भावः। न
ह्वीतिवेति पूर्वकल्पे वृत्तित्वनिष्ठाव्याप्ति४ अत्र तु अभावनिष्ठेति विशेषः। घटत्वादेरिति व्यभिचारित्वमभिप्रेत्य तदभा
वस्य वेति घटत्वाभावस्य वेत्यर्थः। इदं द्रव्यं कंबुग्रीवादिमत्त्वाभाववत् घटत्वाभावादित्यादिक्रमेणाह्येयं। ननु धूमवान्व
ह्नेरित्यादौ अयोगोलकत्वाभावस्यानुपाधितापत्तिः तत्र वह्निर्धूमव्यभिचारी अयोगोलकत्वाभावाभाववद्वृत्तित्वात् इत्यपे राम
द्यायोगोलकवृत्तित्वस्यैव संभवात् इत्याशंकां निषेधति नवेति प्रतियोगिनि वृत्तिः अयोगोलकत्वादेरित्यर्थः इदं वाभावसाधन १३४

त्वमभिप्रेत्य व्यभिचारानुमापकत्वमभिप्रेत्याह तद्वदिति तस्येति अयोगोलकत्वाभावाभावस्येत्यर्थः। वस्तुतस्तु तद्वृत्तितथात्वे साध्याभावच्च प्र
कारेण प्रवेशेपि न क्षतिः। तदभावेति तदर्थस्याभावविशेषणत्वात् न तु तद्वतीति भावः। व्यभिचारेति साध्याभावसाधने तु तस्य हे
तावच्छेदकरूपेणोपस्थितत्वादिति भावः। इत्थं चैतत्स्वरसोन्नीतत्वं न हीजं तु तद्वृत्तित्वस्यानुपस्थितत्वेपि वस्तुतस्तथैव व्याप्य
त्वात् यत्रिष्ठादेरभावादिति। यद्धर्मावच्छेदेनेत्यादि मूले यद्धर्मस्य साध्यनिरूपितावच्छेदकत्वं नान्यूनवृत्तित्वं नाप्यनतिरिक्तवृत्ति
त्वं मित्रातनयत्वादीनां तथासंभवात् स्वरूपसंबंधविशेष एवेत्यर्थ इत्यत आह यद्धर्मवतीति। सद्धेतावितीति वह्निमान्
धूमादित्यत्र महानसत्वादेरपि तादृशत्वात् व्यंजनवत्वादावतिप्रसंग इत्यर्थः। अथेत्यादि अत्रावच्छेदकत्वं व्यापकत्वं तेन
महानसत्वस्य साधनवह्निविशिष्टसाध्यव्यापकत्वान्नातिप्रसंगः। न तु साधनवह्निविशिष्टसाध्यव्यापकधर्मावच्छिन्नसाध्यव्या
पकत्वमपेक्ष्य साधनविशिष्टसाध्यव्यापकत्वमेवोच्यतां लाघवादित्यत आह साध्येति नतु विरुद्धस्थले साध्यसाधनसं

ग्रशि रु १३५ बंधाव्यसिद्धेस्तादृश्यस्यैवोपाध्यावव्याप्तिरित्यत आह विरुद्धेति। ननु लक्षणतावच्छेदकस्य न तत्साधारण्यात् तत्त्वेन गमनेऽव्याप्तिरित्यत आह
लक्षणेति। धूमवान्वह्नेरित्यादौ अयोगोलकीयवह्नेर्न साध्यसामानाधिकरण्यं साध्यसमानाधिकरणवह्नेश्च व्याप्यत्वमे
वेत्यत आह तादृशेति साध्यसमानाधिकरणेत्यर्थः। साधनेति महानसत्वादेश्च न साधनव्यापकत्वमिति मूलपूर्वपक्षनिरासः।
वायुः प्रत्यक्षः प्रत्यक्षस्पर्शाश्रयत्वादित्यत्र उद्भूतरूपवत्त्वसंग्रहार्थं साध्यव्यापकत्वं त्यक्त्वा साधने तूक्तं। अन्यथा बहिर्द्रव्यत्व
स्य साध्यव्यापकत्वाभावात् तत्राव्याप्तिः। विरुद्धेपीति वह्निमान् ह्रदत्वादित्यत्र द्रव्यत्वाद्यस्फूर्त्तावपि ह्रदवह्निमदन्यतरत्वा
दिना साध्यस्यावच्छेदकत्वं संभवत्येवेति। ननु वायुः प्रत्यक्षः प्रमेयत्वादित्यत्र प्रमेयत्वव्यापकधर्मावच्छिन्नसाध्यव्यापक
त्वं नोद्भूतरूपस्य न वा प्रागुक्तसाध्यसाधनसंबंधव्यापकत्वमित्यत आह प्रमेयत्वादिनेति। तत्र च प्रत्यक्षसामग्र्यादेरुपाधि राम
त्वमितिभावः। ननु तस्या ल+ क्षे+ द्वये लक्षणतावच्छेदकं तत्रातिप्रसक्तमेवेत्यत आह लक्षणेति यद्व्यभिचारेणेति तथा चोद्भूतरूप १३५

व्यभिचारस्थले आत्मादौ प्रमेयत्वस्य प्रत्यक्षत्वव्यभिचारित्वमिति न तत्रातिव्याप्तिरिति । जनकत्वेनेत्यादि तद्धेतु ४ कार्यानुकूलाद्विभिन्नातीन्द्रि
यधर्मसमवायीजनकत्वात् इत्यत्रागुरुत्वावच्छिन्नसाध्यव्यापक वह्निलिंगियाप्रत्यक्षत्वे ग्रंथकृतैव शक्तिवादे उद्भावयिष्यमाने तद्विव
क्षोद्धया भावादिति भावः । नन्वागुरुत्वावच्छिन्नसाध्यस्य स्थितिस्थापकस्य सोऽपरालोकादावपि सत्वेनोपाधेर्व्यभिचारः स्थितिस्थापक
स्य स्पर्शवन्मात्रवृत्तित्वमित्यभिप्रायात् तस्य वेनिवह्निलिंगिया प्रत्यक्षत्वस्येत्यर्थः । उक्तरूपेति साध्यसाधनसंबंधव्यापकत्वं साधनव्या
पकीभूतधर्मावच्छिन्नसाध्यव्यापकत्वं चेत्यर्थः । गुरुत्वस्य च कार्यानुकूलत्वं जपनादिकमादाय बोध्यं । ग्रंथविरोधमात्रस्य दूषकत्वा
दाह दूषकत्वेति । दूषकताबीजस्य व्यभिचारोन्नायकस्य जनकत्वं तादृशसाध्यव्यभिचारि गुरुत्वा वह्निलिंगियाप्रत्यक्षत्वव्यभि
चारित्वादित्यादिरूपस्येत्यर्थः । यद्धर्मेति महानसत्वावच्छिन्नवह्निव्यापकस्य धूमजनकत्वादेर्महानसत्वावच्छिन्नधूमव्यापकत्वादि
ति भावः । ननु घटो रूपवान् पृथिवीत्वादित्यत्र तद्घटोत्पत्तिकालीनत्वावच्छिन्नरूपव्यापकस्य तद्घटान्यत्वस्य तद्घटोत्पत्तिकालीनत्वा

अ॰दी॰ वच्छिन्ने पृथिवीत्वव्याप्तिन तद्वृत्तेऽवर्त्तमानस्योपाधित्वं स्यादित्यत आह अवच्छेदकत्वं चेति। तथा च तद्वृत्तोत्पत्तिकालीनत्वसमानाधिकरणरू
१३६ पस्य तद्वृत्ते वर्त्तमानत्वान्न तस्य साध्यव्यापकत्वमिति रूपवान् द्रव्यत्वादित्यादौ तु न तादृशो धर्मो येन साध्यनिष्ठव्याप्यतावच्छेदकं न साध्ये
नन्निष्ठमिति न तत्रातिव्याप्तिः। ननु च कस्मिन्नपि शाकपाकजत्वादावुपाधौ साध्यव्यापकतावच्छेदकधर्मस्य मित्रातनयत्वं मनुष्यत्वादि
रूपस्यानैत्याद्व्यावर्त्तनानन्त्यमित्यस्वरसादाह स्वेति। अत्रापि यद्यपि स्वत्वं नैकं तथाप्येकस्मिन्नेवोपाधौ नानन्त्यमिति भावः। साधना
व्यापकत्वपरित्यागेन लक्षणान्तरमाहेत्यन्ये। स्वं उपाधिः। तदनधिकरणीभूतं यत्साधनाधिकरणं तद्वृत्तिधर्मावच्छिन्नेत्यर्थः। म
हानसत्वं तु न व्यंजनवत्वानधिकरणभूमाधिकरणवृत्तीति न तदादाय दोषः। महानसकृदान्यतरत्वमादाय व्यंजनवत्वेऽतिप्रसं राम
गादाह साधनाधिकरणेति। महानसस्य साधनाधिकरणत्वेऽपि न स्वाधिकरणत्वं यत्स्वाधिकरणं तन्न साधनाधिकरणमिति भावः। रू १३६
पवान्द्रव्यत्वादित्यत्र तत्पृथिवीत्वाभावानधिकरणं साधनाधिकरणं पृथिव्येव तद्वृत्तिधर्मावच्छिन्नरूपस्य न व्यापकतोपाधिः। यद्यपीति

आर्द्रेंधनादिव्याप्यतायां धूमत्वादिकमेवावच्छेदकमित्यार्द्रेन्धनादौ व्याप्तिरित्यत आह तद्धर्मेति। अवच्छेदकधर्मेत्यर्थः। अत्र तमेवेति ननु तद्ध
र्माधिकरणीभूतसाध्याधिकरणनिष्ठान्योन्याभावप्रतियोगितावच्छेदकं यत्किंचिद्भेदो वा तदवच्छिन्नसामान्यभेदो वा। आद्ये व्यंजनवत्त्वा
धिकरणीभूतचत्वरनिष्ठान्योन्याभावप्रतियोगितावच्छेदकघटत्वादिभेदसत्त्वादतिव्याप्तिः। अंत्ये तत्रैवाव्याप्यमिति आर्द्रेंधनादावव्याप्ति
रितिमेवं। यावंति तादृशधर्माधिकरणानि साध्यवंति प्रत्येकं तावन्निष्ठात्यंताभावप्रतियोगितानवच्छेदकत्वस्योक्तत्वादिति। यावत्पद
दानेन चत्वरमहानसान्यतरत्वाधिकरणीभूतमहानसनिष्ठाभावाप्रतियोगित्वेपि व्यंजनवत्त्वे नातिप्रसंगः। ननु घटरूपं प्रत्यक्षं गुणत्वा
दित्यत्रोद्भूतरूपस्य पक्षधर्मावच्छिन्नसाध्यव्यापकत्वादनुपाधित्वेन तत्र त्वदुक्तलक्षणातिप्रसंगः। उद्भूतरूपानधिकरणीभूतसाध्याधिकरण
द्व्यणुकगुणनिष्ठद्व्यणुकजन्यत्वावच्छिन्नसाध्यस्य त्रसरेणुनिष्ठस्य व्यापकत्वादुद्भूतरूपस्येति तस्य लक्ष्यत्वं दृढयति गुणत्वादिनेति। तथा च
पक्षधर्मादीनां उपलक्षणत्वमित्यर्थः। गुणत्वं प्रत्यक्षत्वव्यभिचारि द्व्यणुकजन्ये उद्भूतरूपव्यभिचारित्वादित्यनुमानसंभवात्। अत्र वह्नि ईत्य

अ॰दि॰क॰ स्योपाध्यनधिकरणीभूत साधनाधिकरणावृत्तित्वाभावात् न्यूनतालक्ष्यत्वादिकमनुसंहितमिति बोध्यं। नन्वेवं केवलीभूतो धर्मः किं मर्धमनुसरणी
१३७ यदि स्यात्तत्राह एवं चेति एतल्लक्षणानुसारेण तादृशधर्मज्ञानस्यावश्यकत्वादिति भावः। स्वं उपाधिः एवमग्रेऽपि धूमवान् वह्नेरित्यादौ अयोगोल
कधूमवदन्यतरत्वमादाय तादृशान्यतरस्मिन् आर्द्रेन्धनव्यभिचारित्वादिति क्रमेण नेयं। एवं विशिष्टसाध्य व्यापकेऽपि मित्रातनयत्वा
दिकमपि तथा तदुभयवृत्ति द्रव्यत्वादेरपि सुलभत्वात् तद्वृत्तिव्यभिचारेण व्यभिचारानुमानं न घटत इति मात्रपदान् व्यभिचारेण उपाधिव्यभिचा
रेण हेतुमद्वृत्तित्वविशेषेति विकल्पमभिप्रेत्याह साधनवतीति। अत्र शाकपाकजत्वाभावेन श्यामत्वाभावादौ साध्ये काकादौ व्यभिचार इति स राम
म्यं तत्। नन्वेतस्य लक्षणस्यापि स्वघटितत्वेन तत्साध्यतत्साधनयावदुपाधिसाधारण्यं न घटत इति अत आह साध्येति। इदं च व्यभि १३७
चारनिरूपकाधिकरणस्यैव भंग्यन्तरेणाभिधानं व्यभिचारप्रदर्शने उपाधिर्व्यर्थक इति साध्यसमानाधिकरणमुक्तं अत्र सामाना
धिकरण्यं तदधिकरणानधिकरणत्वं तदनधिकरणाधिकरणत्वेन वह्निमात्र धूमादिव्यादौ तादृशवाच्यत्वाधिकरणीभूत साधन

वन्महानसनिष्ठात्यंताभावप्रतियोगिनि पर्वतस्थवादौ अतिव्याप्तिरिति अधिकरणांन विशेषणं तु व्यंजनवत्वादावतिव्याप्तिवारणार्थं लक्ष
णासमन्वयस्तु धूमवान्वह्नेरित्यादौ धूमाधिकरणानधिकरणीभूतायः पिंडत्वाद्यात्मकवस्तुसाधनवन्निष्ठात्यंताभावप्रतियोगिनमार्द्रेंध
नमादायोहनीयः। साध्यासामानाधिकरण्याप्रवेशे तथा गुर्वभिन्नव्यापकत्वेन व्यभिचारानुमानेन कर्तव्यात् प्रयुक्तमित्यत आह साध्यव्यापकेति।
तथ्याव साध्यव्यापकाभावेन साध्याभावो झटिति स्फुरह:। प्रतियोगितेति पृथिवीद्रव्यत्वादित्यत्र साधनव्यापकस्योपि संयोगस्योपा
धितावारणायेति केचिन्न तु क्तं प्रतियोग्यधिकरणेति। द्रव्यं द्रव्यसत्त्वादित्यत्र गुणकर्मान्यत्वविशिष्टसत्त्वाभावेन रूपेणोपाधित्वलाभा
यप्रतियोगितावच्छेदकेत्यादि। तस्य गुणात्यत्यंताभावप्रतियोगित्वेपि तदभावस्य प्रतियोगिसमानाधिकरणायोग्य। उक्तदत्त्ववारणाया
ह साध्यसमानाधिकरणेति। धूमसमानाधिकरणार्द्रेंधनाद्युपाधित्वसंपादनाय धर्मविशेषणत्वे मूलोक्तपर्यवसितसाध्यव्यापक
त्वाभिधानं किमर्थमित्यत आह पर्यवसितेति। क्वचित्पुस्तके एवं येतिपाठः। उक्तलक्षणं न दीययावतां स्फुरयति न साध्यकेति। नार्द्रेंधन

अ॰ टी॰ क्र
१३८

यापूर्वलक्षणं वरित्यस्य मूलोक्तलक्षणं आविष्कर्तुमाह साध्येति यद्वा धूमवान्वह्नेरित्यादौ आर्द्रेन्धनत्वविशिष्टवाच्यत्वस्योपाधित्वं पूर्वलक्षणाप्र
सक्तं स्यादिति अत आह साध्यव्यापकेति। साध्यव्यापकत्वं साध्यतावच्छेदकावच्छिन्नसाध्यव्यापकत्वं। एवं साधनाव्यापकत्वमपि इत्थं चार्द्र
श धर्मप्रसिद्धेरेव व्यंजनवत्त्वादिनिरासे विशिष्टसाध्यव्यापकेतूपाधौ लक्षणागमनायाह अनतिरिक्तवृत्तीति उपदर्शितार्द्रेन्धनत्व
विशिष्टवाच्यत्ववारणाय तत्तु किंचिदिति। तथा च साध्यसमानाधिकरणं च तादृशं यादृशस्य आर्द्रेन्धनत्वविशिष्टवाच्यत्वत्वं व्यापक
तावच्छेदकमिति। यत्तु किंचिदित्यस्य स्थाने साध्यसमानाधिकरणधर्मव्यापकतावच्छेदकत्वं केवलान्वयितावतावच्छेदकस्यैवेति
तदुपादानमिति। ननु साध्याधिकरणवृत्तितावच्छेदकमेवोच्यतां किमर्थमेतावतानुधावनेनेति वाच्यं। कंबुग्रीवादिमत्त्वेन घटादा राम
वनुपाधितापत्तेः तत्र लाघवेन घटत्वस्यैवाधेयतावच्छेदकत्वात्। एतेन धूमवान्वह्नेरित्यत्र पर्वतत्वज्ञानद्वयोरपि उपाधित्वं परा १३८
स्तं। ननु स श्यामो मित्रातनयत्वादित्यत्र साध्यव्यापकसाधनाव्यापकतावच्छेदकरूपस्य श्यामसामग्रीत्वादेरतिरिक्तवृत्तित्वेव शाक

आ०शा०कृ
१३९

मानुधूमादित्वचमपहाय न सत्त्वविशिष्टत्वस्यानधिकरणीभूतधूमाधिकरणवृत्त्यायादिनिष्ठद्रव्यत्वावच्छिन्नवह्निसमानाधिकरण
त्वान्महानसत्वादेरित्यतिव्याप्तेः। नन्विदं गुरुरूपान्तद्द्रव्यत्वं पृथिवीत्वाभावे ऽतिव्याप्तितत्रापि पृथिवीत्वाभावविशिष्टगुरुत्वानन
धिकरणीरूपाधिकरणीभूततेजोवृत्तिजलतेजोऽन्यतरत्वादिकमादाय लक्षणसमन्वयादित्यत आह तत्रैवेति। अयमर्थः पृथिवीत्वा
भावविशिष्टगुरुत्वानधिकरणं द्विविधं पृथिवीतेजः प्रभृतयश्च तत्र पृथिवीवृत्तिधर्मावच्छिन्नसाध्यव्यापकत्वं स्फुटमेव तेजोवृ
त्तिधर्मावच्छिन्नसाध्यव्यापकत्वं। साधनस्य पूर्वदलप्रविष्टस्य व्यापकत्वेन नातिप्रसंगः। ननु तर्हि रूपवान् द्रव्यत्वादित्यत्रापि यादृश
साधनाधिकरणवृत्तिधर्ममादाय साध्यव्यापकत्वं तादृशाधिकरणे साधनव्यापकत्वमित्यपि विवक्षितत्वात् तदपि वार्यतां इत्यत आ राम
ह विवेचयिष्यत इति। उपरिष्टादिति द्रव्यत्वसाधने तु द्रव्यत्वं पक्षीकृत्य व्यभिचारानुमानं सुघटं। रूपसाधने तु रूपनिष्ठव्यभिचारा १३९
नुमाने यत्र रूपे साध्यव्यभिचारस्तत्र तेजोरूपे नोपाधिव्यभिचारः यत्रोपाधिव्यभिचारः पार्थिवरूपे तत्र न साध्यव्यभिचार इति ध

र्मिविकल्पो वोध्यः। नानासाधनस्थले तत्तत्साधनव्यक्त्यननुगमेन लक्षणस्याननुगमः व्यापकत्वप्रवेशे गौरवं चासहमानो लक्षणांतरमाह
साध्यसमानाधिकरणेति। प्रागेवोक्तं रूपवान् द्रव्यत्वादित्यत्र तत्तस्यैव साधनस्यैक्यात् लक्षणसमन्वयः। इदं गुणरूपादित्यत्र तादृशस्यो
तेजोरूपस्याश्रये तेजसि पृथिवीत्वाभावस्य सत्त्वादेव नातिप्रसंगः। वह्निधूमादित्यादौ प्रसंगसंभावनैव न भंग्या व्यभिचारिसाधन
स्थलेव धूमत्वादिति। व्याप्तिलक्षणप्रागुक्तप्रायेव। किं त्विदं विचार्यते। इदवृत्तिविशिष्टव्याप्तत्वेन वा व्याप्तत्वस्योपाधित्वं दुर्वारमिति। अत्रोप
ने प्राभिव्यक्तिस्तु स्तकेयत्र किंचिद्धर्मवत्त्वेत्यादि पाठस्तत्र प्रतिसत्प्रवादनैव्यः। एवमिति। साध्यसमानाधिकरणधर्मवत्त्वादिने
त्यर्थः। पृथिवीत्वाभावसंग्राहकपक्षमभिप्रेत्याह साधनेति। साध्येति। अयं साध्याभाववान् साध्यसमानाधिकरणधर्मवत्त्वा
त्। आदिपदेन साध्यव्यापकाभावपरिग्रहः साधनपक्षेत्याह तत्सामानाधिकरण्येनेति। तयोः साध्यसमानाधिकरणसाध्य
व्यापकाभावयोरित्यर्थः। अनुमानं च साधनं साध्याभाववद्वृत्ति साध्यासमानाधिकरणस्य साध्यव्यापकाभावस्य चासमाना

अनुमि॰ १४० धिकरणत्वादित्यादि। उपाधिज्ञाने द्दीदृशहेतोरवतारणमिति तदुपष्टंभः। अभ्युपेत्याह उपाधीति। परमार्थस्थले उपाधिज्ञानस्य व्यभिचार
विषयतायां व्यभिचारानुमानं लिंगकांतरमिति भावः। अवृत्तिहेतुसंग्राहायाह साध्याव्याप्यत्वेनेति। अव्याप्यत्वादिसुगमं। न
न्वास्थिति। इदं द्रव्यं सत्वादित्यत्र सत्तद्रव्यत्वाभाववत्संयोगवदन्यत्वादीदृशप्रयोगात् यथा संयोगस्योपाधित्वं तथा अयं द्रव्य
त्वाभाववान् वाच्यत्वादित्यत्र संयोगाभावस्यापि साधनाव्यापकस्य उपाधित्वमिति। तथा च तस्य साध्यसमानाधिकरणायत्
किंचिद्धर्मसामानाधिकरणाभावप्रतियोगित्वेन दुर्बलत्वेऽपि संग्रहात् तत्साधारणलक्षणमाह लक्षणं त्विति वह्निसामग्र्यादा
वतिव्याप्तिवारणाय साधनवतीति। तत्रापि हृदादिकं पक्षीकृत्य साध्याभावोन्नयनसंभवान्ननु द्रव्यत्वाभावोन्नायकसंयो
गवच्छेदस्य प्रतियोगित्वं संयोगे व्याहतमित्यत आह प्रतियोगित्वं वेति। ननु संयोगवच्छेदाभावस्य तादात्म्येन संयोग राम १४०
त्वेनैव सत्त्वात् आह व्युत्पादितं चेति। प्रतियोगितावच्छेदकस्यैवान्योन्याभावाभावत्वमिति प्राचामभ्युपगमादिति भावः॥

शेषमिति तेजोद्भूतत्वादित्यत्र स्पर्शाभावज्ञानाभावादेरुपाधित्ववारणाय साध्यसमानाधिकरणेत्यपि प्रत्येत्यमिति। विशिष्टाभावस्यानति-
रिक्तत्वे विशिष्टाभावत्वेनानुमितिजनने व्यभिचारानुमितेर्निर्वाहेऽप्यस्य परित्युक्तप्राचीनमतमाश्रित्यत्तथैवोपपादयति सामान्यतो
दृष्टमिति। प्राञ्चो हि पर्वतो वह्निमानित्यनुमितेरेव पर्वतीयवह्नित्वप्रकारकत्वं चानुमन्यन्ते उत्तरकाले संशयाभावादिति। भावयति उत्पा-
दयति। उद्भूतरूपस्यानन्यवृत्तित्वेन तद्द्रव्यप्रत्यक्षत्वव्यापकत्वाभावादन्योपाध्यभिप्रायेणानुमानं संगमयन्नाह प्रत्यक्षत्वेति। आदिप-
देन पृथक्त्वपरिग्रहः। उद्भूतरूपादीति। प्रत्यक्षस्पर्शाश्रयत्वं बहिरिन्द्रियप्रत्यक्षत्वव्यभिचारि द्रव्यत्वाव्यभिचारित्वे सति द्रव्यबहिरि-
न्द्रियप्रत्यक्षत्वव्यापकव्यभिचारित्वादित्याकारकमनुमानं बोध्यं। साध्यस्य संकोचादेवानन्तत्वेन व्यभिचारः। उद्भूतरूपत्वाभावहेतोः संको-
चः। अस्मिन्कल्पे तु वायुर्बहिरिन्द्रियप्रत्यक्षो रूपिमूलानुमानं बोध्यं। प्रत्यक्षत्वानुमाने ईदृशव्यभिचारस्याप्रकृतत्वात्। अत एवाह वे-
याह द्रव्येति द्रव्यत्वे प्रत्यक्षस्पर्शाश्रयत्वं प्रत्यक्षत्वव्यभिचारि बहिर्द्रव्यत्वाव्यभिचारित्वे सति वह्निर्द्रव्यप्रत्यक्षत्वव्यापकव्यभिचारि

अ० दि० त्यनुमानं बोध्यं। आद्ये वह्निःपददानादात्मत्वेन व्यभिचारः द्वितीयादाने प्रागिवस्वरूपासिद्ध इति ध्येयं। ननु अस्तिक्कल्पे महत्त्वस्य वह्निर्व
१४१ व्यत्वव्यभिचारित्वेन दृष्टान्तासंगतिरित्यत आह महत्त्वेति। ननु अन्यत्वव्यापकव्यभिचारित्वं यदि यत्किंचित्प्रतियोगिकाभाववद्वृत्ति
त्वं तदा द्रव्यादिनाभावादिकमादायातिप्रसंगः यदि व्यापकत्वावच्छिन्नाभाववत्त्वं तदाऽप्रसिद्धिः केवलान्वयिनामपि तन्मध्ये निवेशादि
त्यत आह व्यापकतेति। रूपावच्छिन्नाभावः तादृशरूपावच्छिन्नप्रतियोगिताकोऽभावः। अथ अन्यत्वदोत्वव्यापकतावच्छेदकरूपावच्छि
न्नाभावादिघटितमेवास्तु किं द्रव्यपदोपादानेनेत्याशंकां निषेधति नवेति। विशिष्टेति व्यापकतायां द्रव्यान्यत्वनिरूपितायां भि
न्नएवावच्छेदकत्वाभावः। प्रविष्टइति व्यभिचारान्तर्निविष्टाभावस्यापि तादृशव्यापकतावच्छेदकरूपावच्छिन्नप्रतियोगिताकत्वेन
विवेशने सखंडाभावत्वाभावात् उक्तरूपवत्त्वाभावस्यैव हेतुत्वसम्प्रक्तेन तथाप्रवेशे गौरवादाह द्रव्यत्वेति सत्यं तस्य रूपत्वा राम
दौ व्यभिचारवारणाफलं तत्क्वेति व्यापकव्यभिचारिणो व्याप्यव्यभिचारावश्यंभाव इत्यर्थः ननु वह्न्यमाता व्यभिचारस्य अत्रोभिति १४१

वशे द्रव्यत्वव्यापकमित्येवार्थोस्तु विद्यमानतथात्वे तन्मात्रस्यैवगमकत्वे शेषवैयर्थ्यमित्यत आह द्रव्यत्वाभावेति। ननु शाकपाकजत्वोपाधेः सा
न व्यापकतायाः संदेहात्संदिग्धोपाधित्वेन मूलकृतावद्यमानत्वात् व्यभिचारानुमाने हेतौ स्वरूपासिद्धिसंदेह इत्यत आहानुमानमि
ति। नन्वित्यस्य प्रागुक्तार्थत्वेति शेषः। साध्यवानिति व्यतिरेके दृष्टान्तमुदासः। एवं अव्यभिचारपदस्य व्यापकत्वार्थत्वे। शेषो विशेष्य
रूपः। धूमप्रागभावेति वृत्तित्वनिष्ठाया व्याप्तेर्व्यापकत्वनिष्ठव्याप्तितो भिन्नतया यन्निष्ठेत्यादिन्यायेन न वैयर्थ्यमिति भावः। व्याप
कत्वं विशेषितं व्यापकत्वेन सामानाधिकरण्येन। नन्वत्यन्ताभावप्रतियोगित्वं तादृशप्रतियोगित्वाभावरूपमतः कथं सामानाधिक
रण्यपर्यवसन्नमित्यत आह फलतइति। तथा च स्वसमानाधिकरणात्यन्ताभावप्रतियोगित्वमित्यस्य सामानाधिकरण्यमात्रा
र्थत्वादिति भावः। ननु श्यामत्वे मित्रातनयत्वसमानाधिकरणो निरुक्तहेतुशालिनि श्यामत्वाव्यभिचारित्वाव्यभिचार इत्यत आह त
थाचेति। यत्तदर्थयोरननुगमान्निष्कृष्य दर्शयति मित्रातनय इति मतान्तरमाह अव्यभिचारश्चेत्यादीति यदिति तथा च यत्समानाधिक

अशिकृ
१४२

रणात्यंताभावाप्रतियोगियस्येति बहुव्रीहिः।यद्वाऽव्यभिचारः व्यापकत्वं मित्रातनयत्वाव्यभिचारित्वे सति इत्यत्र मित्रातनयत्वं अव्यभिचारि
व्यापकं यस्येति बहुव्रीहिः।मित्रातनयत्वव्याप्यत्वं नु फलितं इदं च श्याममत्वादिवारकं। दृष्टांतासिद्धिवारणायाह यद्वेति। इदं गुण
वद्घटत्वादित्यत्र घटत्वं कंबुग्रीवादिमत्वाभावाव्यभिचारित्वे सति कंबुग्रीवादिमत्वाभाववद्वृत्तिगुणवद्व्यापककपालासमवेत
द्रव्यत्वव्यभिचारित्वात् गुणवत्वव्यभिचारीत्यत्र तस्य न दृष्टांतता। अवच्छेदधर्माव्यभिचारित्वस्य व्याप्यत्वात्मकस्य त्यागात् फलितं
मसाह प्रमेयत्वादावपीति। वायुः प्रत्यक्षः प्रमेयत्वादित्यत्रोद्भूतरूपोपाधौ मेयत्वस्य वह्निद्रव्यत्वव्याप्यत्वाभावेपि बहिर्द्रव्ये उ
द्भूतरूपव्यभिचारित्वादिति हेतुरविकल एवेति भावः। पूर्ववदिति इदं तेजोद्रव्यत्वादित्यादौ स्पर्शाभावादेर्वारणादिति भावः। ननु राम
साधने साध्यव्यभिचारो व्यापकत्वेनैव साधनव्यभिचारित्वस्योपाधेर्लाभात् किमर्थं तद्विशेषणमत आह व्यभिचार इति बहुव्री १४२
हिरिति साधनं व्यभिचारि यस्येत्यर्थः येन पृथिवीत्वव्यापकस्वरूपवत्वस्य व्युदासः एवमपि बहुव्रीह्याश्रयणेपि। उक्तेति इर्

पूर्वत्र साधने व्यभिचारानुमापकत्वं न वाधि व्यभिचारस्य इह तु उपाधिव्यभिचारस्य यत्र कुत्रचित् साध्यव्यभिचारानुमापकत्वं इत्येवेति
साधननिष्ठस्य व्यभिचारित्वव्यापकसाध्यव्यभिचारित्वं पूर्वत्र। अत्र च साध्यव्यभिचारव्याप्यसाधननिष्ठस्य व्यभिचारित्वमित्युभे
मित्याकुः। इत्थं चेति। इदं करकाजैर्यादित्यत्र व्यभिचारानुमाने व्यापकताकोटिनिविष्टस्य स्नेहस्य वारणायेति योजना। ननु प्रमेयत्वा
स्नेहव्यापकत्वस्य केवलान्वयित्वात्कथं कात्वे व्यभिचारः। ननु येन रूपेण व्यापकं तेन रूपेणैव तद्व्यभिचारत्वं अस्ति हि मेयत्वेन करकात्व
वव्य हि तत्व भिजिवार्थं यन्न दर्थ घोरननुगमादित्युदाहरणांतरमाह घटेनवेति। हि तोजन्यपदं अपृष्टो व्यभिचारवारणाय इत्यपदं व घट
पादो व्यभिचारवारणाय अत्र द्रव्यत्वं साधनव्यापकमिति नोपाधिरिति भावः। साधनव्यभिचारीतीति। अत्रापि वकुप्री हि। पूर्व
ह्वोध्यं। अव्यभिचारि साध्यासमानाधिकरणस्योपाधित्वं न कस्यापि संभवतीति भावः। इत्थं च व्याप्यकोटिनिविष्टविशेषणां [illegible]
त्वा द्युतिव्याभिचारवारणाय। एवं चेति। गुरुरूपादित्यत्र पृथिवीरूपे व्यभिचारानुमाने बाधात् पृथिवीत्वाभावस्य नोपाधित्वमिति [illegible]

अशिक

१४३

जलभिन्नेइति जलरूपादौ व्यभिचारवारणाय पृथिवीरूपव्यभिचारवारणाय विशेष्यं। ननु तेजःसरूपमेव पक्षोऽस्त्वित्यत आह गुणाभावेति।
यान्वयहेतुनिष्ठं व्यभिचारित्वमनुमेयं तन्निष्ठव्यभिचारप्रतियोगिन एवोपाधित्वं नोक्तेरनुमन्यत इति भावः। यत्राधिकरणइति यत्राधि-
करणावच्छेदेनेत्यर्थः। तत्रेति तदवच्छेदेनेत्यर्थः। तेन पृथिव्यवच्छेदेन रूपाव्यापकस्य पृथिवीत्वाभावस्य तेजोऽवच्छेदेन व्यभिचारेऽपि
यकत्वेऽपि निरासः। नन्वेवं द्रव्यत्वहेतावपि न तु पाधितांगीकर्तृणामनेन तत्राव्याप्तिरित्यत आह यथेति। द्रव्यत्वसत्ताजलत्वेत्यादि
दर्शितप्रकारेण व्यभिचारानुमानं द्रष्टव्यं। यत्साधनेति तत्र द्रव्यत्वस्य हेतुरूपस्याभेदादिहेतुरूपपरूपस्य हेतोर्भेदादिति भावः।
अर्थान्तरमिति मूलमनुपपन्नवेदं। ननु सोपाधौ व्यभिचारादेः सत्वान्मूलं विरुद्धमतः प्रयतिना तदानीमिति। वस्तुतः उपाधेः [illegible]
पत्वाभावादाह व्यभिचारस्य[illegible]देरिति। तं व्यभिचारादिकं। न साधकस्य व्यभिचारसाधकस्य। अप्राप्तकालत्वं तदानीमनाकां-
ताभिधानत्वं परंपरेति उक्तक्रमेणानेयं। अन्यथा अप्राप्तकालत्वानंगीकारेण तथात्वं अप्राप्तकालत्वं। नन्वेति तथाच [illegible]

कपरं परायानिग्रहस्थानत्वं न वा उपाध्युद्भावनेऽप्राप्तकालत्वमिति भावः। तथा त्वायोगान्न निग्रहस्थानत्वायोगात्। विभाजकेति। प्रतिज्ञा
हानिः प्रतिज्ञांतरं प्रतिज्ञाविरोधः प्रतिज्ञासंन्यासो हेत्वंतरं अर्थांतरं निरर्थकं अपार्थकं अप्राप्तकालत्वं न्यूनं अधिकं पुनरुक्तं अननुभाष
णं अप्रतिभा विक्षेपः मतानुज्ञा पर्यनुयोज्योपेक्षणं निरनुयोज्यानुयोगः अपसिद्धांतः हेत्वाभासाश्च निग्रहस्थानानीति विभाजकसूत्रं न च तां
त्रिके अंतरमसूत्रस्य चकारस्यानुक्तसमुच्चयपरत्वव्याख्यानात् तेन विरोधः। विभाजकसूत्रस्यैव निग्रहस्थानाभिधायकतया तच्चकार
स्यैव तथात्वौचित्यात्। न च परसूत्रस्य के हेत्वाभासादूष्याकांक्षायाः प्रवर्तत्वादिति। अत एव दृष्टांताभासादीनां विभाजकसूत्रेऽपरिग्रहद्
ति सारं। तदुभयं व्यभिचारोन्नायकं आश्रयासिद्ध्युन्नायकं च। तथात्वापातात् निग्रहस्थानत्वापत्तेः। तदुद्भावकं विशिष्टसाध्यव्यापे
कोपाधिस्थलेत्याह विशेषतोति। स्फुटत्वार्थमाह विशिष्टसाध्यस्येति। एतत्कल्पमभिप्रेत्याह अत्रेति। स्वमतेत्याह वद्यन्तेयो
ति। ननु पक्षेतरत्वस्य साध्यव्यापकत्वनिश्चयः किं देववशात्संपन्नः किं वा तर्कादिना तत्राद्यं मभिप्रेत्य मूलं संगमयति तत्र पाधित्वाविति।

अ॰शि॰कृ अन्योन्यूनताभंगायाह अनुकूलेति निश्चितोपाधि॰ निश्चितोपाधिकार्यकारीत्यर्थः। यथाश्रुतस्य निश्चितोपाधित्वप्रसक्तस्य विरुद्ध
१४४ त्वादिति भाव॰। तद्धि स्वव्याघातकत्वं हि तदभावादिति धूमादौ वह्निकारणताग्रहदशायां पक्षेतरो पाधित्वाभावादित्यर्थः। तथा च ना
नुमानमात्रोच्छेद इति। अनुकूलतर्केति। आर्द्रेंधनस्य धूमजनकत्वधीदशायां तथात्वं नेत्यर्थ॰। अत एवेति स्वव्याघातकत्वं स्वस्यो
पाधित्वव्याघातकत्वं यद्वर्णयंति तन्मतमपि उक्तयुक्तेनेत्यर्थः। वदंतीति निर्युक्तिकतयाऽपेक्षास्त्वकं त्यद्यपीत्यनंतरं पर्वतावयववृत्त
न्यत्वादिकमिति शेषः। अन्ये तु मूलं तु त्यार्थकमिति प्रत्ययेनानुकूलतर्काभावेन पक्षेतरत्वं तुल्यमित्यर्थकतया योजयंति। इदं
न्यवच्छेदमात्रव्यावर्त्तकत्वं। अतः पदार्थस्य पूर्वमनुक्तत्वात् तथैव व्याचष्टे अत एवेति। अथेति स्यात्तं अगोणकारणत्वं संयोगस्य प्रत्या राम
सत्तिरिति भावः। जन्यत्वस्य प्रत्यासत्तित्वे वक्ष्यमाणासत्त्वदिन्वेत्यादिग्रंथविरोध इति। न हीति प्रमेयवह्नित्वस्यापि धूमव्यापकताव १४५
च्छेदकत्वमप्यत एव संगच्छत इति। नन्वार्द्रेंधनप्रभववह्न्यभावापेक्षया लाघवादार्द्रेंधनाभाव एव लघुः तथा च व्यभिचारोपित्त

द्धिरिति एवं गमको न भविष्यतीत्यत आह तदवच्छिन्नेति। अभ्युपेत्य तथैव कारणत्वं व्यवस्थापयति सत्यपि चेति। अत्रेति। अत्रैव धू
मकारणतानामित्यर्थः। ननु धूमं वह्नित्वेन कारणतात्रापि इदानीं तु आर्द्रेन्धनप्रभववह्नित्वेन कल्पनीयेति भिन्नैव कारणता आया
ति अवच्छेदकभेदात् कारणताया अपि भिन्नत्वात् तथा च विनिगमकाभावादित्यत आह एकस्यामिति। ननु आर्द्रेन्धनजन्यवह्नित्वे
न कारणत्वे वह्निजनकार्द्रेन्धनत्वेनापि कारणत्वं स्यात् तथा च विनिगमनाविरहात् तेन तेनैव हेतुत्वं जन्यत्वप्रत्यासत्त्या वोक्ता
ति प्रसंगभंग इत्यत आह महतीति। इदमपि पाकजन्नेव स्फुटमस्य धूमजनकतावच्छेदको जातिविशेष एवेति ध्येयं। फलन्त इति
उभयथैव व्यापकत्वमस्या दत्तमेवेति भावः। तत्त्वमिति उद्भूतरूपस्य तत्त्वेन द्रव्यस्य द्रव्यत्वेन समवायसम्बन्धप्रत्यासत्त्येत्यपि द्रष्ट
उद्भूतरूपवत्त्वेनैव कारणत्वात् न च विनिगमनाविरह इति वाच्यं तु उद्भूतरूपवत्त्वेनैव कारणत्वं द्रव्यत्वस्याधिकस्य प्रवेशात्। प्र
तियोगि ध्वंसद्वैविध्यं तदापि प्रागभावोऽनष्ट इति प्रत्ययात्। नचि तदा इति ध्वंसप्रति जन्यत्वेन कारणत्वे तत्र भावत्वविशेषणे ल
ति १

अ॰शिकृ धीयानिति भावः। ननु उद्भूतरूपस्य कारणतावच्छेदकत्वपक्षे यथा अनन्मूलमसंगतं पक्षे शाकपाकजत्वेनापि न कारणत्वं दुत्तरेत्वा
२८५ ह कार्यकारणेति। निराकृतमेवेति तद्धि नसर्वा साधारणमित्यादिना। न च्योतित्वावच्छिन्नं शंकाधायकत्वं केनवारणीयमत आह तद
हिनेति। पक्षेतरोपाधित्वशंकाहिनेत्यर्थः। निरूपाधीति प्रागरूपवत्पार्थिवत्वादित्यादीनामित्यर्थः। तदाधाने शंकाधाने। प्रयोज
नेनेति कानुमानं। द्वितीयकल्पमभिप्रेत्याह व्यभिचारेति। ननु आमाशिकं गौरवं न विप्रतीत्यत आह मानेति। अन्यथा पक्षेतर
त्वस्यानुपाधित्वे त्वन्नो योगादेरानादिजनकतावच्छेदकजातित्वेगादं शरतः कि कुसाधनादाह करेति। पक्षतावच्छेदकाव
च्छेदेनासिद्धौ तस्यादोषत्वादाह सर्वेति। अन्यथेति। तत्पक्षीय संयोगधर्मस्त्वाद्विन्नत्र्यातीन्द्रियसंयोगधर्मः असंयोगधर्म
श्च तत्रांत्यस्य बाधादाद्यमादायैव पर्यवसानमिति। अत एव जातिरिति व्यभिचाराभावात्पक्षेतरस्य वोपाधिरिति भावः। इतरे राम
बाधिति पदर्शितानुमानानामिति भावः। अत्रेति शत्वनुमान इत्यर्थः। पक्षेति साधनाव्यापकत्वार्थ। सपक्षेति साध्य २८५

व्यापकत्वार्थं व्यतिरेकपर्वतो वह्निमान् धूमादित्यादौ यावद्व्यानुकूलतर्कावतारस्तावन्महानसत्वं भवत्येवोपाधिः। नन्वीश्वराद्यनुमा
ने तथा कार्यकारणभावादितर्काभावादप्रयोजकत्वं स्यादित्यत आह दृष्टश्चेति। तथा च तत्रागम एवानुकूलतर्कः। यत्र तु न किम
पि तत्राप्रयोजकत्वमिष्टमिति भावः। उपलक्षणात्वं व्यवस्थापयति उपजीव्येति। असंभवादिति अनुकूलतर्काभावस्य नित्यत्वा
दिति। अकिंचित्करत्वे इति उपजीव्यत्वाभावेन तद्धेतोरित्यादिव्याख्यानवैयर्थ्यमिति भावः। विशेषतस्त्विति प्रमीयमानयोगपद्या
भावादित्यर्थः। स्वरूपसत्कारणतायां तु कदाचिद्व्यापकेन व्याप्यमन्यथासिद्धं भवितुमर्हतीति भावः। ज्ञाप्यज्ञापकभावं दू
षयति एकमिति। संभवादिति अनुकूलतर्कास्फूर्तिदशायां तूपाधि अयुक्तव्यभिचारस्य हेतोः सिद्धं तस्य दूषकत्वमिति साधनस्य
सोपाधित्वकथनमप्रकृतं अर्थवशात्संपन्नं चेति साधनस्येति स्वार्थे कथयन् दूषणप्रकारमाह यद्वेति। नन्विदं पूर्वमेवोक्तमि
त्यत आह तत्रापेति। साध्यव्यापकत्वनिर्गर्भलक्षणानुक्तावतत्वं धा[illegible] व्यवस्थापनमसंगतमित्यत आह पुरस्चेति। इदं च यथे

अशि कृ
१४६

तिग्रंथानुरोधात् अयोगोलक इति ग्रंथानुरोधाद्द्वितीयं कल्पमभिप्रेत्याह कश्चिदिति। ननु ऽवतारयति कार्यं मूलानुपयुक्तत्वं तु

क्तं तन्नुन्नोद्भूतं इत्यत आह साधनवत्त्वेनेति। द्रव्यत्वस्येति। द्रव्यपदं तु बहिर्द्रव्यपरमिति हृदयं। आद्यशङ्कस्य प्रयोजनं अत एवे

त्यादिना स्वयमेव दर्शयिष्यति। अत एवेति गगनं प्रत्यक्षं स्पर्शादित्यादौ गगनं तदुभयसंबंधाभाववत् उद्भूतरूपाभावादित्य

त्र साधनीभावमादाय विसंभवान्नाद्य प्रकार इति। द्वितीये तु कश्चित्स्पर्शवत्तिथा संभवादुभयत्राह गमेयत्वेनेति। आत्माद्यो

द्भूतरूपाभावस्य रूपादौ व्यभिचारेणानादृशसंबंधाभावासाधकत्वमिति। आत्मद्वयोरेव बहिर्द्रव्यत्वविशिष्टोद्भूतरूपाभा

वेन साध्याभाव एव संमुखता: साधीय इति ध्येयं। संबंधं तस्य विवरणं विशिष्टमिति व्यर्थ इति अत्र साधनानुप्रवेशस्यानुप

युक्तत्वादिति। नन्वयमप्येक: सत्प्रतिपक्ष प्रकारोऽखण्डाभाव इति न वैयर्थ्यमत आह जलमिति। आत्रगंधाभावेन संबंधा

भाववत्वं द्रव्यत्वसत्वेनत्व न सत्प्रतिपक्षत्वमिति भाव:। एवमग्रेपि। साध्येति प्रकारके त्यनंतरं पदेतिशेष:। तेन वह्निमान्

राम
१४६

धूमादित्यादौ नातिव्याप्तिः। साध्यादिकं च तदवच्छेदकावच्छिन्नं बोध्यं। तेन पर्वतेयत् किंचिद्वह्न्यभावो व्यापके महानसत्वादौ नाति
प्रसंगः। व्यापकत्वं च व्यापकव्यतिरेकप्रतियोगित्वं तादृशत्वमाभावे विकल्प्य हेतुमत्तु तौचगतिरित्यनास्थाँवदंत्यपि व्याप्तिस्थिता। मे
यादिसाध्यके मेयादिहेतुके वा सत्त्वात् पक्षस्यासिद्धेर्वा व्यापके साध्यसाधनभिन्नभिन्नत्वमप्रसिद्धमित्युपेक्ष्य प्रकारांतरमाह
साध्येति। तथा च तत्राव्याप्तिरेव तादृशः सुलभः। यत्र भिन्नेति वह्निमान् तद्रूपादित्यादौ तादात्म्येन वह्निमत्त्वसाध्यत्वे तादात्म्येन हे
त्वभावसाधकव्यतिरेकप्रतियोगिनि तद्रूपत्वे समवायेन साध्याभावसाधकव्यतिरेकप्रतियोगिनि तदवयवत्वे नातिव्याप्ति
रित्यर्थः। अन्यत्रापि येति सुगमं। तदभावो व्यापकत्वमित्यत्र यस्य तादृशः संबंधस्तथा प्रसिद्धस्तदवच्छिन्नप्रतियोगिताको
पक्रम इत्यत आह किंचेति। तदसंभवादिति। तथा च जलं गंधवदित्याद्युपदर्शितस्थले पृथिवीत्वादावव्याप्तिरिति भावः।
महानसीयवह्नित्यादित्यादिपदेन महानसीयधूमवत्त्वावच्छिन्नाभावो पि द्रष्टव्यः। यद्वेति अत्रापि पूर्वोक्तप्रकारेणान्या

अ॰शि॰ न्यत्वं न संभवतीति तद्धेतुविशेषणं अभेन्ते साधनवत्त्वप्रकारकत्रमविषयज्ञानादौ साध्याभावसाधके वह्निसामग्र्यादौ साध्याभावसाध
१४१ के वह्निसामग्र्यादौ प्रसिद्धानुमाने व्याप्तिव्यावारणार्थं द्वयोरिति सत्प्रतिपक्षपक्षे साधनाधिकरणानुगमस्य व्यभिचार
पक्षेष ह्यानुगमस्य नैयत्यर्थमित्यर्थः। आहृत्तितादृशप्रमाया अप्रसिद्धेरिति भावः। लाघवादाह पक्षतावच्छेदकसाधनेये
ति। प्रतीतीति अ आदि प्रतीतिपदं प्रमापरं। अन्यथा साधनतावच्छेदकप्रकारकत्रमविषयाश्रयज्ञानादौ वह्निव्यावर्त्त
के तत्सामग्र्यादौ प्रसिद्धानुमाने व्याप्तिव्याप्तेरिति ध्येयं। ननु यत्र्वित्यादिकल्पे प्रमाविशेष्यत्वं किमिति नोक्तं किन्तु मिति रेतद्
भयमात्रावगाहिप्रमायाः संदेहे हृदीकरीयतादृशप्रमायाः साधनतदभावोऽप्रसिद्ध एव ज्ञानयोस्तत्स्यानुयोगितया नाप्र राम
सिद्धिः। न च तथापि तत्त्वव्याप्तिः किमिति नोक्तमिति वाच्यं तस्याः स्फुटत्वात् उक्तत्वाच्च अपि तु द्वौ ध्वंसौ जलेत्यादि जलं वह्निमत १४१
धूमादिरित्यत्र संयोगेन हेतोराश्रये वह्निव्यावर्त्तकत्वं पक्षतावच्छेदकजलत्वस्य संयोगेनाहृत्तेरिति भावः। एतदेव विवद

यत्तिपक्षेनेति पटइति अत्र पक्षे साध्योपाध्योः सत्त्वेन नसत्प्रतिपक्षोन्नायकत्वं अत्र पक्षतावच्छेदकसंबंधेन हेतोराश्रयासिद्धिःव
ह्निमदिति सत्प्रतिपक्षवारणाय तच्छायाव्याप्यत्वमिति सूचितं अत्र पक्षतावच्छेदकपर्याप्तत्वीयसमवायेन हेतोरधिकरणेव ह्न्य
भावसाधकत्वमस्त्येव वह्निसामग्र्यादितिभावः। अत एवानुक्तातिव्याप्तेरेव असिद्धिसंगमनायापाद्यं विवृणोति आपाद्य
स्येति ननु मूलोक्तदोषः स्वमतेपीत्यत आह अस्माकमिति। ननु व्यभिचारोद्भावकत्वस्य ज्ञानं न प्रतिबंधकमित्यत आह तदुन्न
यनेति नन्वित्यस्यापि सामान्यलक्षणेनावेनापि अर्थांतरं तदवस्थमेव तथापीतरव्यावृत्तिरूपपक्षेतेति हृदयं पूर्वोक्तापाद्या
प्रसिद्धिमुद्धरति यथा कालेनेति वह्निनेति दृष्टांतार्थं नन्वेतद्व्यवहारोपयिकमेव वक्तव्यमित्यत आह व्यवहारेति पर्यवसितेत्या
दिः एवं यथा विवह्निनेति सार्वभौममतमाह व्यवहारोपयिकेति व्यतिरेकिधर्मत्वेन ज्ञानेपि व्यवहाराभावात् तदुपेक्षितमिति
ध्येयं लक्षणांत्विति साध्यसमानाधिकरणस्येव किंचिद्वह्निसाध्यव्यापकत्वमिति गुरुतया तदुपेक्षितमिति ननु वह्निमान्धू

मादित्यत्र व्यंजनवत्वेऽतिप्रसंग इत्यत आह वस्तुतस्त्विति। वस्तुगत्या व्यभिचारिणा इत्यर्थः। ननेत्यादि रूपवत्त्व इत्यत्वादित्यत्र पृथिवीत्वा
भावः संग्राह्य एव अत आह नेत्विति हेतुभूतरूपस्य नानात्वेन व्यभिचारानुमाने पक्षत्वं न घटत इति अनुपाधौ तस्मिन्नुपाधित्वम
नेन प्रत्याख्यातमिति न व्याप्यत्वात् पृथिवीत्वाभावव्याप्यत्वादित्यर्थः तथा च न तदीयसाधनाव्यापकत्वं। तदव्याप्येति पृथिवीत्वा
भावाव्याप्यस्यर्थः। तथा च व्यभिचारिणा एव साधनस्य प्रविष्टतया तदादाय लक्षणागमनात्। ननु तयोः सामान्यविशेषयोः
कस्यापि न दूषकतोपयिकत्वं आद्ये व्यभिचारोन्नायकस्यैव तथात्वेन सत्प्रतिपक्षोन्नायकस्य दूषकत्वात् द्वितीयेपि साध्यसा
मानाधिकरणपक्षात्मस्यापि मत्वादेवेति अत आह दूषकतोपयिकं त्विति यथासंभवमिति शुद्धस्थले साध्यव्यापकत्वे सति सा
धनाव्यापकत्वं अवच्छिन्नस्थले तु तद्धर्मावच्छिन्नसाध्यव्यापकत्वं तद्धर्मावच्छिन्नसाधनाव्यापकत्वमिति साध्यतावच्छेदके
त्यस्य फलमाह न तत्तद्गुणत्वेति रूपत्वादिनेत्यर्थः साधनतावच्छेदकेत्यस्य फलमाह गुणत्वेनेति तथा चेति इत्थमेव वक्रि

त्वेन महानसीयवह्नेर्हेतुत्वे धूमे सोपाधित्वमिति ननु तत्र एव दोषाद्व्यभिचारित्वेन साधनं विशेषणीयमत आह व्यभिचारित्वेनेति उपा-
धिशरीरभानस्य हेतुनिष्ठव्यभिचारादिविषयत्वसहिष्णुतयामित्यादिना दूषकतायां सत्प्रतिपक्षोत्थापकत्वेन दूषकतायां तु
न व्यभिचारोन्नयनस्योपयोगित्वेऽपि न क्षतिः। ननु मा भूत् सत्प्रतिपक्षोन्नायकत्वेन दूषकत्वमत आह अव्याप्तिकरत्वाद्वेति तथाच
करकाष्ठाधिगीत्यादौ साधनव्यापकस्य सत्प्रतिपक्षोन्नायकस्योपाधित्वान्यथानुपपत्त्या सत्प्रतिपक्षोन्नायकत्वेनैव तस्य दोष-
त्वाभ्युपगमेन तद्धाने व्याप्तिरिति भावः। ननु धूमवान्वह्नेरित्यादौ अयोगोलकावृत्तित्वेन साध्यस्याप्युपाधित्वं इति अन्यथा व्याप्य-
ष्टे साध्यत्वेति ननु तदर्शितलक्षणानां तत्र सत्त्वेन तस्योपाधित्वमावश्यकमिति निषेधोऽनुपपन्न इति अत आह परं प्रतीतिसा-
ध्याविशिष्टत्वस्य दूषकत्वं समर्थयति पक्षेति साधनस्य व्यभिचारानुमितिसाधनस्य तस्यानुमानस्य संदिग्धोपाधित्वेना-
पीति तथा च पूर्वं निश्चितोपाधित्वं व्याख्यातमिति भावः। ननु यत्रानुकूलतर्कावतारस्तत्रैवानुमानोच्छेदो न भविष्यतीत्यत

आशिक
१४९

आह हेत्वाविति व्याप्तेति साधनाव्यापकत्वेन संदिग्धोपाधेर्दुर्नरिदं बोध्यं। अन्यत्र व्याप्तेरेव संशय इति ध्येयं। न च ग्रहे साहचर्यग्रहे स्म
रणादिति तथा च व्याप्यसंशयस्य न कोटिस्मृत्युपक्षीणत्वेनेति भावः। तस्यापि व्याप्यसंशयस्यापि ननु व्याप्यसंशयाभावेपि कोटिस्मृतेर
संसर्गाग्रहादेव संशयो जायते न त्वाधिकापेक्षापि तत्र इत्यत आह अत एवेति तस्य कारणत्वादेवेत्यर्थः। समानानामित्यादिसूत्रं
इति समानानेकधर्मोपपत्तेर्विप्रतिपत्तेरुपलब्ध्यनुपलब्ध्यव्यवस्थातश्च विशेषापेक्षो विमर्शः संशय इति ननु व्याप्यसंश
यस्य स्वातंत्र्येण हेतुत्वे मानाभावः। न वा तत्त्ववेत्याद्युपष्टंभः यत्कोटिसहचरितभूयोधर्मवत्त्वं भूयः सहचरितताद्दशभूयोधर्मवत्त्वं
भूयः सहचरितत्वं कोटिधर्मवत्त्वं वा कोट्युत्कटत्वनियामकमिति तु कृत्वा तथा च सूत्रं यथाश्रुतमेवेत्यत आह कोटिद्वयसहच राम
रितेति तत्तत्कोटिसहचरितेत्यर्थः यथाश्रुते कस्यापि द्वयसहचरितत्वमित्यसंगतेः। सत्त्वेति पदस्थल इति दूर्वमते तु तस्यापि १४९
साधारणधर्मत्वमिति भावः अनुयायिन इतिमिलनास्कृतैर्विपिव्याप्यसंशयस्य हेतुत्वादिति विमतिरत्र बोध्या। साध्यव्यापकस्य

व्यभिचारसंदेहात् व्याप्यसंदेहात्मकात् संदेहे त्विति साध्यव्यापकत्वसंदेहे साध्यव्यापकव्यभिचारित्वसंदेहस्य विशिष्टवैशिष्ट्यबोधा-
त्मकतया तदभावकूटत्वर्थः। न तु सामान्यतः साध्यव्यापकव्यभिचारे प्रसिद्धिः व्यापकस्य केवलान्वयित्वेऽपि प्रविष्टत्वेन सामान्याभा-
वाभावात्। साधने त्विति साधनाव्यापकव्याप्यत्वमन्ततः स्वस्मिन्नेव प्रसिद्धं। उभयसंशयस्थले तु मनसा कथं विद्युपवन्हि इति
भावः। मतान्तरमाह तत्पाधेरिति वदन्तीति पूर्वोक्तयुक्त्या विशिष्टवैशिष्ट्यात्मकस्यैव व्याप्यव्याप्यत्वाभावावगाहिनो ज्ञानस्य व्या-
पकसंशयहेतुत्वव्यवस्थापनात् तदनिर्वाह एवास्वरसः। ननु मूलेऽर्थान्तरमित्ययुक्तं तस्य पुरुषदोषत्वात् स्वार्थानुमानेऽसंभ-
वाच्चेत्यत आह एकांशेति समूहालंबनानुमितौ कार्य्यायां श्यामत्वव्याप्तशाकपाकजत्वस्य त्यादि क्रमेणेत्यर्थः। ननु द्वितीयः सक-
र्दिकाकार्यत्वादित्यत्र सद्धेतौ मूले कथं तूपाधिकृत इत्यत आह वस्तुत इति तत्त्वाग्रहः सद्धेतुत्वाग्रहः तदर्थं तत्र ज्ञानार्थं। तदुद्भा-
वनं तथाच ज्ञानार्थमेवोद्भावनं ज्ञानं चाप्रतिबंधकतयाऽफलमित्यर्थः। तदर्थं प्रतिबंधकार्थमित्यन्ये अनैकान्तिकत्वेतिश्र

अनिरु
१५०

यमभिसंधिः। प्राचीनमते अज्ञानरूपासिद्धेः प्रयोजकमप्युद्भाव्यं तथा च प्रकृते मदीयव्याप्यनिश्चये प्रयोजकोऽनैकान्तिकत्वसंदेह
एवेत्यभिप्रायेण वादी तदुद्भावयतीत्युक्तिनन्नु अज्ञानप्रयोजकस्य तदुद्भाव्यत्वेऽतिप्रसंग इत्यत आह जिज्ञासेति कुतोऽनैकान्तिकत्वसं
शय इति परेण जिज्ञासिते अनेन हेतुनेति ज्ञापिते परस्यापि संशयो भवतीति भावः। ननु संदिग्धोपाधेरपि निश्चयदशायां सत्प्रति
पक्षोन्नायकत्वमद्वारतमेवदूषकतासंगत्या व्यावृत्तोपाधित्वस्येति किंचित्साध्यव्यापकतासंशयस्थले एवं साधनाव्यापकतासंश
यस्थलेत्याह कचिद्व्रेति। तथा च मूले तद्व्यतिरेकस्येत्यनन्तरं क्वचिदित्यादिपक्षधर्मत्वेनेत्यंतो भागः पूरणीय इति न मूले न्यूनता
पद्यस्यैवेति तथा च तादृशे साध्याभाववत्तया निश्चितत्वेन साध्याभावादनुमितौ तस्य सपक्षत्वादित्यर्थः। तत्र हेसाध्यव्यापकता राम
ग्रहे व्यतिरेकि तथेति असाधारणो हि प्राचीनमतेऽन्वयव्याप्तिग्रहे दूषकतावीजं व्यतिरेकव्याप्तिमतेयाव प्रकृते तु पयोगेन १५०
तदग्रहेन क्षतिरिति भावः। ननु सत्प्रतिपक्षोन्नायकतयैव असाधारणस्य दूषकत्वमते किं स्यादित्यत आह सत्प्रतिपक्षयेति

तथा च उपाध्यभावेन साध्याभावसाधनेऽसत्प्रतिपक्षेऽसाधारण्ये नास्ति पुनः सत्प्रतिपक्षान्तरं कारणीयं तच्च पूर्वोक्तयुक्त्या न संभवतीत्या
शयः। केचित्तु मूलमित्थं योजयन्ति बाधावतारेऽनुकूलत्वावतारे वा पक्षेतरस्य न सत्प्रतिपक्षोन्नायकत्वं कुत इत्यत आह व्यतिरेकद्र
त्ति व्यतिरेके साधनीयेऽसाधारणात् असाम्यादधिकत्वादिति यावत् बाधादिना तस्याधिक्येन सत्प्रतिपक्षा।ऽसाम्यादिति तद्ग्रहद
शायां उपाधिग्रहदशायां तदभाव उपाध्यभावहेतुनेन पक्षेतर हेतौ सोपाधेः पक्षेतरवृत्तित्वाग्रहकाले सत्प्रतिपक्षोन्नयनसामर्थ्येऽपि तद
ग्रहदशायां पक्षधर्मताभावात् न सत्प्रतिपक्षोन्नायकत्वमिति भावः। नापीत्यादिद्वयस्य पौनरुक्त्यं परिहरन्नाह व्याप्तिविरहे
ति। ननु यावत्साध्यव्यापकमात्रत्वादिरूपानौपाधिकत्वज्ञानं व्याप्तिज्ञानहेतुत्वे प्रसक्तं तत्परत्वे प्रकृतासंगतिर्मूले न हि त्यो
दिना उपाधिज्ञानस्यैव प्रतिबंधकत्वनिरसनादित्यतो व्याचष्टेऽनौपाधिकत्वेति। ननु उपाधिज्ञानाभावरूपकारणस्य वि
घटकत्वं नोपाधेरित्यत आह कारणाभावेति ननु तथापि कारणाभावात्मकत्वं तज्ज्ञानस्यैव न तूपाधेरित्यत आह नाहृशे

अ॰शि॰कृ
१५१

ति। अन्यमतमुपन्यस्यति अनौपाधिकत्वेति तथा च यावत्साध्यव्यापकव्यापकत्वादिरूपमेवानौपाधिकत्वं तत्कारणतानिर्वाहकं च तु न की
दृतेत्यादिन्यायेनउपाधिज्ञानप्रतिबंधकत्वं तदेव मूलप्रकृतारवंडितमिति प्रघट्टकार्थः। पौनरुक्त्यपरिहाराय व्याप्यत्वासिद्धिरिति मूलस्या
वष्टे व्याप्यत्वेति ननु ज्ञानरूपासिद्धेर्हेत्वाभासत्वाभावात्तदंतर्भाव इत्यसंगतमित्यत आह तद्द्वारेति भिन्नधर्मिकत्वेन त्वन्यस्येत्या
दिनोक्तं न तत्साध्यव्याप्यत्वादेस्तात्पुरुषपरत्वेनुपाधेः साधनाव्यापकत्वालाभात् ज्ञकतासंगतिरित्यत आह उभयत्रेवेति ननुद्भावि
खंडनेनोपाधिरदूषक एव किं न स्यादित्यतोन्यूनतां परिहरन्नाह तस्मादिति नित्यहिंसादिष्वोपाधेर्दूषकत्वमेव न भविष्यतीत्यत आ
ह निश्चयेति। अत एवाग्रे तस्मादिति मूलस्याप्युपसंहारः स्वघट इति भावः॥ मूलीयं पौनरुक्त्यं परिहरन्नाह पुनरग्रह इति तत्रानुमे
यमिति दर्शनादिति भावः। ननु व्यभिचारिहेतोरपि किंचिद्विशेषणताविशिष्टतादृतावच्छेदकत्वात् केयं तद्विरहोऽनुमीयतामत राम
आह साधनतावच्छेदक इति तन्नचेतस्वनिरूपकावच्छेदकत्वघटितत्वेन गुरुत्वतया हेतुतया तदभावसाधनमफलमित्यत आह सा १५१

ष्य वदन्यो निनन्निन्त्यादि स्वत्वस्यैकस्या ... सकलवह्निसमानाधिकरणात्यन्ताभावप्रतियोगि धूमकत्वादि स्वाश्रयप्रसिद्धेरन्ये
वा व्याप्यतावच्छेदकत्वेन व्याप्तिनाव्यभिचारानुमानं विफलमित्यर्थः । ननु केवलान्वयिनि प्रमेयत्वादिसाध्यकव्यभिचारित्वे नानु
मानुमहमप्रसिद्धेरित्यत आह साधनाव्यापकेति । व्यापनायां केवलान्वयिनि साधने साधनाभाववद्वृत्तित्वमुपाधित्वमप्रसिद्धमित्यतो
न यत्साधनाभाववद्वृत्तिव्यभिचारि मूलं संगमयन्नाह व्यतिरेकेऽपीति व्यभिचारेऽपीति एवं नो धूमवान् वह्नेरिति स्थापनायां वह्नौ धूमव्यभि
चारस्फूर्त्तौ धूमव्यभिचारि रूपयोगोलकत्वेऽभाववद्वृत्तित्वस्याभावात् यत्साध्यव्यापकत्वं तन्नैवेत्युक्तलार्थः उपाधिमा
त्रेत्यादि मूलस्य दोषं विवेचयन्नाह वस्तुतस्त्विति अयमभिप्रायः धूमवान् वह्नेरित्यत्रार्द्रेन्धनस्यानुकूलतर्कादिना व्यापक
त्वेऽवधृते वह्निर्धूमव्यभिचारी आर्द्रेन्धनव्यभिचारित्वात् इत्यनुमाने यदि नाभाववद्वृत्तित्वमुपाधिः स्यात्तदा धूमार्द्रेन्ध
नयोरविशिष्टव्यापकभावो व्याहतः स्यादित्यार्द्रेन्धनव्यभिचारित्वस्य साध्यव्यभिचारव्याप्यत्वे ध्रुवेव न्यायेव साधनाभा

अधि॰ कृ
१५२

ववृत्तित्वं साध्यव्यापकमिति तथा च नोपाधिमात्रोच्छेद इति। ननु साध्याभाववद्वृत्तित्वरूपव्यभिचारस्य गगनादावभावेन अवृत्ती-
त्वादिकल्पिकानसंभवनीत्यत आह अव्याप्यत्वेति तथा च वह्निधूमव्याप्य आर्द्रेन्धनव्यभिचारित्वादित्यत्र गगने साधनाभा-
ववृत्तित्वं साध्यव्यापकमिति भावः। नैवदोष इति सामानाधिकरण्याभावेन विशिष्टाभावरूपस्य साधनाव्याप्यत्वस्य तत्रा-
विसत्त्वादिति भावः। यथाश्रुतेति रूपवत्संयोगादित्यत्र संयोगो रूपव्यभिचारी स्पर्शव्यभिचारित्वादित्यत्र संयोगाभावव-
द्वृत्तित्वस्य तूपाधेः संयोगादावपि संयोगाभाववद्वृत्तित्वसत्त्वेन साधनव्यापकत्वं यथाश्रुतमित्यर्थः। प्रतियोगिव्यधिक-
रणेति तेषां न तादृशाभाववद्वृत्तित्वमिति संयोगानधिकरणसंयोगाभाववद्वृत्तित्वमित्यत्र संयोगाभाववत्त्वे व्यर्थ- राम
दावत्साधनवदिति। एवं चेति व्यभिचारज्ञानाधायकत्वेन तूपाधेर्दूषकत्वव्यवस्थापनेनेत्यर्थः। परस्परेति तदभावव्या- १५२
प्यज्ञानस्यानुमितौ साक्षात्प्रतिबंधकत्वमिति भावः। संदिग्धोपाधेः प्रयोजनं दर्शयति उपाधीति अभ्युपेत्याह व्यभि-

याराद्वीति हेतुमाह स्वरसत इति। तथात्वप्रसंगः सत्प्रतिपक्षत्वप्रसंगः। अत्रवेति यत्र हेतुसाध्ययोः साध्योपाध्योश्च तुल्य एव व्याप्ति
ग्रहस्तत्र सत्प्रतिपक्षोन्नायकत्वं यत्र च साध्योपाध्योरनुकूलतर्कादिना आधिक्यं तत्रोपाधिभावसाध्याभावयोर्व्याप्तिस्फूर्त्तौ बा
धोन्नायकत्वं यत्र च तादृशवृत्तित्वयोर्व्याप्तिस्फूर्त्तिस्तत्र व्यभिचारोन्नायकत्वं एवमपि दूष्यत्वं तस्य सत्प्रतिपक्षोन्नयनस्य दूषकमिति
व्यभिचारानुमाने तु व्यतिरेकस्य साधारण्योपवर्णनं नोपयुज्यत इति भावः। यत्र यदित्यादेः प्रयोजनं विवृणोति एवं चेति। अत्र
स्येत्यादीति सामानाधिकरण्येनानुमितौ पक्षतावच्छेदकावच्छेदेनैवाभावज्ञानस्य प्रतिबंधकत्वादिति इदं तु पक्षाव्यापक
विपर्यय इत्यस्य व्याख्यानं विरोधादिति। एकदेशाभावज्ञानस्यापि तद्वच्छिन्नानुमितिप्रतिबंधकत्वादिति भावः। अ
प्रसिद्धसाध्यविपर्यय इत्यस्य विवरणमाह साध्यविपर्यय इति। संभवादिति अप्रसिद्धसाध्यव्यतिरेकिणि अज्ञानस्यापि
साध्याभावस्य विशेष्यतयाऽनुमातुमर्हत्वादिति भावः। पूर्वसाधनव्यतिरेक इत्यस्य विवरणमाह पूर्वसाधनेति तदवच्छिन्नतयाइति

अ॰शि॰कृ अतिप्रसंगादित्यनेनान्वितं पर्वतो धूमवान्वह्नेरित्यत्र पर्वतो धूमाभाववान् आर्द्रेन्धनाभावादित्यत्र प्रतिस्थापनायां वह्न्यभावस्योपा
१५३ धित्वविरोध इत्यर्थः। इदं तु वस्तुगतिमनुरुध्योक्तं ज्ञानगतिमादायाह परं त्विति न तु स्थापनाया यत्राभावात्तं तत्र शुद्धे प्रतिपक्षे पू
र्वसाधनव्यतिरेकस्यानुपाधित्वेन सत्प्रतिपक्षं संभवतीत्यत आह आभासत्वेपीति विशेषाग्रह इति विशेषाग्रहे तु सत्प्रतिपक्षप
वनस्यादिति भावः। न त्वेन साध्यव्यापकत्वेन अत इति न हि सत्प्रतिपक्षोच्छेदकत्वेनैव तदुपन्यासानर्हत्वमिति भावः। यथेति इ
दं सकर्तृकं कादाचित्कत्वादित्यत्र कादाचित्कत्वव्याप्यमनित्यत्वं न व्यतिरेकं वैनित्यत्वमित्यर्थः। अनुमितिलक्षणं अनुमितिस्व
रूपं। अनुकूलत्वं प्रयोजकत्वं तच्च स्वज्ञानद्वारा अतो व्याप्तिपक्षधर्मतयोरनुमित्यजनकत्वेपि न क्षतिः। असमानाप्रकारनिर्णय राम
स्यापि भिन्नप्रकारकसंशयनिवर्तकत्वं प्राचां मते ज्ञानपदं घटो वाय इति निर्णयनिवर्त्यो वायत्वं घटवृत्ति न वेति संदेह इत्यनु १५३
सारेणाह यत्रेति नाद्य इति निर्णयानिवर्त्यत्वविवक्षाया अप्रयोजनमाह तेनेत्यादि अननुगम इत्यर्थः तेन संबंधविवक्षायास्तदाह संबं

धान्तरेयोत्तिनरासंबंधान्तरीयसंदेहस्य निरासीतसंबंधनिवर्त्यत्वाभावादेव नातिप्रसंग इति वाच्यं तत्र संबंधगोचरनिर्णयनिवर्त्ये लो
मादायसंबंधान्तरेण पक्षोत्वप्रसंगइत्यभिप्रायादिति भावः साध्यधर्मत्वमिति मूलस्यत्रुटेच्छायाः प्रयोजनमाह नवेति आकाश
समवायित्वस्याप्रसिद्धत्वे विपक्षासमवेतत्वं साध्ये आकाशे संदिग्धं तद्व्याप्ति यदुक्तं तेनत्राह तमः प्रभृति छिद्रेति तथाच तत्समवेतत्वम
प्रसिद्धमिति भावः॥ ननु साध्याभावस्य बाधतया केवलान्वयिन्यप्रसिद्धिरित्यत आह केवलान्वयिनीति ननु पुनरनुमित्सोत्प
त्तौ दृष्टसाधनताज्ञानाद्यपेक्षया तावत्कालं परामर्श एव नावतिष्ठते इत्यत आह तत्त इति पुनः परामर्शान्तरकल्पनागौरवादा
हस्मरणात्मकादिति नवपरामर्शस्य पूर्वोत्पत्त्यादिच्छाकालेऽनुमितेरेवोत्पत्तिरिच्छासामग्र्याबलवत्त्वात् प्रत्यक्षद्वाराकर्तृमते
नानुमित्साकारणकारणाभावादेव कार्याभावात् पूर्वं सिद्धत्वमभिप्रेत्येदमित्यपि केचित् अत्र ज्ञानानुमतः स्वनिष्ठेनेत्यत्र इवशब्द
स्तस्याभगवदिच्छायास्तज्ज्ञानकत्वं अनुमितिजनकत्वं ननु ज्ञानकत्वे स्वरूपयोग्यता वा फलोपधानं वा यावत्सहकारिस

आशि कृ मवधानं वा आद्यं दूषयति तद्धीति अनपायादिति योग्यताया याव द्वस्तु स्थायि त्वा१ त्वादिति भावः। द्वितीये आह नेति तदुपधानं अनुमित्सुपधानं
१५४ अनुमितेरिति अनुमित्सुपहितस्यानुमितिपूर्वकत्वाभावादित्यर्थः तृतीयं दूषयति नतत्सामग्रीति ननु कारणमात्रस्य पक्षता कुतो
नि द्वेषे किमपि इष्टं न तावत्तेषामकारणत्वं तेषां स्वतंत्रान्वयव्यतिरेकशालित्वादित्यत आह शेषेति सामग्रीसहितेच्छायाः कारणत्वे इ
च्छाभागस्य वैयर्थ्यादिति। ननु ऽऽ सामग्रीपदेन केवलकारणस्तोम एव वक्तव्य इत्यत आह तदानीमिति तदानीमनुमित्सूपधानकाले
सिद्ध्यभावस्य कारणत्वमनंगीकुर्वतस्तदानीं यथोक्तकारणसत्त्वेऽनुमित्यापत्तेस्तदभावे च सिद्ध्यभावस्य कारणत्वं वक्तव्यमितिभा राम
वः। परामर्शसिद्धिसिषाधयिषाविरहस्यैव विशेषणसार्थक्यमित्यभिप्रायेणाह यत्रेत्यादि सिषाधयिषामात्रस्य स्मरणाभा
वाद्यादिपर्यवसानसंभवादनुमित्सापर्यंतं आवश्यकसिद्धेः सिषाधयिषाविरहविशिष्टत्वेऽपि अनुमितिपूर्वं तस्यापव विशिष्टा १५४
भावं द्योतयितुं परिवर्जयति अनुमिनोतीति नन्वनुमित्सानंतरं दृष्टास्मरणं विना दग्रस्तमित्साप्रत्यक्षसामग्र्या अनुभवसामग्री

त्वेन बलवत्वात्तत्ताथितादृशस्मरणानंतरमनुमितिच्छानत्वादिस्मृत्यनुव्यवसायसामग्या विवादसंभवादाह अनुमित्सेति आत्मत्वसाध्या
दिवहिरिंद्रियप्रत्यक्षसामग्या बलवत्वात्मनोयोग्यत्वेन समूहालंबनमेव तत्रत्यसिद्धिमितिध्येयं। ज्ञानगोचरेच्छाया एवसिषाधयिषा
त्वेऽतिप्रसंगंद्दूत्यत आह सिषाधयिषेति तत्साध्येति अनुक्तस्साध्यतावच्छेदकावच्छिन्नसाध्येत्यर्थः तेन तेजःसाध्यकपर्वतपक्षकानुमि
तिजायतामितिच्छायामविशिष्टत्वेन वह्न्यनुमितिः तत्पक्षोऽपि पक्षतावच्छेदकावच्छिन्नो वाच्यः तेन पाषाणमये वह्न्यनुमितिर्जा
यतामितीच्छायामाकाशादिना दोषः। अनुमितित्वप्रकारकत्वं विहाय अनुमितिविषयत्वं न दुक्तं तत्प्रयोजनमाह अनुमितित्वेति नत्व
यत्र पर्वते वह्निप्रत्यक्षं परामर्शश्च समूहालंबनं तत्र वह्निविषयकप्रत्यक्षमित्यनुरोधाजायतामितीच्छायां सत्यां अनुमितिः स्या
त्तादृशेच्छाया अपि सिद्धिकधर्माकांतत्वादित्यत आह यादृशेति अत्रेदं बोध्यं। पर्वतो वह्निव्याप्यधूमवानिति परामर्शे पर्वते
वह्निप्रत्यक्षे च विद्यमाने यत्किंचिदनुमितिर्जायतामितीच्छायामव्यवहितपरामर्शाभावेऽनुमितिः स्यादेव एवं वह्न्यनुमितिः कुत्रा

पि जायतां पर्वते यत्र । किंचिदनुमितिर्जायतां वन्ह्यंशे [illegible] त्वनुमितेरंशानं [illegible] अस्याभित्यादौ कार्यांशादि सामग्र्यसमवधाने व्यनुमितिदर्शनात्
विशिष्टैव पक्षताया हेतुत्वं निर्वाह्यमिति । अननुगमेति अनुमितित्वस्य ज्ञानत्वाद्यन्यज्ञानत्वादिनाननुगमादित्यर्थः । अलस्या
नवीति । सिद्धिसत्वे तस्या एव प्रतिबंधकत्वं [illegible] असंकीर्णत्वमस्तीति भावः । तदन्येति परामृश्यमानान्येनार्थः अत्र च मात्रपदमु
भयलिंगके टीकायां अनुकूलत्वेन तद्व्यापारसाधारण्येऽतिव्याप्तिः स्यादत एव प्रतिबंधकत्वमित्यर्थः । उत्तेजकत्वमपि तस्याः सर्वथैव नास्ती
ति हृदयं । तल्लिंगकेति तल्लिंगकानुमितित्वप्रकारके इत्यर्थः अन्यथा प्रकारांतरेण तदन्यलिंगकानुमितित्वेन वा तल्लिंगकानु
मितौ टीकायां अप्युत्तेजकत्वापत्तेरित्यर्थः । लिंगोपहासोऽन्याहृ [illegible] अनुमितिर्जायतामितीच्छायां अप्यसंग्रहापत्तेरित्यत आह तद
न्येति । तथा च विशिष्टाभावस्तत्र वर्त्तत इति भावः । मात्रपदं हृदावधूमालोकाभ्यामनुमितिर्जायतामितीच्छायां संग्रहाय अत्रा राम
पि तदन्यमात्रलिंगकानुमितित्वप्रकारकेच्छा नेदोषः [illegible] अन्यथा वन्ह्यनुमिति [illegible]र्जायतामितीच्छायां अनुमितिमात्रविषयत्वेन १५५

तदन्यलिंगकानुमितिगोचरत्वादसंग्रहापत्तेः। अमेणापरामृश्यमान लिंगकानुमितित्वप्रकारेणापरामृश्यमानलिंगकानुमितिगोचरे
च्छायाश्च अत्र यद्यपि तत्लिंगकानुमितीच्छायाः प्रयोजकत्वेनाननुगमः नवा सामान्येच्छावत्त्यागः। तथापि सार्वभौमपदात्प्रद
र्शितधूमादौ विशेषानुमित्यनुमित्सा ध्येयं व्याख्यातस्य तत्तत्प्रयोजकत्वेनेत्यादिः। लिंगेति तथा च पक्षतानुमित्योः कार्यकारणभावे
ऽपि लिंगविशेषो विशेषणीय इति भावः। पक्षतायां लिंगविशेषनियंत्रितत्वमपि विघटयति तल्लिंगकेति सिद्धाभावसत्वे तादृशे
च्छासत्वे चानुमितिरुत्पादाद्दाहस्सिद्धकालीनेति धूमलिंगकानुमितीच्छासत्वे सिद्धिकालीन तदन्यलिंगकानुमित्साया अप्र
तिबंधकत्वाद्दाहतल्लिंगकानुमितीच्छाविरहविशिष्टेति अत्र यद्यपि पूर्वकल्पे लिंगविशेषनियंत्रितानुमितित्वेन कार्यत्वं
निरुक्तलिंगविशेषनियंत्रितपक्षत्वेन हेतुत्वं अत्र च सामान्यतः पक्षतात्वेन हेतुत्वं तादृशानुमितित्वेन कार्यत्वं तल्लिंगका
नुमितित्वेन कार्यत्वं तादृशेच्छाभाववत्त्वेन कारणत्वमिति क्रमेणायं कल्पो गुरुरेव न च तत्र पक्षतायां तादृशेच्छान्यत्वप्रवेशे

अ॰शि॰ नगौरवमिति वाच्यं अत्रापि पुनः सिद्ध्यादिप्रवेशने गौरवे वैपरीत्यादिति तथाप्यनुगतनानाविधेच्छायामुत्तेजिकायामीदृशेच्छान्य
१५६ त्वस्य विशेषणेऽतिगौरवादियं पक्षश्चरमत्र कद्दृति। पक्षान्यस्य लिंगाविशेषणमियंत्रितत्वं व्यवहारविरुद्धमित्यपि कश्चित्तत्पाजा
रामयेति। अत्र साध्यतावच्छेदकपक्षतावच्छेदकसंबंधा अपि निवेशनीयाः। अन्यत्र पर्वतान्तरे तद्देति पर्वतत्वप्रकारेण तत्पर्व
तीयवह्न्यनुमितौ तत्पर्वतीयत्वादृशसिद्धेरप्रतिबंधकत्वापत्तेः। नान्यथेति। अनुमितेरनुमत्यधिकृत्याभावेन प्रवेशनीयमि
तिभावः। इत्थं चेति सामानाधिकरण्येनानुमित्यनंतरं तदवच्छेदेन सिषाधयिषया पुनः सामानाधिकरण्येनानुमित्यदर्श
नात् सामानाधिकरण्यानुमितिं प्रति सामानाधिकरण्येन सिषाधयिषाविरहविशिष्टसिद्ध्यभावस्यैव पक्षत्वं वाच्यमेवं त
दवच्छिन्नानुमितिं प्रति तदवच्छिन्नसिषाधयिषाविरहविशिष्टसिद्ध्यभावस्यैव पक्षत्वमिति अनुमितिविशेषनियंत्रितं प राम
क्षत्वं यद्धानुमितिसामान्यं प्रति अवच्छेदकावच्छिन्नसिद्धिरेव प्रतिबंधिका उत्तेजिकान्तसामान्यानुमितीच्छा इदं च पक्षत्वं १५६

नानुमितिमेदृघटितं सामानाधिकरण्येनानुमितिं प्रति सामानाधिकरण्येन सिद्धेः इत्थमेव प्रतिबंधकत्वं एवं सामानाधिक-
रण्येनानुमितिं प्रति सामानाधिकरण्येन सिद्धिकालीनसामानाधिकरण्येन सिषाधयिषाविरहविशिष्टायास्तदवच्छिन्नसिषाध-
यिषायाः इत्थमेव प्रतिबंधकत्वं एवं तदवच्छिन्नानुमितिं प्रत्यपि तदवच्छिन्नसिद्धिकालीनतदवच्छिन्नसिषाधयिषाविरह-
विशिष्टायाः समानाधिकरणसिषाधयिषायाः इत्थमेव प्रतिबंधकत्वमित्याखंडलार्थः। प्रामाणिकत्वदूषितं यासत्वं सि-
षाधयिषायां बोध्यं। प्राचां मतमनुरुध्याह एकैवेति स्वमते तु पक्षविशेष्यकत्वमेव नियतं अत एव तत्र घटानुमितेश्चा हेतु-
तोपनीतमानत्वं पूर्वपक्षयंति अन्यथा अनुमितेः साध्यविशेष्यकत्वे च हेतौ सन्निकृष्टविशेष्यकज्ञानाजनकत्वात् साध्य-
सिद्धौ सत्यां साध्यविशेषणकैवानुमितिर्जायते साध्यसिद्ध्यभावे तु साध्यविशेष्यिकैवा तत एव ज्ञाने प्रामाण्याभावइत्यभा-
वविशेष्यिकानुमितिरिति मतेनाह तादृशेति साध्यविशेषणकेत्यर्थः सिद्धिपदस्य पक्षसाध्यवैशिष्ट्यावगाहिज्ञानप्रसि-

अप्रेरु
१५७

तया पत्र विषयत्वपर्यन्तं खंडयति साध्यप्रसिद्धेरेवेति खंडनप्रयोजनमुद्घाटयति अत एवेति तथाच भावसाध्यकस्थलेसर्वेषां यत्तए
वपक्षविशेष्यकानुमितिर्व्यतिरेके व्याप्तिज्ञानेः प्रतियोगिज्ञानार्थं साध्यज्ञानस्यापेक्षणीयत्वेन तद्विशिष्टज्ञानसामग्रीसत्वात्
इति भावः। सिद्धिसत्व इति अनुमितिव्यतिरिक्तसिद्धिसत्व इत्यर्थः। अनुमितिसत्वे अनुमित्या एवानुदयादित्यर्थः। योग्यत्वेति तथाचानुमित्सा
पदेनो[illegible]ग्यत्वोपलक्षितोपलक्षणं तस्या एवोत्तेजकत्वमिति भावः सा चेति स्वं सिषाधयिषा अनुमित्सा याद्वितीया त्वगोपलक्षणत्वमित्यर्थमाह तस्य
त्तीतिदं दियादिनेति अनुमित्यादिनिरीते तत्पूर्वानुमित्सायाः स्वविषयफलोपहितत्वेनानुत्तेजकत्वात् इदं दियादिपर्यंतं न त्वीदृशकालस्य कथमु
त्तेजकत्वं अत आह फलबलेति। ननु तत्सामग्र्यव नानाप्रकारः कालः कस्यचिद्झटिति घटकपदार्थानां विशिष्टस्मृतेः कस्यचित्तत्र त्वेकं स्मृतिस्तदपिक राम ५७
स्यचिद्विलंबेन कस्यचित्क्षीघ्रेण इत्यत आह अथवेति सिद्ध्योपपत्तमाह यदि चेति नन्वयं कालः कियत[illegible]क्षणघटित इत्यत आह विशेषेति
दर्शितन्यायेनेति सिषाधयिषाप्राक्कालीनविशेषणज्ञानेन सिषाधयिषाकालीनसन्निकर्षेण चयत्र प्रत्यक्षमिति भावः। तादृशांशत्यक्तोविवा

दयस्तस्तमत आह स्मरणादेरिति। अनुमित्सामादायाह यत्रेति वह्निमान् वह्निव्याप्यवान् नाहशो वह्निव्याप्यस्तथा च वह्निव्याप्यव्याप्यवान् पर्वतः पर्वतप
क्षे वह्निवह्निव्याप्यानुमितीच्छा साधने इत्येकं स्मरणादृत्यर्थः अत्रानुमित्साकाले वह्न्यनुमितेर्वारणाय वह्निमत्त्वपर्यन्तं। यद्यपीच्छासामग्र्या बलवत्त्वेनै
व तत्काले तथापि समाप्तिसौकर्यादुक्तं। तत्रैव वह्न्यनुमितेरेव वह्निव्याप्यानुमित्या त्सकतया परामर्शत्वेन पूर्वपरामर्शनाशेऽपि न क्षतिरिति भावः। अनु
मितित्वेनानुमित्यव्यवहितपराक्कालेऽपि न क्षतिः। पक्षेति पक्षतागामेतत् निरुक्तेच्छामादाय विबोध्यं। गौरवादिति तादृशासिद्धेश्च सिषाध
यिषाविरहमात्रविशिष्टत्वेन विशिष्टाभावोऽपि नाधिकः। यद्विना तादृशासिद्धेः सिषाधयिषाविशिष्टत्वेन कदाचित्परामर्शाद्यभावेऽपि नानु
मितिः तदा तदभावस्याधिकस्यापि गौरवमेव बाधकमिति भावः। एवं यत्र सिद्धिकाले नियतमेव परामर्शाभावस्तत्र सिद्ध्यभावोऽपि न कारण
मिति बोध्यं। ईदृशेऽपीति ईश्वरसिषाधयिषाविरहविशिष्टत्वमेवान्यासां व्यधिकरणसिद्धीनां इति तन्निवेशेऽपि दुष्कर इत्यत आह आ
यास इति। न व्यासक्तः अनुमितिमात्रे एव सिद्ध्यभावः कारणं नत्वोपदर्शितपरामर्शाभावस्थले सिद्ध्यभावस्य कारणत्वं व्यर्थमिति वाच्यं। यो

अक्षपदा गिनामेव परामर्शविशिष्टपक्षमात्रसिद्धिसत्त्वे नानुमित्यापत्तेर्दुर्वारत्वादित्याहुः। सार्वभौममतमाह यत्त्विति एतन्मते सिषाधयिषानाशद्वा
५८ राम्येवानन्तरं। द्वित्रिक्षणोपि अनुमितिस्वीकारः। अत एव तत्र भिन्नेत्यस्य प्रतियोगिप्रसिद्धिः। इदं चात्र बोध्यं। यावत्सिद्धीनां क्षणव्यवहितोत्तर
वर्त्यनुमितिप्राक्कालेन सिषाधयिषासमवधानं तदन्यसिद्धय एव पक्षताप्रतियोगिन्यः न तु टनंचोक्तक्रमेणैव सिसंसिद्धिः। भंग्यापद
व्याप्तिमाह अथेति तृतीयलक्षणस्य अवधायकद्वितिसमासः तथा च तृतीयादिक्षणो नाम वसितत्वशंकान्तेनैव अवधानादिति भावः
यत्रेति सिद्ध्युत्पत्तिक्षणात्मकसिषाधयिषाविरहविशिष्ट एव अध्यवहितक्षणाव्यवहितोत्तरक्षणोत्पत्तिकानुमितिकमित्रापि सासि
द्धिरिति भावः। द्वितीयलक्षणादूतितथा च लक्षणः स्थितिलक्षणोपि तत्र सिषाधयिषाविरहविशिष्टत्वेन तत्सिद्धेरभावो वर्तत एवेति राम
भावः। स्वलक्षणस्येति सिद्धिलक्षणस्येत्यर्थः। यत्र क्रमेणेत्यादि सिषाधयिषाज्ञानयोः क्रमस्य स्वरसासिद्धत्वेपि परामर्शसिद्ध्योः क्रम ५८
लाभार्थं क्रमेणेति अत एव सिषाधयिषामादाय पूर्वपक्ष्यभावो निरसितः सिषाधयिषापदमनुमित्सापरं अत एवाग्रे ऽनुमित्युत्पादः।

अत्पत्तीति अनुमितिभिन्नत्वस्फोरकमेतत्, अस्याऽपि सिद्धेः स्वद्वारा व्यवहितोत्तरक्षणोत्पत्तिकानुमितिकभिन्नत्वात्, अनुमित्यव्यवहितपूर्व
परामर्शसमयस्य च सिषाधयिषाविरहविशिष्टत्वात् पक्षताभंग इति विशेषणोपादानमिति। दत्तेव हि शेषणे तु तदुत्पत्तिक्षणस्य सिषाधयि
षाविशिष्टत्वात्। सिषाधयिषाविरहविशिष्टस्य तु स्वोत्पत्तिद्वारास्यव्यवहितोत्तरक्षणोऽनुमितिसत्त्वेऽपि विशिष्टाभावः सुलभ इति पक्षता
संपत्तिरित्यर्थः। अयं च विशिष्टाभावो यत्र सिषाधयिषाविरहकाले उत्पन्नाऽसिद्धिस्तदनन्तरमपि न सिषाधयिषानुमितिर्वा तत्रातीव व्या
प्तौ तीति ध्येयं। यत्रानुमितेरित्यादि तु इदं च सिषाधयिषानाशकालेऽपि सिद्धित्वेऽनुमितिरनुमपकीत्यस्य मते योग्यत्वमेव तत्त्वं तु पाध्यायमते
तु अनुमित्सामादायैवेति बोध्यं। आत्पत्तीकीति इदमपि अनुमितिभिन्नत्वस्फोरणार्थं अनुमितिरूपत्वेऽनुमित्सायाः फलोपहितत्वादि
ति अथ परामर्शानुमितीति इति तथा च सिद्धेः परामर्श[illegible] व्यवधानेन स्वद्वारा व्यवहितोत्तरक्षणोत्पत्तिकानुमितिकभिन्नत्वेऽपि ति
अनुमित्सानाशेत्यनेन तत्द्वारा स्वसिषाधयिषाविरहविशिष्टत्वं बोधितं अनुमितिप्राक्कालेव सिषाधयिषाविरहः स्फुट एवेति

आह्निक १५९ घरमवि शिष्टं तेनादिन संग्रहः तृतीयस्यापीति द्वितीयस्यापीत्यस्य क्षणत्वेन तदव्यवहितोत्तरत्वं तृतीयस्येत्यर्थः। तत्र वाव्यवहितत्व नि
रुक्तौ स्वाधिकरणक्षणध्वंसेद्व्यत्र स्वाधिकरणक्षणध्वंसत्वेन विशिष्टोपादेयम् अन्यथा तृतीयक्षणस्याधिकरणक्षणध्वंसाधि
करण द्वितीयनिरुक्तौ क्षणध्वंसानधिकरणत्वस्याभावात्। तथा च स्वीय द्वितीयक्षणध्वंसाधिकरणक्षणध्वंसाधिकरणत्वे सति
स्वीयक्षणध्वंसाधिकरणत्वं इत्यत्र द्वितीयादि प्रविष्टत्वेन गौरवादाह स्वध्वंसेति। अत्र च क्षणत्वस्यानतिप्रयोजनतया कालेत्युक्तौ
न च्छाद्वत्तिरिक्त क्षणावत्त्वोध्यास्वं लिध्यादिकं तद्ध्वंसाधिकरणकालः तृतीयक्षणः तद्ध्वंसानधिकरणत्वे सतीत्यर्थः तेन चतुर्थादिक्ष
णव्युदासः प्रथमक्षणावधिक पूर्वकालगोष्ठीवारणाय स्वाधिकरणेति। तत्राधिस्वाधिकरणेत्यनेन पूर्वगोष्ठीवारणेऽपि स्वोत्पत्ति राम
क्षणवारणाय ध्वंसपर्यन्तानुधावनं। ननु तत्र क्षणस्य किमर्थं प्रकृते वारणमिति वाच्यं स्वजक्षणाव्यवहितत्वस्य उत्पत्तिस्थिति ५९
क्षण एव पर्यवसन्नतया तत्राव्यानुमित्युत्पत्त्या तत्र क्षणस्य किमर्थं सिद्धेस्तद्भिन्नत्वात् तदनंतरमनुमित्येनापत्तेरिति न तु सिषा

धयिषाविरहविशेषणद्वयस्य पूर्वोक्तव्यावृत्तिद्वयेन संगच्छते उक्तक्रमेण तादृशसिद्ध्याः स्वज्ञानाव्यवहितोत्तरक्षणोत्पत्तिकानुमिति
कत्वेनाविरोधित्वात्सहजनएव प्रज्ञातासंपत्तिरित्यत आह तथात्वेति क्रमेणोक्तेनेन तस्याः सिद्धेरनुकूलत्वं सूचितं तथात्व सिद्ध्युत्पत्तिकाले
पक्षताभावाद्द्वितीयक्षणे नानुमितिः तदुत्तरक्षणस्येति प्रथमक्षणस्य विशेषणेपि तत्सिद्धेरनुकूलकोटिनिवेशो वारणादिति विशेषणाभि
तिइत्थं यद्यपि तत्सिद्धेः स्वज्ञानाव्यवहितोत्तरक्षणोत्पत्तिकत्वरूपविशेष्यसत्त्वेपि तदुत्तरक्षणस्य सिषाधयिषाविरहविशिष्टत्वाभावाद्विशि
ष्टाभावतयाऽप्रतिबंधककोटौ निवेश इति तदुत्पत्तिक्षणेन पक्षतेति द्वितीयं विशिनष्टि उपदर्शितप्रकारेण सिद्धेः प्रतिबंधकत्वेऽनुमित्यव्य
वहितपूर्वं तस्या एव विशिष्टाभावसंपादनाय द्वितीयमित्यर्थः। अन्यत्रइच्छाघटितसामग्र्या एव प्रतिबंधकत्वमिष्टमिति इच्छासामग्र्याः
प्रतिबंधकत्वस्य सम्मुग्धतां दर्शयति यदि पुनरिति। अव्यवहितोत्तरत्वस्य द्वितीयतृतीयसाधारणतया स्वजन्यज्ञानाव्यवहितोत्तरत्वे
त्यादेर्गौरवेणानिर्गलितार्थमाह अनुमित्यव्यवहितेति। अनुमित्यव्यवहितपूर्वत्वं च अनुमित्युत्पत्तिकालोत्पत्तिकध्वंसप्रतियोगिकालवृ

प०शि०
१६०

ति त्वं मात्रपदेन सिषाधयिषाविरहविशिष्टत्वादिव्युदासः। विध्यभावस्य पक्षतात्वं व्यवस्थापयिष्यन्नत्र चरमसिद्धिपदं सार्थकीकर्तुमाह
प्रथमसिद्धीति। अखंडाभावतया तन्नैवेयमर्थ इति हृदयं तथा चानुमित्यव्यवहितपूर्ववर्त्तिसिद्धिभिन्नस्य परामर्शादेः प्रतिबंधकत्वाप
त्तादिति द्वितीयसिद्धिपदं निरुक्तरूपेति निरुक्तरूपं सिषाधयिषाविरहविशिष्टत्वादिरूपं। ननु नायत्नैवानंतरकार्यकारणभावोस्ती
त्यत आह गाढ़ेति। ननु कारणतायां तत्तत्सिद्धित्वेनैव प्रवेशः पक्षताघटकतेनुगतैक्याय सर्वत्र तद्विशेषणदानं यद्वा न देयमेव त
र इत्यत आह तत्तदिति। आत्मनिष्ठस्य प्रतिबंधकत्वस्य लाभाय संबंधेति। ननु तत्संबंधस्य प्रतिबंधकत्वे तदानींतनपुरुषांतरस्य ना
नुमितिः स्यादित्यत आह तन्निति। तन्मनोयोगस्तत्स्यात्ममनोमनोयोग इत्यर्थः तस्य स्थिरतयानुमितिकालेपि सत्वाद्विशिनष्टि तत्त
त्क्षणावच्छिन्नेति। अत्र यद्यपि तत्समये नात्मसंबंधस्यैव प्रतिबंधकत्वं वक्तुमुचितमिति मनोयोगपर्यंतानुधावनफलं तथापि त राम
स्य स्वरूपसंबंधात्मकतया पूर्वदोषापत्तिरेव स्यादिति ध्येयं अत्र कत्वेसामान्यतोऽनुमितित्वमेव कार्यतावच्छेदकं। एतेन तत्तद १६०

नुमितित्वस्य कार्यतावच्छेदकत्वेन तत्समवायस्यैव प्रतिबंधकत्वे व्याप्यवृत्तित्वपर्यंतं व्यर्थमिति परास्तं । प्रतिबंधकस्य सामानाधिकरण्य
प्रत्यासत्त्या नातिप्रसंग इत्यपि । ननु वास्तवं नियामकं तत्तद्व्यक्तिव्यक्तिरूपं वर्त्तत एव तज्ज्ञानं च न प्रयोजकं प्रतिबंधकाभावस्यस्वरू
पसत्त्वेन हेतुत्वादित्य आह न चेति कार्योत्पादादिकमित्यादि न हि टिनकारणतावच्छेदकावच्छिन्नकारणस्य कार्यपूर्ववर्त्तित्वाभावादि
तिभाव ४ । आदिपदात् प्रतिबंधकसमाजाधीनकार्यानुत्पादपरिग्रहः । अत एवोक्तं प्रत्यक्षामणि दीधितौ प्रतिबंधकाभावस्य सम
समयवर्त्तित्वरूपतया प्रत्यासत्त्या कारणतावच्छेदकतावच्छेद पूर्ववर्त्तित्वस्य कारणत्वस्य संप्रदायसिद्धत्वादिति । तथासतीत्यादि द्वितीयक्षणो
नुमित्युत्पादेपि तेनैव कारणेन तृतीयादिक्षणे ऽनुमित्युत्पत्तिवारणाय आह तत्पत्तीति इदं च त्रितयान्वितं बोध्यं अत एव संस्कारादीनां चि
रस्थायित्वेपि न क्षतिः ४ एतत्त्रिकस्य सामानाधिकरण्यप्रत्यासत्त्यैव कारणत्वात् आत्माधिकरणानुमित्यव्यवहितपूर्वोत्पन्नज्ञानादीनां स
मानाधिकरणानुमित्युत्पादनादाह स्वसमानाधिकरणेति । अनुमित्यनंतरमनुमितिस्वप्राप्यमिकानुमितित एवइति ध्येयं । तदात्मह

अधिक्र १६१ त्रिद्वित्वस्यापि तादृशत्वादधिकरणान्तरेऽनुमित्यापत्तेराह सविषयत्वेनेति। परामर्शसिषाधयिषानुमितीत्यादिक्रमस्थलेऽनुमिसिषाधयिषा
दिसंग्रहाय ज्ञानत्वमुपेक्षितं। नन्वेतस्य स्वद्वयघटिततया बहुव्रीहिद्वयप्रवेशेन गौरवादाह स्वसमानाधिकरणेति यस्य संस्कार
स्यांतिमक्षणेऽनुमितिस्तस्यापि कारणत्वविशिष्टत्वेन तदुत्पत्तिर्द्वितीयक्षणेऽनुमितिप्रसंगादाह उत्पन्नेति आन्यक्षणपूर्ववत्ता अत्रापि स्वघटि
तत्वात् अननुगमेन व्यतिरेकव्यभिचाराद्दाह स्वक्षणेति अत्र स्वस्वशब्देन कारणीभूतभिन्नस्य प्रतियोगिनोऽभिधानं न धारावनावद्रेदू
टस्य प्रवेशान्नाननुगमः मध्यमेनुयद्यप्युत्पन्नत्वविशेषणेनैव कृतकृत्यत्वे उत्पत्तिकालावच्छिन्नत्वस्यानुपयोगो व्यर्थः तथापि अत्र तस्या
वश्यकतया तत्रोत्पत्तिरुपलक्षणमिति ध्येयं। ननु येषां ज्ञानादीनां तृतीयक्षणएव अनुमितिस्तेषामपि कारणत्वमिति विहाय सविष राम
यत्वपदपरित्यागेन लाघवाय चाह किंवेति। कुत्रचिदुक्तस्थले परामर्शेनैवानुमितिवस्तुतः परामर्शस्यैव सर्वत्रानुमितिजनकत्वा १६१
त्रादिच्छादिसंग्रहाय उपात्तं विषयपदं परित्यज्य ज्ञानत्वमुक्तं आनुमितेरनंतरमनुमित्युत्पत्तिवारणाय तावत्यव्यवहितपूर्ववर्तित्व

विशिष्टं विशेषणं आदिपदेन तादृशसंस्कारत्व तादृशधर्मत्वादीनां परिग्रहः। ननु पूर्वोक्तस्याव्यवहितत्वस्य तृतीयक्षणासाधारणत्
याऽनेन परामर्शेन विनश्यदवस्थेनानुमितिजनकत्वादिना तस्य द्वितीयक्षणेऽप्यनुमित्यापत्तिरत आह अव्यवहितोत्तरक्षणेति तथा च तेषु सर्वे
षु स्वाधिकरणकालध्वंसाधिकरणकालध्वंसानधिकरणत्वे सति त्वेन तद्घटितमेवाव्यवहितोत्तरत्वं निर्वाच्यं अत्र च क्षणपदमन
तिप्रयोजनं ध्वंसानधिकरणे यत्र सामान्याभावविवक्षणान्नातिप्रसंगः। न चादिमेऽक्षितिचतुर्थेऽनुपरामर्शस्या अव्यवहितपूर्ववर्त्तित्वा
त्ताप्रसंगः। अतथात्वात्तस्य क्षणाव्यवहितोत्तरक्षणोत्पत्तिकानुमितिकत्वाभावात्। न दानीं परामर्शस्य द्वितीयक्षणे न तु यत्र कामि
नीजिज्ञासापरामर्शैकावसमूहालंबनात्मिका तदनंतरं परामर्शः कामिनीज्ञानं तु तत्कारणासत्त्वे कर्षाभावान्न जातं तत्र परामर्श
द्वितीयक्षणे ज्ञानमात्रस्यैवानुत्पत्तिः कामिनीजिज्ञासायाश्च पूर्ववर्त्तिन्याः प्रतिबंधकत्वात् तदनंतरं परामर्शे तृतीयक्षणेऽनु
मितिस्तत्र तादृशसविषयकमनुमितिं प्रति तत्र संस्कारमेव तादृशमुपपादयेत्यं ततदृति। नत्रापि परामर्शविषयस्य द्वितीयक्षणीयत्व

ग्र॰ शि॰ ङ्क्षितैपद्यापवत्सम्यक् नन्वस्याः अनुमितेः संस्कारजन्यत्वे स्मृतित्वापत्तिरत आह संस्कारेति। नित्यस्यादिति यदि संस्कारजन्यमेव ज्ञानं स्मृ
१६२ तिः स्यात्तदा संस्काराधिकरणकमहत्त्वसमानाधिकरणो भूतरूपाभावप्रत्यक्षमपि स्मृतिः स्यात् इति संस्कारत्वेनैव जनकत्वं तत्र तथा
वाच्यं तथा सति नैतद्दोषशंकेति भावः। ननु कारणाननुगमे व्यभिचारः प्रतिबंधकाननुगमेन तत्तदभावस्य कारणत्वे सर्वत्र व्यभिचारा
त्तदोषः दुर्ज्ञेयत्वं चोभयोस्तु समानमित्याशयवानाह स्यादिति। मैत्रीयानुमितिप्राक्कालीनचैत्रज्ञानादिमति चैत्रेऽस्यानुमितिकारणादि विधु
रस्यानुमित्यापत्तेराह स्वसमानाधिकरणेति। स्वं कारणत्वेनाभिमतं तथा च तादृशज्ञानस्य स्वसमानाधिकरणानुमित्यव्यवहित
पूर्ववर्त्तिभिन्नत्वात् तदेव प्रतिबंधकमिति न तत्रानुमितिरिति भावः। इदानींतनानां न्यायशास्त्रसर्वेषां ज्ञानानां नाशानुमितिपूर्ववर्त्तित्वा राम
दप्रतिबंधकतया ऽनुमित्यापत्तेराह अव्यवहितेत्यादि स्वसमानाधिकरणानुमित्यव्यवहितपूर्वीभूतस्थूलकालवर्त्तिनाम प्रतिबंध १६२
कतया ऽनुमितिपूर्वपरामर्शाभावेऽप्यनुमित्यापत्तिरत आह वृत्तीति। नन्वनुमित्यव्यवहितपूर्वकालवर्त्तिनां स्थूलकालोपाध्यवच्छिन्ना

नां तद्भिन्नत्वाभावात् तत्पूर्वमनुमित्यापत्तिः अथानुमित्यव्यवहितप्राक्कालेयस्य नाशस्तेनैव प्रतिबंधादिति चेन्न तथाविधआत्मवृत्तिभिन्नयत्नेमा
नाभावध्वंसस्य चरमादाह स्वसमानाधिकरणेति। अत्रानुमित्यस्यापि तादृशक्षणवृत्तित्वेन प्रतिबंधकत्वमिति नोक्तदोषः अत्राप्यनुमित्यव्यव
हितपूर्वक्षणघटितस्थूलकालोपाधेरनुमित्यव्यवहितपूर्वत्वानधिकरणतया तत्कालवृत्तिनापरामर्शेन प्रतिबंधादनुमितिकालेऽनुमित्य
नापत्तिरत आह क्षणेति। ननु स्वस्वपूर्ववर्तीत्यादिलक्षणक्रमेण घटादावच्छिन्नस्थिरस्य क्षणतयाऽनुमित्यव्यवहितपूर्वभूतो यस्तादृशक्षणस्त
स्यापि निरुक्तानुमित्यव्यवहितपूर्वत्वानधिकरणतया तद्विशिष्टपरामर्शस्यानुमितिप्रतिबंधकत्वेनानुमितिकालेऽनुमित्यनापत्तिरत आह स्व
समानाधिकरणेत्यादि तृतीयं। अत एव तथाविधक्षणस्याप्यनुमित्युत्पत्त्यनधिकरणसमया व्यवहितपूर्वत्वाभावात् न तद्वृत्तित्वविशिष्टेन
प्रतिबंध इति। अत्र च क्षणत्वस्य वैयर्थ्यं समये त्युक्तं इहापि अनुमित्युत्तरक्षणस्याप्यनुमित्युत्पत्त्यनधिकरणतया तदव्यवहितकाली
नोयः स्थूलोपाधिस्तद्वृत्तित्वविशिष्टेन प्रतिबंधादनुमित्यनापत्तेराह क्षणेति। एवं पूर्वेषु प्रतिबंधकत्वं सामानाधिकरण्येन तेन उपद

अधिक र्शितद्वित्वादेः प्रतिबंधकत्वेपि तदात्मवृत्तिपदार्थान्तरमादाय तस्मिन्नात्मनि नानुमितिः। ननु तदुत्पत्तिकालीनध्वंसप्रतियोगिन एव तदव्यवहित
२६३ पूर्वत्तयाऽनुमित्यवधिकानिपूर्वस्यापि ज्ञानस्य तादृशत्वेन तद्वृत्तित्वविशिष्टानाम प्रतिबंधकतयानुमितिपूर्वमप्यनुमित्यापत्तिरित्यत
आह तदव्यवहितेति। तथा च तद्ध्वंसस्यानुमित्युत्पत्तिकालीनत्वेप्यनुत्पत्तिकालोत्पत्तिकत्वाभावान्न दोष इति केचित्। ननु तदव्यवहितपूर्व
त्वं तदुपकालप्रागभावानधिकरणत्वे सति तदुत्पत्तिकालप्रागभावानधिकरणत्वं वक्तव्यं तच्च प्रागभावानंगीकर्तृमते कथं घटतामत आह त
दव्यवहितेतीत्यादि प्रथमद्वितीचरमयोस्तु तदव्यवहितपूर्वत्वानधिकरणत्वात्तादृशात्मवृत्तित्वविशिष्टेन परामर्शेनैव प्रतिबंधात्सिषाधयिषोत्पा
दकालेऽनुमितिरिति भावः। सिद्धात्मकेति। परामर्शाव्यवहितोत्तरमनुमितिवारणाय सिद्धेरप्यनुमित्यव्यवहितपूर्ववर्तित्वेनाप्रतिबंधक राम
त्वमिति भावः। कस्यापीति यद्येवं स्यात्तदा तत्प्रतियोगी प्रतिबंधकः स्यादिति भावः। तदुत्पादनसमये सिषाधयिषोत्पादनसमययोस्तादानु २६३
मितिः। यद्यपि प्रतिबंधकानां कस्यचिदुत्पत्तिरिति न्यायेन तदानीमपि कस्यचिन्नाशः संभवति तथापि तदात्मवृत्तेस्तस्मिन्प्रमाणाभाव इत्यभि

आयेण सम्बाध्यत्वे अनवस्थेति। ननु तेषां प्रतिबन्धकामेवो परमेमात्राभाव इत्यत आह फल इति। ननु कल्पनीयेतरकारणाभावादेव तत्र फलाभावा
देव तत्र फलाभाव इत्यत आह कारणान्तरेति। ननु कारणताग्रहसमय एव तत्रान्वयव्यभिचारसंदेहः प्रतिबन्धकोस्तीत्यत आह अन्वयेति।
सहकार्यन्तराभावेपि तत्संभवात्। ग्राह्याभावास्फूर्तित्वान्न तेन प्रतिबन्ध इति भावः। नन्वनुपदमेवोक्तं सहकार्यन्तरमत्र नास्तीति तत्कथ
मेतदित्यत आह उपादीयत इति। ननु तादृशसमयसंबन्धानां स्वरूपसंबन्धात्मकतया न तदात्मरूपत्वं तत्र समयसंबन्धिरूपत्वं वा तत्र वात्म
नः प्रतिबन्धकत्वमसंभवोत्तरक्षणस्य प्रतिबन्धकत्वे पुरुषान्तरेप्यनुमितिर्न स्यादित्यत आह भवेत्वेति। तथा च तत्तदनुमितेरेव कार्यतावच्छेदक
त्वात् न तादृशक्षणमादाय पुरुषान्तरेप्यनुमितेर्विलोपापत्तिः परामर्शादीनां कारणत्वे रक्षार्थमाह तादृशेति। ननु नियत्यैव कारणत्वमस्तु किं
नः क्षणत्वमित्यत आह तथाचेति। सर्वत्रैव [illegible] क्षणस्य कारणस्य तत्राभिसत्वादिति। ननु सर्वत्रोपमितिसामग्र्येव किं न स्यात् अथानुमितो
[illegible]त्यनुव्यवसायादनुमितेरनुगतत्वे कल्पता तादृशक्षणस्यैव विशिष्य तत्कारणत्वं वाच्यं इत्तिर्वेत्त हि उपमितावपि नुत्वं अत आह वि

अशि॰ त्वीयेनत्वेति। परामर्शत्वेति द्वितीयकल्पे परामर्शस्य हेतुत्वव्यवस्थितेरिति। अतथात्वं कारणत्वप्रतिबंधकत्वव्यतिरेकः। अत एव तत्त्वे
१६४ णास्य कारणत्वादेव द्वितीयः अनुमित्यव्यवहितसिद्धिमत्त्वे सिद्ध्यभावेत्यादिना उक्तं दूषणांतरमाह वैयर्थ्यादिति। स्वद्वारा इत्यादिना प्रति
बंधकत्वेव वस्त्वंतरस्यापि प्रतिबंधकत्वेन त्रैविध्यसिद्धेर्वैयर्थ्यमिति भावः। तथाध्यायमत्तमुपन्यस्यति सिषाधयिषेति। अनुमानादित्रै
ति असंभववारणाय चक्षुरादीति सिद्धिस्वरूपयोग्यचक्षुरादिसत्त्वे अनुमित्यभावेऽवतत्क हेतुत्वासिद्धिकारणसत्त्वान्नानुमितिः स्यात् तत्र
विशिष्टसिद्ध्यभावसत्त्वेनानुमितिरेव भवति सामान्यादित्यर्थः। ननु पहितत्वेति तत्कालीनविशेषणत्वमभिप्रेत्यैव तत्र तप
थानवदस्याव्यवहितोत्तरसिद्धिकार्थकत्वे उत्तरदोषएव बोद्धव्यः। अन्वयव्यभिचारेण व्यतिकरः इत्यत आह तदभावानुमि
तिः स्यात् व्याभावानुमितिः आरोपस्य हेतुत्वाभावात् कश्चिदत्र स्वरसः सूचितः। नन्वयमन्योन्याश्रयः उत्पन्नोत्पन्नोवानाद्यः सा राम
मग्र्यभावयोर्नित्यत्वान्नेतरः स्वरूपसत्कारणतायां तत्तज्ज्ञानस्याकिंचित्करत्वात् एकमतिज्ञायापि अन्यतरस्य ज्ञानाद्वा इत्या १६४

स्वरसादाह वस्तुतस्त्विति स्यात् तं ज्ञप्तिसिद्धिघटितान्यतरत्वेनान्वयव्यतिरेकाभावादित्यर्थः। लाघवात् शरीरलाघवात् तथात्वं कारणत्वं
कान्यथान्यतरत्वेन कारणत्वे बाधतो वैलक्षण्यमाशंक्य निषेधति नचेति उभयत्रानुमितित्वाविरहविशेषणस्यैक्यं स्वं द्वेति शाब्देति सि
द्धांतरसत्वेनु तादृशेच्छाया अभावात् तदनुधावनं। तादृशेच्छायां शाब्दं ज्ञानं जायतामितीच्छायां अनुमित्यादिपदेन प्रत्यक्षादावतिरिक्त
त्वादि परिग्रहः। वाक्यत्वादिति नथाव लाघवानवतारे बाधादेरपि प्रवेशस्यादिति भावः॥ ननु सिद्धौ अनुमितिविषयत्वं यदि तदा प्रमेयं ज्ञा
यतामितीच्छायामपि अनुमितिः स्यात् अथ तत्रयत्प्रमेयमुपस्थितं तद्विषयैव सेच्छा यत्रानुमितिरुपस्थिते तत्रैव सा तादृशीति चेन्न प्र
त्यक्षसामग्र्यामपि तस्याउत्तेजकत्वेन तद्दोषतादवस्थ्यामिति। एवं विभिन्नेच्छानां प्रार्थक्ये न उत्तेजकत्वात्। इत्थं चोत्तेजकतायां
फललोपधानपरतया दुर्ज्ञेयत्वादिति। स्वनिवर्त्तकेति स्वमिच्छा तन्निवर्त्तकाया प्रत्यक्षादिसामग्री तत्समवहितायाः तदन्यत्वादित्यर्थो
प्रत्यक्षादिपदादन्यतमत्वादिपरिग्रहः। प्रत्यक्षादिसामग्र्या इच्छानिवर्त्तकत्वं फलोत्पादद्वारा अयं च विशिष्टाभावः॥ प्रत्यक्षादिसाम

अ.शि.कृ. १६५

ग्राम्य समवधानं तत्र तादृशसामग्र्यभावेन यत्र च सत्वां प्रत्यक्षादिसामग्र्यां अनुमितित्वप्रकारकेच्छा तत्रापि स्वनिवर्त्तकत्वरूपविशेष
णाभावेन नोक्तदोषः स्वनिवर्त्तकप्रत्यक्षसामग्रीसमवहितानुमित्सा यत्र प्रत्यक्षसामग्री तत्राप्य ज्ञानं जायतामितीच्छा तत्र बोध्या। गौरवमिति
स्वनिवर्त्तकत्वादिप्रवेशादिति भावश न तु स्वरूपसत्कारणतायामुभयत्रोत्तरकालान्यमितावप्यनुमितिकसिषाधयिषात्वेन तत्वं वाच्यं
यद्वा तत्तदिच्छाभावस्तोमएव उभयत्र विशेषणमस्तु तथापि उभयकारणतापेक्षया लाघवमत आह अन्यतरत्वेति सिद्धिभिन्नत्वे
सति यत्सामग्रीभिन्नं किंवा सामग्रीभिन्नत्वे सति यासिद्धिभिन्ना तद्भिन्नमिति विनिगमकाभावो बोध्यश्च एवं उभयभेदं वत्वेन ग्रह
णेपि उभयत्वेति विनिगमकाभावो बोध्यः। ननु तादृशधर्मद्वयवच्छेदएवावच्छेदकोऽस्तु न च तस्य स्वरूपतः प्रवेशो ज्ञानत्वविशिष्टस्य तथो
त्वेऽपसिद्धान्तः अन्यथा प्रवेशे तु सएव दोषद्वितिवाच्यं। स्वरूपसत एव तस्योक्तस्य वस्त्ववच्छेदकत्वात् ज्ञानं तु यथायथं प्रमाणावर्त्त राम १६५
न निबंधनमिति ननु तदुभयविषयकविषयताद्वय विनिगमनाविरहः सिद्ध्यभावत्वेन कारणत्वे तुल्यत्वादत आह आत्मनिष्ठ

तिविशेषणतयेत्यर्थः समवायेनेति प्रतियोगितावच्छेदककथनं भिन्नेति येन संबंधेन यत्कारणां सामग्र्यां निविशते तेनेत्यर्थः ननु सामग्री
विशिष्टमनोयोगप्रवत्प्रतिबंधकोऽस्तु तदभावश्च समवायावच्छिन्नप्रतियोगिताकः विशेषणतयैव कारणमस्त्वत आह मणाविति। अ
योगादिति एकस्य कारणत्वं प्रतिबंधकत्वं वा दृष्टचरमिति भावः॥ संबंधभेदेनाभावभेदमुक्त्वाऽवच्छेदकभेदमाह एवमिति सिषा य
यिषाकालीनसिद्धेस्तदीयान्यकालीनविरहविशिष्टत्वादाह एककालेति। पुरुषांतरीयवारणाय एकात्मेति। अन्यादृशमिति तादृश
विरहविशिष्टात्मीयमनःसंबंधत्वेन निरूपितेति भावः। तथा चावच्छेदकभेदादभावो भिन्न इति भावः। ननु यदि लाघवात् सिद्ध्यभाव एव
कारणं तदा लाघवाद्ध्याभाव एवास्तु इत्यत आह फलेति यत्र वह्निमान् वह्निव्याप्यव्याप्यवांश्चेत्यनुमितिरिष्टसाधनमिति समूहालंब
न ज्ञानानंतरं सिषाधयिषा तदनंतरं वह्निमान् वह्निव्याप्यवानिति अनुमितिस्तत्रानुमित्यंतरं स्यादिति फलानुपहितेति गौरवादि
ति बाधस्थले तु तथा व्यवहारः। संमुग्ध इति भावः ननु सिद्ध्यभावस्य पक्षतात्वे पर्वतादौ कथं न व्यवहार इत्यत आह विशिष्टेति परं परे

अशिक्ष ति। स्वप्रतियोगिविषयत्वेनेत्यर्थः। ननु यदि विरहेन सकलं सामग्र्यानेकं धेरिध्वंसनाश्येकः स्वं तं थः प्रतियोगितावच्छेदकस्तदा सामग्र्यभावः का
१६६ रणमेव मास्त्वित्यत आह एकस्येति। अतएवानन्यागतिकत्वेनेति। अनुगतत्वादीति अभावस्यैकत्वादित्यर्थः। इहापीति यादृशयादृशे
त्यादिनेत्यर्थः। कार्यतावच्छेदकं खण्डयति सिद्ध्युत्तरेति उत्तरत्वस्याप्यवधानतर्भावे अननुगतं तदनंतर्भावे ऽतिप्रसक्तं ननु स्थिति
कालत्वं उत्पत्त्यनधिकरणत्वे सति तदनधिकरणत्वं। अथ स्थूलदनधिकरणसमयध्वंसाधिकरणत्वे सति तदनधिकरणत्वं अनुमिते
रपि स्वकालोत्पत्तिकत्वात्तद्व्यावर्त्तनाय वाच्यं तत्कालीनत्वंच तत्कालोत्पत्तिकत्वं अन्यथा चेत्तद्दोषानुद्धारात् अतो प्रकारांतरमाह
स्थितरेति। विनापीति कालपदस्य द्वारापरतया सिद्धिध्वंसकालीनस्य सिद्धिकालीनत्वाभावात् स्थूलकालपरत्वेन निखिलानु
मितीनामेव सिद्धिकालीनत्वात् सबाधयिषायाः सार्वत्रिकत्वापत्तेरिति भावः ननु दशाद्वयं तर्भावेन या सिद्धिकालीनानां प्रति राम १६६
जनकत्वं वाच्यमिति त्यत आह एकस्येति चैत्रीय सिद्धकालीनमैत्रानुमितेः सिषाधयिषां विनाऽनुत्पादइत्यर्थः। ननु भवन्मते विशा

न्यदीयां सिषाधयिषाभावसहकृतविशिष्टाभावात्वमतेपि सिद्धिसत्वेऽनुमित्यापत्तेरिति अथ सिद्धिनिष्ठं। सिषाधयिषाविरहविशिष्टं एककाला
वच्छेदेनैकात्मवृत्तित्वं वक्तव्यमितिचेत् समानाधिसिद्धिविशिष्टानुमितित्वमेव तथाविधसंबंधेन कार्यतावच्छेदकमस्तु इत्यत आह आदिये
ति। सामान्यसामग्रीतः प्रतत्कारणातिरिक्तकारणाभावात्। नन्वीदृशकारणपरित्यज्य सामान्यसामग्रीनक्रिया इत्यत आह नही
तेन तुऽन्यत्रापि विशेषरूपेण कारणत्वं क्लृप्तं तथा च सामान्यसामग्र्या विशेषसामग्रीसहिताया एवजनकत्वदृष्टं तथान्यकु
तोऽतिप्रसंगः इत्याशंक्य निषेधति नचेति। अतिगौरवमिति सिषाधयिषाभि। न्नस्थलीयानुमितीनां एतदनुरोधे विशेषकल्प
नेवरंतिकं त्तसिद्ध्यभावत्वेनैव कारणत्वमस्थिति भावः। अनयद्यपि तत्तदुक्तिनियमार्थं तत्तत्कारणविशेषस्य तत्तत्प्रागभा
वविशेषस्य कारणत्वकल्पनेनैव दोषशंकातथापि तत्तद्धर्मावच्छिन्नं यात्कारणसत्त्वेन तद्धर्मावच्छिन्नकार्यमावश्यकमिति
अन्यथा सर्वेषामेव कार्याणां मतित्वघु सामान्येन कारणानायां तत्तदुक्ति। नियामककारणेनैवातिप्रसंगे सर्वसमंजसमिति

अशि०
१६७

संप्रदायमनुरुद्धोक्तमिति ध्येयं। हेत्विति तथा च तादृशकार्यावच्छेदकावच्छिन्नकारणाभावादेव न तादृशकार्योत्पत्तिरिति। सा सिद्धानु-
मानुमितिः। अनुमितीति अनुमितित्वावच्छिन्नयावत्कारणसत्त्वेऽनुमित्यनुत्पादोऽप्रमित इति भावः। वस्तुतस्तु निरुक्तसिद्ध्यनुत्तरत्वस्य
तत्र छत्तिविशेषणतया सिद्धापि बाधे नैकारणत्वमिति भावः। कारणेति आवश्यकत्वोपदर्शनत्वेनैव विशेष्यविशेषणभावे विनिग-
मनाविरहो व्युदस्तः। प्रतिबंधकेति स्वतंत्रान्वयव्यतिरेकेन तथैव हेतुत्वौचित्यादिति। नन्वन्यत्रापि विनिगमनाविरहो बीजं इह तु विनि-
गमकमुपदर्शितमेवेत्यत आह अन्यथेति यथासंभवमिति यत्र समवायिकारणे न समं निमित्तकारणस्य प्रत्यासत्तौ न गौरवं यथा
ईश्वरज्ञानादेस्तत्रतावच्छेदकत्वमिति घटादेः कपालादिना समवायः संबंधः दंडादिना तादृशपरंपरेति निमित्तकारणस्यावच्छेद-
कत्वमुचितमिति। यत्र समवायिकारणस्य तु तत्र कारणेन लाघवानास्थेति त्वमानुमविर्क सांप्रदायिकाद्युत्पादयति सानुमितिः इ-
दं वा सिद्धमतानुरोधात् कुत्रैयस्येति इदमपि तन्मतेनैव स्वमते तु मपि सामग्र्याः प्रतिबंधकत्वमिति प्रत्यक्षमणिदीधितौ विवेचितं

राम
१६७

कार्यसहभूतस्यैवेति। अन्यथा विनश्यदवस्थस्य समवायिकारणत्वे निराश्रयं कार्यं स्यादिति। अत्र यद्यपि कार्यसहभूतत्वेन कारणत्वे का
र्योत्पाद प्राक् तथाभूतत्वसंभवितस्य तथात्वे तत्क्षणावधिस्वाव्यवहितोत्तरकालीनत्ववृत्ति कार्यकत्वमेव समवायिकारणस्य संबं
ध इति वक्तव्यं तस्य कपालत्वेन घटत्वेनैव कार्यकारणभावः यत्र तु विनश्यदवस्थकपालं तत्र वा तादृशकारणमेव प्रतिबन्धक इत्येव
सम्यगिति नव्याः कारणतानुकूलत्वेनैव तत्र दृष्टं प्रति त्वप्रतिबन्धककारणविशेषविरहादेव विनश्यदवस्थेन घटोत्पत्तिः विशेष
सामग्रीसहिताया एव सामान्यसामग्र्या जनकत्वादिति केचित्। आभाकरा इति। अभावस्य कारणत्वमेव नास्तीति तेषां मतं न
स्वरूपेषु नैव निरूढमिति अनवद्यं। तुपदं तन्मते तु पर्यन्तस्येति आभाकरा इति कश्चिदिति यत्र सामान्यापरामर्शस्तत्रैव
अनागतोऽध्यवसायेति। सिद्धेस्तु निवादिनः काकोलाहिरहादिति। तज्ज्ञानेति अनुमितिलक्षणेत्यर्थः तत्र व्याप्ति
विशिष्टपक्षधर्मताज्ञानं परामर्श इत्युक्तमिति। पक्षतयासमं तुरक कार्यत्वमेव संगतिः अव्यापकत्वादिति यत्र व्याप्तिज्ञानस्य

अश्रीक
१६८

श्राद्वयानुभवत्वं तत्वेदं गौणं लाघवादिनिमूलस्य कल्पनालाघवपरत्वे परामर्शेत्यादि ग्रन्थासंगतिरित्यत आह प्रथमेति न च प्रथमोपस्थित
स्यैवोत्सर्गिकत्वेन स्वतंत्रतर्कतया लाघवानात्मकत्वं इति वाच्यं उपस्थितपरित्यागेनेत्यादिन्यायेनास्यापि लाघवपर्यवसाना
त् पक्षांशयमेवास्य रसो मूलप्रयोजनीयः कल्पनेति कृत्रिमयत्नपूर्वकत्वैकस्य तस्यानन्यथासिद्धत्वमात्रं कल्पनेति। इदमेव विवद
ति परामर्शेत्यादिना पक्षमूलस्य विभिन्नधर्माभ्यां व्याप्ति पक्षधर्मतयोः ग्रहे ह्यनुमित्यापत्तिः इति दोषं परिहरति एवं चेत्यादि मूलं संग
मयति तन्निरित्यादिना स्वाभावो क्षो दोषमुद्धरति यद्धर्मेति। अविवक्षितमिति। यत्र देवदत्तशसंपत्रमेकमेव ज्ञानं तत्राव्याप्तेरिति व्याप्यता
वच्छेदकेति नहि वह्न्यादिव्याप्यतावच्छेदकं यत् तत्प्रकारकं पक्षधर्मताज्ञानं कारणं तदा धूमवान्नित्यतोप्यनुमित्यापत्तिः अ
पि तु व्याप्यतावच्छेदकतया तथा व्याप्तिज्ञानस्य हेतुत्वं तत्रावश्यकमिति एतावता ह्यावश्यकत्वमायाति न वासौ पजीव्यत्वमि राम
ति। तथा पाठं योजयति। उपजीव्यत्वं चेति तथा च व्याप्तिज्ञानव्यतिरेके ईदृशज्ञानस्यासंभवनियमेन तन्नियतसत्त्वमेवोपजीव्यत्वमि १६८

ति। नन्वेवमादिमूलेनैयायिकस्यैवाशंकासा च न घटते केवलव्याप्तिज्ञानहेतुत्वस्यैव यथाश्रुतग्रंथलाभात् इति परामर्शहेतुत्वं साधयन्नु
पसंहरति। एवं चेति व्याप्तिज्ञानमिति व्याप्तिज्ञानात्मकहेतावित्यर्थः। अतिप्रसंगेति यत्र पक्षधर्मताज्ञानाभावस्तत्रेत्यर्थः। कारणांतर
मिति मीमांसकोक्तमित्यर्थः। गौरवं तु स्फुटमेव स्वव्याख्याने ऽर्थं तस्येति मूलं योजयति सिद्धस्येति न पक्षधर्मेति सिद्धे व्याप्तिज्ञाने तदनं
तरं पक्षधर्मताज्ञानकाले ऽनुमितिरेवोत्पद्येत। अथ पक्षधर्मताविशिष्टज्ञानस्याकारणत्वात् पृथक् पक्षधर्मताज्ञानं तु प्रागस्त्येव।
ननु [illegible] ती व्यक्त्वमुक्तं तत्र फलत आवश्यकमेव न हि व्याप्यतावच्छेदकप्रकारकव्याप्तिज्ञानं व्याप्तिज्ञानजन्यं प्रथमन्तत एव त
[illegible] संग्रहात् किं [illegible] व्यधिकः। [illegible] यद्युत्पत्त्यरसादाहय इति व्याप्यत्वेति। तथा चाप्यत्वेति मूलं एकदेशावरभि
नैभावः। तदेवमुक्तमिति त्वयेति शेषः। विशिष्टज्ञाने तिष्ठत्येतत्कल्पनायां विशिष्टज्ञानस्य [illegible] लाघवमिति। स्वसंवेदनेति स्वधि

अ॰ छि॰ कृ य कं यत्सं वेदनमित्यर्थः। तच्चस्य प्रकाशरूपं नान्यथा त्वेति फलतो न किंचिद्विशेषः तथाच यदि तदन्यथानुपपत्त्या कल्प्यते तदेव

१६९ तस्योपजीव्यत्वं न चैवमिति भावः। ननूपदर्शितावश्यकत्वर्थमेवोपजीव्यत्वमस्येत्यत आह आवश्यकत्वं चेति असिद्धमिति प्रथम

व्याख्यानुसारेणोदं द्वितीये तु परामर्शस्याप्युभयवादिसिद्धत्वेन क्लृप्तावच्छेदकत्वकल्पनात् इत्याशंका व्यथेत्यादि मूलस्य वोध्या अयमि

ति मूलस्य व्यक्तिविशेषपर्यवसानेपि परामर्शात्मकत्वासंभवात् परामर्शस्याकारं दर्शयति अयमिति। अत एवानुमितिहे

तुरिति मूले हेतुं दर्शयति हेतुरित्यादि। एवं पुनरवच्छेदकक्लृप्तं मूले बोध्यं। नन्विति आचार्यमते विशेषणाविषयकसंस्कारस्यैव

हेतुत्वात्परामर्शपूर्वं नानुमितिसामग्री व्याप्तिविषयकज्ञानाभावादिति। मूले क्लृप्तज्ञानस्य विशिष्टवैशिष्ट्यात्मकतया विशिष्ट राम

वैशिष्ट्यबोधं दर्शयति अत्रेति पक्षाग्रह इति पक्षाग्रहे तु यदैव व्याप्यभेदग्रहस्तदैव पक्षवृत्तित्वग्रह मूले क्लृप्तसंकर इ १६९

ति इदमुपलक्षणं यत्र व्याप्यस्तत्र धूमेन व्याप्यभेदग्रहः पर्वतस्य साक्षात्कार इत्येकः कालः संयोगाग्रहेन वानुमितिविलं

वस्तुत आपि बोध्यं किं [illegible] त्र विशेष्यविशेषणभावे नियामकाभावात् निर्विवादतया [illegible] प्रहइत्युक्तं तृहीयद्वइति भूते व्याप्यभेदग्रह

काले केवल [illegible] प्रहे [illegible] इतिसूत्रनायकस्य [illegible] तावपि [illegible] ग्रहे तन्नीत [illegible] गयरामर्शाए [illegible] विशेष्यकोनिर्विवादइतिानुव्रमनो

[illegible] स्वतिस्वात् प्रथमनइत्यस्य विशिष्ट [illegible] नोपपन्नइति [illegible] तदाह प्रथमत इति। ननुभवत्ववच्छेदकलाघवंतथापि कल्प

नो [illegible] वमेव मीमांसकानांमूलं भविष्यतीत्यत आह एवंचेति तद्धेनव्याप्ति प्रकारकत्वं धर्मता ज्ञानत्वेन गुरुत्वेमिति व्याप्यतावच्छेद

कप्रकारेण व्याप्तिज्ञानत्वं तत्प्रकारेण [illegible] पक्षधर्मताज्ञानत्वं वेति गुरुधर्मद्वयमित्यर्थः। तद्धि तिव्याप्तिप्रकारकपक्षधर्मताज्ञानत्वस्य

तदुभय [illegible] यालघुत्वादित्यर्थः। न्याय्यत्वादिति तथापथ [illegible] शीनुभयं [illegible] विद्यमानमित्यर्थः गृह्यमाणोपि एवंद्वित्वस्यापवाद

[illegible] गौरवमिति ध्येयं। अतिगौरवादिति परामर्शापेक्षया [illegible] घटित [illegible] द्वित्वकृतगौरवमपि व्यवस्थापवतिनिति गम्यते

[illegible] नतोर्थ [illegible] गमनातिरहे [illegible] प्रकारकपिकारसालं स्यादिति भा [illegible] त्वाचीति नास्तोर [illegible] बोध्यो [illegible] बहु [illegible]

अधि कु
१७०

शरीरलाघवमेव विनिगमकमिति भावः। स्वतद्व्ऽतिस्वं स्वीयं तत्सिद्धः षष्ठ्यौ नात् तथाचस्वीयस्य कारणत्वस्येत्यर्थः। ननु धूमान्तरेति धूमत्वसं
निकर्षार्थमिदं तद्धकीतिसंनिकृष्टत्वकीत्यर्थः। व्याप्त्यनुमितीत्यस्यासन्निकृष्टत्वादि। ननु धूममात्रासन्निकर्षस्थले त्वदुक्तक्रमेण वह्नि
रसंसर्गाग्रह एव कल्प्य इति अत आह तद्धकीति। तन्मते उपनयमात्राभावात्। संनिकर्षस्य जेपितादृशं ज्ञानं दुर्घटमिति भावः इ
तिशब्द४ कारणार्थेन तु पाठ धारणमिति। ननु शरीरस्य सहकारित्वे साधमनस्त्वादृश प्रयोजनकत्वात् शरीरेऽतिव्याप्तिमा
शंक्याह शरीरादीति प्रमाणान्तरेति ननु द्वित्वमेव शरीरादिष्वुदासेऽसाधारणपदानर्थक्यमिति वाच्यं सहकारिपदस्य असाधारण
सहकारिपरत्वात् यद्वानन्तरस्यैवायमर्थः शरीरादिकं च प्रमाणान्तरस्यापि सहकारीति तद्व्युदासः अत्र च चक्षुरादीनां प्रमाणान्ते राम १७०
उभयवादिसिद्धमित्यभिप्रेत्येदं बोध्यं अन्यथा लोकसहकारित्वेन चक्षुषोपि प्रमाणत्वं न स्यादिति स्वस्यापि स्वसहकारित्वादा
हान्तरेति नन्वेवं बहिः पदं व्यर्थं सुखादिसन्निकर्षस्यापि प्रमाणान्तरस्य मनसः सहकारित्वादिति चेन्न प्रमाणान्तरस्यनेन मनो

भिन्नप्रमाणस्य विवक्षितत्वात् प्रमाया असाधारणकारणत्वं विवक्षितं मनसस्तु मानसप्रत्यक्षासाधारणत्वेऽपि साधारणभिन्नत्वाभावा
त्। असमासाधारणकारणभिन्नकारणासहकारित्वमेव सुखादिसंनिकर्षस्येत्यपि कश्चित्। तन्न चक्षुरादीनामपि कालोपाधि
त्वेन साधारणत्वात्। कश्चिदित्यस्याभोकादौ तादृशताभिकव्यवहार एवास्वरसः। नन्वेतावता उपनयनस्य प्रमाणत्वमागतं न तु तद्
निष्ठं तत्रान्तर्भावस्यापि संभवादिति मनसि कृत्वाह यद्वेति चक्षुरादावालोकस्याप्रामाण्ये आलोकमादाय चक्षुषो अप्रामाण्यं स्यादि
ति भयेनाह यद्वेत्यपि कश्चित्तन्न तथात्वेत्यादि तथात्वे इष्टापत्तेरुपनयजन्यप्रमायाः प्रत्यक्षादिविजातीयत्वे सिद्धे तत्कारणस्यापि त
थात्वं पर्यवस्यतीति भावः। अत्र च प्रत्यक्षप्रमाव्यक्तिविशेषमादाय व्यक्तिं तत्कारणस्यापि तथात्वप्रसंगादाह यज्जातीयेति। अनु
मित्यादिकरणस्यापि प्रत्यक्षजातीयकरणमनःसमवधानेनासंभवादाह मनोन्येति। एवं साधारणकरणमादाया संभवः स्या
दित्यत आह करणेति सुखादिसन्निकर्षस्यापि मनोभिन्नप्रत्यक्षकरणासमवधानादाह बहिरिति इदं चत्वज्ञानोपयोगं विज्ञायस्वमीम

अ॰शि॰कृ नोऽशोग्यस्येव ज्ञानसामान्यहेतुत्वमिति धर्मत्वं च दृष्टिवीत्वव्याप्यजातिविशेषः जलीयादिशरीरे प्रत्युपष्टंभकवृत्तिरिति मतेन अन्यथा मनद्भवत्व
२७१ समादायापि न धेवासंभवः स्यादिति मनो निष्ठत्वादिपदाप्रवेशयन्त्यो ज्ञानोद्योगस्यापि हेतुत्वमतानुसारेण व्याप्तिमाहयज्जातीयेति सामा
न्यपदं च पूर्ववदेव मनस्त्वसंवादाया संभवभयेन पर्यवसन्नमिति आलोकादीनां च तथात्वं पूर्वं निरसनीयं। संशयस्य प्रयोजकीभूतो प्रमात्व
मावच्छिन्नभेदवैयर्थ्यादाह संशयेति संशयस्य कुत्रचित्कोट्यंशे प्रमात्वेन तद्दंशे तादृशानुभवरूपत्वेपि कोट्यंतरमादाय व्यतिरेको बोध्यः।
न च व्याधिनविषयत्वेन तथात्वव्यतिरेकः स्वप्नमात्रस्येव भ्रमतायाः सिद्धांतसिद्धत्वात् अहमस्यां शय्यायामित्यादावपि शय्यांत
रस्येव विषयीकरणात्तु प्राग्भवेन स्वप्नवहनाडीसंयोगस्येव दोषत्वकल्पनात्। प्रकृते च उपनयाभावेन परमाणुरूपवानित्यादेरिव राम २७१
व्याधिनविषयेपि ज्ञानद्वयात्मकत्वात्। यथासंभवमिति संनिकृष्टयोग्यविषये प्रत्यक्षं अन्यत्रानुमानादिरूपमित्यर्थः स्मरणं वेत्यत्र ध
र्मिशांसामान्यतएव बोध्यं तेन कोट्यादिवत् कुत्रचिद्धर्मिणोपि तथात्वेन द्वित्वं तेन कोट्यस्मरणमादाय न न्यूनतादृशायामिति धूमत्वा

अथवान् सद्देशादित्यादि ज्ञानसमभिव्याहृत्य तदेव व्यापकतावच्छेदकप्रकारज्ञानस्य गुरोः कारणत्वं कल्पयितुमशक्यत्वात् ज्ञानं स्थले क-
ल्पनीयमिति मूलमसमंजसमतः पूरयन्नीत्यादावितिः। असंभवे वीति उपनयाभावादित्यर्थः। ननु यथा सन्निकृष्टस्थले परामर्शे बाधितस्तथा
शाब्दस्थलेपि न वकारणं बाधितमतस्तस्य मतमाह न वेति व्याप्यभेदसंशयस्यानुमितिप्रतिबंधकत्वमित्यंतं बाधितमतमाह नन्वनुमितीति व्या-
वर्त्तकधर्मावच्छेदकं विहाय रूपांतरेणासंशयादाह यदवच्छिन्नेति। तथाहीति स्थाणुत्वाभाववान् स्थाणुर्नवेत्याकारक इत्यर्थः। व्या-
वर्त्तकशब्दस्य तदभावावच्छेदकप्रवृत्तिनिमित्तत्वात् तदाह व्यावर्त्तकश्चेति। यदवच्छेदेनेति यद्यपि अवच्छेदकस्यापि व्याप्यत्वेन द्वैविध्यं न वित्तु-
महतीति तथापि व्याप्यत्वदर्शने व्याप्यत्वप्रकारकत्वेन अवच्छेदकतायास्तत्संबंधविधयैव प्रवेश इति आद्य प्रह इत्यंतेन व्यावर्त्तक-
तावच्छेदकदर्शनं पुरुषत्वस्य करादेर्वा इदं तावच्छेदेन ग्रह इति योजना पुरुषत्वं तु उक्तप्रतीत्या न ध्यमं व्यावर्त्तकं पुरुषस्थाणुर्नवेति न
संशय इत्याद्यस्य अयं स्थाणुर्नवेति द्वयोरस्त्वदिति तथायत [illegible] दादायापि त्रैविध्यं द्रष्टव्यं अत एवादिपदं दत्तं। तादात्म्येनेति दंडा

१७२ दितादात्म्येन संशये दंडाभावादिरपि दृष्टव्यश्च घटस्थले तु घटत्वस्य स्वरूपतः प्रवेशात् घटत्वत्वेन घटत्वाभावस्य विरोधित्वे विवादः तत्क्रम इति आ
अशिकृ यं च दोषविशेषाजन्यो ग्राह्यः दोषविशेषजन्यत्वमस्य तदीयविपरीतनिश्चयमात्रनिवर्त्यत्वात् अग्र इति अग्रे त्यादिग्रंथ इत्यर्थः। भावत्वाभावत्वयो
र्हेतुत्वे प्रमेयत्वस्य पुंलिंगतास्यादित्यतः सूरयति इदमिति भावादिशब्दस्य तु अजहल्लिंगतयान तल्लिंगतानतुभावत्वादेर्लिंगत्वे तत्त्वमेव व्याप्यता
वच्छेदकमिति तच्छेव मूलं संगमयति भावत्वेति अत्र यत्तादात्म्येन तयोर्हेतुत्वे यथाश्रुतमेव मूलं सम्यगिति ध्येयं भावाभावान्यतरत्वस्य प्रसि
द्धौ तस्य लिंगत्वाभावादिति मूलमसंदर्भमतो व्याचष्टे लिंगत्वेति यद्यपि शशशृंगमप्रसिद्धमिति वदिदमपि वक्तुमर्हं तथापि भावभिन्ने
भावभिन्नत्वं अभावभिन्ने वर्तमानं भिन्नत्वमप्रसिद्धमिति तदर्थात्। ननु मीमांसकानां मतेनास्य लिखनादेतत्र सिद्धांतविरुद्ध [illegible]
इ केवलान्वयीति तथा च। एतदभ्युपेत्योक्तमिति भावः। ननु केवलान्वय्यनुमानस्वीकारे धर्ममात्रस्यैव लिंगत्वे संमतं किं १७२
मर्थमेताच त्वयैतन्नानुधावनमिति मूलं केटान्वयति केवलान्वयिनइति यथाश्रुतं [illegible] हत्वाप्यत्व इति तथा च

यं वह्निव्याप्तिमान् धूमालोकान्यतरत्वादिति प्रयोगशरीरं द्रष्टव्यं। ननु अन्यान्यत्वस्यावच्छेदकत्वप्रदर्शनमेव दूषणे ग्रंथोपष्टंभकतया प्र
कृतोपयोगि न त्वन्यान्यत्वस्य लिंगत्वमित्यत आह लिंगत्वेति। यथा तत्र भावत्वाभावत्वान्यतरत्ववल्लिंगं तथात्रापि धूमालोकान्यतरत्व
वल्लिंगमिति। यत्संशयेति तत्र व्यभिचारव्यतिरेकज्ञानमात्रस्य प्रतिबंधकत्वेपि अव्यभिचारांतर[illegible]ज्ञानं अव्यभिचारज्ञानस्याहे
तुत्वात् व्यभिचारइत्यतो यद्भावत्वप्रकारकज्ञानत्वेन प्रतिबंधकत्वं विवक्षितं तत्र व्यभिचारज्ञानत्वेन प्रतिबंधकत्वं लाघवात् न
त्वव्यभिचाराभावत्वप्रकारत्वेन गौरवादिति भावः। व्याप्तेः प्रयोजकत्वमेवमन्यान आह यद्वेति। व्यतिरेकनिश्चयाभावस्येति य
द्यपि व्यतिरेकज्ञानाभावत्वेनैव हेतुत्वान्नैवं वक्तुमुचितं तथापि अवच्छेदकपर्यंतेन ग्रह इति भावः। न चात्र व्याप्यभेदज्ञानाभावापे
तेया व्याप्यनिश्चयस्यैव गुरुत्वं तत्र अप्रामाण्यनिश्चयेत्यादिविशेषणप्रवेशस्यैव गुरुत्वात्। अत एवेति यत एव लाघवाभिप्रायक
मिदं अत एव कल्पनालाघवमत्र मीमांसकनुद्रावयिष्यतीति। अथेत्यादि पीनकक्रमं उद्धृत्याह सामान्यत इति। अभ्युपगमवाद इ

अ॰शि॰कृ॰ १७३ निःकारणो भासस्यैव प्रतिबंधकसत्त्वे कार्यानुत्पादात् तस्य तथात्वं कल्पनीयं न चैतत् प्रकृते व्याप्यतावच्छेदकप्रकारकज्ञानसत्त्वे भेदग्रह
स्यैवाभावादिति भावः। तथात्वेति मूलकृतो ग्राह्यविधेतात्पर्यमिति भावः। अतथाभूतत्वस्य जनकज्ञानाविरोधित्वस्य संदिग्धत्वं इति न
थावन विरोधः विशेषरोति ग्राह्याभावानवगाहित्वेत्यर्थः। ननु गोपदशक्यतावच्छेदकत्वस्य स्वर्गत्वादावपि संभवात् तत्र साम्नादिव्य
भिचार इत्यत आह विशेषितं वेति प्रभुत्व विशेषितमित्यर्थः मधुरत्वादेर्जातित्वं मीमांसकैरभ्युपगतमत आह अखंडोपाधिरिति
सिंगतेति तत्समानाधिकरणस्यैव तदवच्छेदकत्वं न च व्यक्तेर्गोत्ववृत्तित्वमिति भावः। ननु गवेतरेत्यस्य गोत्वविशिष्टेतरेत्यर्थ
कतया गोत्वेत्व प्रवेशादात्माश्रय इत्यत आह गोत्वत्वेति तथा च गोत्वं स्वरूपत एव प्रविष्टमिति भावः। अत्र चेदं अयं साम्नावान् ग राम
वेतरासमवेतात् इत्यत्र गवेतरासमवेतत्वमात्रं इदं साम्नादिमत्त्व व्यापकं सकलगोवृत्तेरित्यत्र तादात्म्येन हेतुतायां सकलगोवृत्ति १७३
त्वमात्रं इदं गोपदप्रवृत्तिनिमित्तं इत्यत्र तादात्म्येन हेतुतायां विशिष्टमेव अवच्छेदकं सकलगोवृत्तिद्रव्यत्वादीनां गवेतरासमवेतत्सा

स्नादीनां च व्यभिचारित्वादिति। ननु गवेतरासमवेतत्वस्याकाशाभावादेरपि सत्त्वे व्यभिचारादाह कालादाविति। अवश्येति विशिष्टस्यापि कालादौ व्य
भिचारित्वेन समवायसंबंधस्य हेतुतावच्छेदकत्वावश्यकत्वे तत्र एव व्यभिचारवारणासमर्थं तदिति भावः। अन्वयव्याप्तेर्यथा साध्यं प्रत्येकं समर्थ
व्याप्तिरेकेपि न तत्समर्थयति व्यतिरेकेपीति। रूपांतरं द्वित्वादि तथा चाकाशमादाय द्वित्वावच्छिन्नगोत्वाभावस्यापि सत्त्वान्न तत्र व्यभिचार इति भा
वः। एवं व्यधिकरणसंबंधेन गोत्वाभावमादायापि व्यभिचार इति धूमत्वालोकत्वसमशीलस्य वह्निव्याप्यत्वं न घटते इत्यत आह। अंग इति य
थाकृतमूलेय दज्ञानदशायां अनुमितिदर्शनं तस्येव वेत्र अवच्छेदकत्वं तदा धूमत्वादेरपि तथात्वापत्तेरतो व्याप्त्वेष्टेन तथेति व्यभिचारेति
प्रकृतव्यभिचारेत्यर्थः। धूमान्यान्यत्वस्याप्रकृतत्वमभिप्रेत्य व्याचष्टे। धूमेति। एकधर्मस्य तादृशान्यान्यत्वादेः धर्मद्वयं धूमत्वालोकत्वादि
तस्येत्यर्थः। प्रथमेति धूमत्वालोकत्वग्रहं विना तस्य ग्रहीतुमशक्यत्वादिति भावः। लाघवाविवक्षस्येव कारः। ननु तस्य शरीरलाघवेपि द्वि
त्वकृतं गौरवं धूमालोकान्यान्यत्वस्यापि आलोकधूमान्यान्यत्वमादाय विशेष्यविशेषणभेदेन विभिन्नमूर्त्तिकतया विनिगमनाविरहे

अ॰ शि॰ कृ॰
१७४ णात्तथापि द्वयोरेवावच्छेदकत्वात्। ननु धूमालोकोभयभिन्नप्रतियोगिको योभेदः स स्वरूपेणैव निर्विशेषताभिति वाच्यं। जात्यतिरिक्तस्य स्वरूपे
णाप्रकारत्वात् इत्यादि बहुतरं प्रतिपादितमधस्तात्। अन्य इति संयोगेन येये वह्निव्याप्यास्तएव बोध्याः॥। भिन्नसंबंधेन व्याप्य साधारण्येऽ
तिप्रसक्तिः स्यादिति तथा च तत्र ग्राह्यमेव न स्यादिति भावः। तत्वं विशेषितत्वमित्यर्थः। व्यावृत्तेति इदं च प्रागुपवर्णितं मूलस्य न्यूनतां परिहरति
अत्रैवेति। धूमो वह्निव्याप्तिमान् धूमालोकान्यान्यत्वात् इतरस्यान्यान्यत्वस्य विवक्षणाभेदात्मकत्वे धूमादेस्तद्वृत्तित्वात्। धूमज्ञानाभावव
त्रानुमानवैकल्यमित्यर्थः। रूपत्वेनेति इदं चाभ्युपगमवादेन न तु घटभिन्नभिन्नत्वावच्छिन्नत्वे घटत्वेनैव तत्कार्यनिर्वाहात् एवं घटभिन्नभेदो
पि घटत्वमेवास्तु तेनैव तद् + पि + र्थसिद्धेः। यस्तु धूमालोकान्यभेदः स व्यतिरिक्त एव तत्कार्यस्यानुगतेन एकेन तदुपपादयितुमशक्य राम
त्वादिति। धूमत्वेति। धूमालोकान्येत्यत्र धूमत्वस्य स्वरूपत एव प्रवेशादित्यर्थः। ननु उक्तानुरोधेनान्यतरत्वस्यानवच्छेदकत्वेपि भिन्नमात्मक १७४
एव तत्र हेत्वाव्यइत्यत आह एवंचेति अस्तु वेति तथा चानतिरिक्तवृत्तित्वमेवावच्छेदकत्वमस्त्वीति भाव इति कश्चित्तत्रन्यान्यभ्यापनवच्छेदकत्वा

दित्युक्तग्रंथविरोधः। किंतु स्वरूपसंबंधरूपावच्छेदकत्वं स एव लघुगुरुसाधारणः। न च तद्व्याप्तेरेव तद्धर्मरूपावच्छेदकत्वं मानाभावादिति। वस्तुतस्तु इत्यादि वि
शेषव्याप्तिः साध्यवदन्यावृत्तित्वरूपा सामानाधिकरण्यावच्छेदकरूपवा धूमसमानाधिकरणेत्यादि व्याप्तिरूपत्वेन विशिष्टपरामर्शे धूमत्वस्याप्र
वेशादसंगत्यापत्तेरिति। अतिरिक्तव्याप्तिर्नामिति संभवति येन धूमसमानाधिकरणाभावप्रतियोगितानवच्छेदकत्वापेक्षया वह्निमदन्यावृत्तिसमानाधि
करणाभावप्रतियोगितानवच्छेदकत्वस्यातिरिक्तत्वात्। अतिप्रसंगादिति। अयं धूमवानिति ज्ञानादनुमित्यापत्तेरिति भावः। नदानीमिति। व्याप्तेर्व्या
प्तिमादायानन्वयेन शब्दादवच्छेदकत्वालाभादिति। मानाभावादिति न च त्वक्त्वकारणस्याभाव एव मानं तस्यैव। त्वक्त्वत्वाभावात्। अत एवाह अ
न्यथेति यथास्माकं अतींद्रियस्थले विशिष्टज्ञानं कल्प्यं तथा भवतामपि विशिष्टज्ञानस्थले द्वेराधिलंबेन तत्तज्ज्ञानकल्पनमिति कल्प्यत्वाभि
प्रायार्थः। एतेन लघुकलापकेन व्याप्तीतिनेन च कस्थलेऽनन्यत्वमादायापि संग्रहः। सामान्येति तेषां मते महानसीयधूमस्यैव व्याप्तिग्रहविषयत्वात्
अस्माकं तु सामान्यलक्षणया धूमसामान्यस्य तत्त्वात्। तथात्वं व्याप्तिग्रहविषयधर्ममात्रवृत्तित्वं न तु तथापि सामान्यलक्षणावादिमते तदेव हेतुता

अ॰सि॰टी॰ वच्छेदकमस्त्वित्यत आह प्रमेयमिति स्वरूपकथनमिदं विधेयतावच्छेदकाय व्याप्तीति तथा च धूमत्वस्य तदानीं तत्सामानाधिकरण्यग्रहान्न तेनाप्ति
१७५ व्याप्तिरिति भावः। तादृशो धर्मः व्याप्तिग्रहविषयमात्रवृत्तिधर्मः। सेति सर्वधूमनिवारणाय तत्र धूमसत्त्वे वह्नेरपि संभवादिति भावः। उक्तज्ञानात् व
ह्निव्याप्यं सर्वमित्यादिज्ञानात्। ननु व्याप्यत्वनिरुक्तवृत्तितया व्याप्तिसमानाधिकरणाभावं वाच्यं सा धूमे — त्येवतत्त्वस्य धूमव्यावर्तकत्त्वाद् धूम
त्वस्यातिरिक्तता न संभवतीत्यत आह तादृशेति तथा च व्याप्ते व्याप्तिसामानाधिकरण्यभानमेव व्याहतमिति भावः। अत एव लाघवादेव व्याप्यभानां
तादृशस्य व्याप्तिविषयतान्तर्गतप्रकारकताशालीत्यर्थः। तत्र व्याप्तिघटकपदार्थानां व्याप्तेश्च सुलभमिति। तादृशो धर्मः व्याप्तिग्रहविषयध
र्ममात्रवृत्तिधर्मः। इदमेव विषदयति वह्निव्याप्येति धूमसमानाधिकरणेत्यादि व्याप्यत्वभानांशे धूमत्वस्य प्रकारार्थं व्याप्यमित्यत्र राम
साध्यवदन्यादिरूपा व्याप्तिर्बोध्या। धूमसमानाधिकरणेत्यादि (व्याप्यत्वभानांशे) व्याप्येति तथा ज्ञाने ऽनुमितेरेव स्वीकारात्। हेतुस १७५
मानाधिकरणेत्यादि व्याप्तिमतीत्यत आह प्रमेयत्वेति व्यतिरेकिनि समानाधिकरणत्वस्य व्याप्तिग्रहविषयमात्रवृत्तित्वाभावात् केवलान्व

ऽनुधावनं समानाधिकरणत्वस्य व्याप्तिग्रहविषयत्वान्नः पातित्प्रकारभावत्वं स्फुटमेव। एवं विधेनियतत् किंचित्प्रकारकमेव पक्षधर्मता
ज्ञानं कारणं वाच्यं तत्प्रकारीभूतसामान्यस्य वक्तनोऽतिरिक्तवृत्तित्वग्रहे स एव प्रतिबंधकः। अन्यथाऽनुमितेरेव सुवचनत्वादिति भावः।
विशेषणतान्तं। ननु गृह्यमानव्याप्यनतिरिक्तवृत्तिताकधर्मप्रकारकमेव पक्षधर्मतादिज्ञानं तथा वाच्यं शा इत्यस्य तु तुला विलक्षणवानुश
रीरणीय इत्यत आह किंचेति स्वसमानेति। स्वं पक्षधर्मताज्ञानं। मात्रवृत्तीति मात्रवृत्तित्वावगाहीत्यर्थः। तेन धूमसमानाधिकरणत्वादि
पूर्वोक्तदूषणनिरासः। मिथ इति ज्ञानानां परस्परव्यभिचारेणानुमित्याकृत्यत्वेऽपि इति भावः। पक्षधर्मतेति तत्तज्ज्ञानं परिचायकं गम
कतानु तेन तेनेति भावः। एतेन तत्तद्व्यक्तिविश्रान्तमूर्तिकत्वेन तथा दर्शितं यथेत्यादि परामर्शप्रथमपङ्क्तिकावसरे तथा दर्शितं प्रकार
द्वयं विशेषणविशेष्यभावव्यत्यासेन पवमिति अत्र धूमत्वस्यापि विशेषणस्य प्रवेशात् पूर्वतो भेदः। अत एव तदेव दूषयति। तत्तदिति।
पूर्वदोषापेक्षया प्रकारः। ननु व्यापकतां प्रति दुष्टसाधनताज्ञानस्य हेतुत्वं दृष्टत्वं च दृष्टाविषयीभूतत्वं तथा च तत्रापि पुरुषकालविक

अभिह० १७६

न्यसंभव इत्यत आह यद्वेति। प्रतिबध्यत इति। तत्फले कार्यतावच्छेदकत्वसाधारणज्ञानस्य यदुभयोरेव सामानाधिकरण्यप्रत्यासत्त्या हेतुत्वस्य व
द्यमानत्वादिति भावः। ननु कल्पत्वाविशेषे पीत्यादियुक्ते युगपदुपस्थितत्वेन संभव इति मूलं तदुपपादकत्वेनावतारयति नन्वित्यादिना प
रामर्शकारणत्ववादिनामपि धूमत्वमादायाननुगमसहिष्णुतया आवश्यकत्वात् व्यापकपर्यन्तस्य उभयोरेव तुल्यता तथा च किमर्थं
समानाधिकरणपर्यन्तं हेतुतायां निवेशनीयमिति देशयितुरभिप्रायः। उपयोगनानन्तरमाह अयमित्यादि अत्र व्याप्तिर्धूमसमानाधिक
रणेत्यादिकेवल्या व्याप्यत्वमर्थमेव तस्य विशिष्टधूमात्मकत्वं पूर्वमेव व्यवस्थापितमिति उपदर्शितं विशिष्टधूमात्मकत्वं अव्यापक
त्वादि तस्य उपदर्शितज्ञानेषु चर्चांनिमयोरिति शेषः। ननु अखण्डविशिष्टव्याप्तिप्रकारकत्वं वद्यमानायुक्त्या भवतामप्यनुपपन्नमि राम
तितादृशतावत्त्वं उपप्रकारकताशालित्वेनेव ज्ञानं वाच्यं तथा च व्यावर्त्तकत्वपर्यन्तप्रकारकताशालित्वमेवास्तु लाघवादित्यभिप्रा १७६
येणाह किंचेति। अत एव उक्तसकलविशिष्टव्यापकत्वाव्यापकत्वे अकिंचित्कर एव विशिष्टधूमत्वपर्यन्तप्रकारकताशालित्व विशेषस्ये

वाभिनिवेशात्तदुक्तलाघवमकिंचित्करमेवेतिपरास्तं। अधिकमग्रादाविति। इदं तु सामानाधिकरण्यज्ञानस्य हेतुत्वे ननु धूमव्यापकोवह्निः धूम
समानाधिकरणो न वेति संशयेऽनुमित्यापत्तिरित्यत आह यथा चेति वह्न्यन्तरेति व्यापकताज्ञानवादिनिराकरणादिति विशेषः। ग्रहमात्रेऽन्या
दित्त्पुरुषीयत्वतत्कालीनत्वमादाय प्रत्येकं विश्रान्तेरित्यर्थः। तद्धर्मनिरूपितव्यापकत्वावगाहित्वविशिष्टतद्धर्मप्रकारकपक्षधर्मता
ज्ञानत्वेनैव हेतुत्वं वाच्यं तथा सति नोक्तदोष इत्यत आह एवमपीति ननु भवन्मतेऽप्येतत्समानमित्यत आह व्यभिचारेति इदं च संप्रदायमनुक
थ्योक्तं स्वमतं त्वग्रे प्रतिपादयिष्यतीति नव्यत्रेति आलोकादिग्रहादौ कार्ये सोऽवानुमितिरूपे ग्राकारणारूपपरामर्शोऽनुमेये तदंशे कारणतायां
ह एव च तत्कल्पनात्मकगौरवज्ञानेन प्रतिबध्यत इति समुदायार्थः। इदमित्यस्य विवरणं निर्वाह्यत्वादितिपर्यन्तेन न त्विति तत्सं
भावनं प्रायश इति यत्र नापूर्वकल्पनव्याप्तिस्तस्य निरासाय न त्वत्रेति यत्र यत्र विलय आपादितत्वस्यार्थः। आवेदितत्वादिति अनुप
दमित्यादिव्यभिचारनिर्णये सत्यपि लाघवमकिंचित्करमत आह व्यभिचारेति। अनुमितेरेकेति नित्यपरिमाणावगगनं निरवयवद्रव्य

अशि॰ मित्याकारकेत्यर्थः यदि च नियमांशाग्रहेऽपि एकविशिष्टापरानुमितिमादाय तथा प्रकारः संभवति न तदा यत्र न तत्र व्यवकाशः तत्रापि परामर्श
१७७ संभवात् उपनीतभानावश्यकत्वं । एकसंबंधीति । यत्र व्याप्तिघटकीभूतं यत्किंचित्पदार्थस्मृत्वान्यस्मृतं तत्रेत्यर्थः यं जनयित्वेवेति त
थाच तादृशकार्यतावच्छेदकावच्छेदेन तथा नियमाभावात् न तस्य व्यापारत्वमिति भावः ननु तद्व्यक्तित्वरूपकार्यतावच्छेदकावच्छेदेन नियम
मसत्वात् तथापि तद्व्यक्तिं प्रतिव्यापारत्वमक्षुण्णमेवेत्यत आह वस्तुतस्त्विति । प्रमाणांतरेति प्रमाणांतरत्वेन परिगणनमित्यर्थः (न
नु अनुपलंभबाधोऽसिद्धः तस्य मानसिद्धत्वादत आह मानाभावादिति ननु उपनयजन्यरूपविशिष्टकारणान्यथानुपपत्तिरेव मानमत
आह उपनयस्य वेति ज्ञानत्वव्यवस्थापकेति तस्य [illegible] प्रकारणमुद्रैव कारणत्वान्न तथेति भावः अत एवेति यत एव उपनयस्य न वै राम
ज्ञानत्वव्यवस्थापकत्वमत एवेत्यर्थः । बाह्याभ्यंतरेति तं त्रेतथालिखनादिति लिखितं आदिपदात् स्वसंबंधिकवेद्यादिपरिग्रहः ॥ १७७
तत्रेति । प्रत्यभिज्ञायां प्रतियोगीति साहश्याभावयोरुभयोरपीति ) अन्यथा उपनयजन्यतावच्छेदकजातिस्वीकारे जातीति इदं त्वो

शेऽप्रत्यक्षत्वं तन्मांशे च तादृशज्ञानमत्रमिति। ननु प्रत्यभिज्ञादिकं ज्ञानद्वयमेवेति कुः संकर इत्यत आह ज्ञानद्वयेति। स्थैर्यमात्रमिति पूर्व
कालीनधर्मवदभेदस्यापि तत्कालावच्छेदेन भानात् स्थैर्यं तत्र स्यादित्यर्थः। ननु स्थैर्यं लाघवादिकमेवोपष्टम्भकं भविष्यतीत्यत आह व्यव
स्थापितमेवेति अन्यथाख्यातावितिशेषः। नचेति तथाच केवलमानसोपनीतभाने साजात्यं स्यादिति हृदयं। ननु प्रमाणान्तरासहकृतो
पनयत्वेन वा जनकत्वं वास्तवं प्रमाणान्तरासहकृतत्वं वाच्यमेवेति तत्र आद्ये आह इन्द्रेति। अन्त्ये त्वाह असिद्धेति। असिद्धिमेव विवृ
णोति उपनयेति नन्वेवमिति धारावाहिकेऽविशेषणास्पदं दण्डादेर्विशेष्यवृत्तितयैव लोकज्ञानादिति भावः। इतरेति प्रकृतज्ञानविशेष्ये
तरेत्यर्थः। यत्र प्रथमज्ञाने दण्डश्चैत्रे मैत्रेन भातस्तत्र कालं बाधादिवशात् केवलचैत्रे एव भातस्तत्रेतर विशेषतात्वस्य सत्त्वादाह मात्रे
ति। नन्वेतीति तथाच मूले चकारो वाकारार्थः अहापत्तिरिति तन्मते त्वभावविशेषणतात्वेन स्वतन्त्रविशेषणताया अभावादिति हृदयं बल
वत्त्वेति फलबलादेव तथाकल्पनं अन्यथानुसंशय इष्ट इवेति भावः। कश्चिदित्यस्य रसो द्रावनं तद्वीजं नु यत्र घटाभावद् इति स्मरणादे

वविशेषादर्शनादिवशात् घटसंशयस्तत्र न व्यभिचारीति अभ्युपेत्य वस्तुतः तु इति प्रतिबंदेरिति मूलमवेद्याह वस्तुतस्त्विति। साध्या
रणधर्मेति प्रत्यक्षमभिप्रेत्य स्वमते तु कोटिद्वयस्मृतिमात्रस्य विशेषणज्ञानतया हेतुत्वेन न तथात्वमिति। एतेनेति तादृशनि
यमस्वीकारेणेत्यर्थः। पूर्वपक्षोपदर्शितं समाधानं दूषयति अत एवेति ननु अन्वयव्यतिरेकावेव मानमत आह चंदनत्वे
ति। इदं सुरभीति यत्र घ्राणादि उपनीतचंदनत्वभासकसामग्रीसत्त्वात् चंदनत्वावच्छेदेनापि भासत एवेति इदं सुरभीत्यादिप्र
त्यक्षं विरुद्धं तथापि यदि तद्धर्ममात्रावच्छेदेन तदुत्पत्तेन ताइदं चंदनं सुरभीत्यत्र व्यभिचारप्रयोजनविरहात् चंदनत्वं न
तिरिक्तमिति। यदि च यद्धर्मभानं नैयत्यं तत्राह यदि चेति साधनकाभावादिति इदं न बाधे विवेचयिष्यते पक्षोसाध्ये हे
त्वनेन हेतुसाध्यकेत्यादि मूलीयं पौनरुक्त्यमुद्धृतिसंबंधिद्वयेति। न च पक्षे धर्मेत्यादि मूलमभिप्रेत्याह तदन्यादरेणेति
हेतुमानादरेपि। विशेषणविशेष्यसंबंधस्यानीतत्वेपि प्रमात्वप्रयोजकत्वादाह लौकिकत्व इति कश्चिदिति तथावकाशि

त्तयोपयोगः कश्चिदित्यमुपयोगः सामान्य इति धूमत्वेन वह्निव्याप्तिज्ञानेनेत्यर्थः इदं च धूमत्ववह्नित्वयोरनुगमादनुगतमिति हृदयं । नन्वि
त्यादिपरमाणुमानदेश इति वदित्यर्थः मानसोपनीतभानवारणायाह वह्निरिति इदं रजतमित्यादितादात्म्यारोपवारणायाह आधेय
तयेति । दंडीत्यत्र आधेयतया दंडस्य विशेष्यत्वेऽपि तत्त्वाभावादाह तत्त्वस्यैवेति व्यभिचारादिति दंडी पुरुष इत्यत्र पुरुषांशे दंडवत्त्वस्य भाना
दिति । कथमन्यथेति यदीदृशनियमस्वीकार इत्यर्थः । मुख्यविशेष्य इति तज्ज्ञानविशेषणतानाश्रयत्वे सतीति तत्र ज्ञानविशेष्यत्वं दं
डात्मकतज्ज्ञानावगाहि प्रत्यभिज्ञायां तज्ज्ञावदभेदांशे दंडस्य साक्षाद्विशेषणत्वेन व्यभिचारवारणाय । यद्यपीत्यमपि तज्ज्ञावत्त्वाद्धर्मि
त्मकतया तादात्म्येन विशेषणत्वेन मुख्यविशेष्यत्वं तथापि तादृशविशेषणतानवच्छिन्नविशेष्यत्वं वाच्यं । न दंडादेरिति । निरुक्त
मुख्यविशेष्यत्वं अयमंशोऽसद् इत्यंशे दंडस्य साक्षात्कारत्वेऽपि न मुख्यविशेष्यतावच्छिन्नेत्यात्वमिति भावः । ननु तन्नियतलघुध
र्मान्तराभावेन तथा कार्यकारणभावे प्रमाणानां पक्षपातन इत्यत आह धूमवानिति व्यभिचारादिति तथा च व्यभिचार एव तत्कल्पने

अशिक १७९ बाधकत्वमिति भावः। ननु सामान्यलक्षणाघटजन्यत्वं विशेषणं देयं अत आह तन्नेति तथाच नत्रैवभिकन्न कार्यकारणभावव्यभिचारः
नानु तद्धिवादग्रस्तं इत्यत आह प्रकृतेपीति कृतार्थत्वादिति अयमभिसंधिः पर्वतो वह्निमान्नवेति संशयविरोधितया च प्रवृत्त्यनुकूलं प
र्वतो वह्निमानयमिति ज्ञानेन अनन्तसंसर्गावगाहितत्तादात्म्यावगाहिवा भवतु न कश्चिद्विशेष इति। एतेनेति वक्ष्यमाणेनेत्यर्थः। तादृशाद्र
व्यग्रहे आधेयतयेति प्रतिपादितद्रव्यग्रहे येत्रपदेति नाम विशिष्टनामिश्रत्वदौर्यघानामंशेऽलौकिकसन्निकर्षविशेषानुभविकं तथै
तदपि दूतिसूचयितुमेतदिति अतीतत्वानवगाहीति यदि कश्चिद्ब्रूयात् तत्राह अयं दण्डीत्यादि। अथ तत्र विद्यमानत्वमपि विशेषणं
देयं अत आह तत्ताल्यस्येति तथाच प्रकृतेपि पर्वतो वह्निमानिति ज्ञानस्य तत्ताकारोपनीतत्वेन तत्र संयोगो न हेतुरिति उपनी राम १७९
तमानेन किंचिदपि बाधकमिति भावः। ननु तत्कृतप्रयोगजननाभावप्रवाऽवच्छेदकः तथाच प्रकृतज्ञानं कथं संयोगं विनाउपपद्य
तइत्यत आह तच्छेदेति निमित्तांतरं तादृशप्रयोगजनकेष्टसाधनताज्ञानं। ननु फलाभावस्य तथात्वेपि फलजननयोग्यत्वं

वक्रत्वमत आह न उक्तनयेनेति तथा च तदिति रूपस्थल एव संयोगस्य हेतुत्वात्र कृते उपनीतभानत्वमनुक्तमिति भावः। अत एवेति यतएव
चतन्यात्मकताऽदृश द्रव्यग्रहे व्यभिचारो ऽत एवेत्यर्थः। अत एवोक्तरहेतो वक्रोऽरः चक्षुषाकाशोपनीतभानस्यावर्त्तनायाह तदिंद्रियेत्यादि त
त्वादि घ्राणजन्यादृश द्रव्योपनीतभौवारणाय तदिति। एवं अतीतादि तदिंद्रियग्राह्योपनीतभानवारणाय विद्यमानेति चक्षुर्ग्राह्यतादृश
द्रव्यस्यान्येंद्रियोपनीतभानव्यावर्त्तनायाह तेनेति। रजतादेरित्यत्र रजतपदं विद्यमानरजतपरं। अभेदारोपादिति। आदिपदेन तत्सा
दृश्यपरिग्रहः अन्यादृशोपनीतभानस्य अथैवमित्यादिना शंकनीयत्वात्। एवं तदिंद्रियेत्यादि। निराकरणे व्यवहितेति संयोगाभावस्येरा
रणाय ननु व्यवहितेत्यादौ दंडज्ञानापादनं दंडस्मृत्यभावदशायां दंडे ज्ञानाभावस्मृति दशायां वा आद्ये आह क्वचिदिति तत्सहचरितध
र्मस्य तदुद्बोधकत्वादित्यर्थः। द्वितीये त्वाह क्वचिदिति साधारणधर्मादीत्यादिपदेन विशेषादर्शनपरिग्रहः अत एव तद्दर्शनस्थलमाह
सतीरेति। निश्चयमापादयतः शं किं तु नेत संशयो भवतीत्याशयमभिप्रेत्याह उक्तं चैतदिति। असौ संशयरूपा चाक्षुषी धीः न द्विशिष्टेति।

अ०शि०कृ
१८०

यद्यपि तद्धीरेव चक्षुर्युक्ता तथापि कदाचित् द्विरिष्ट प्रत्यक्षेति तेन तथाकारणत्वमुक्तं न तदिति तथापि अयत्नमेव कार्यतावच्छेदकत्वंआ
र्थवशसंपन्नत्वात् तद्रूपाशयेनाह उक्तमिति संशयाच्चेति दृष्टान्तार्थं आम्कपेत्याह अस्तु वेति। तथा वान्यत्र तथात्वेपि प्रकृते नेत्यर्थः न देव
प्रकाशयति तथापीति अभ्युपगमवादेनाह माभूद्वेति अत्यंतमिति परमाणुरूपवादित्यादावनुपपन्नेरित्यर्थः। किमेवमिति प्रत्यक्षत्वाति
रिक्त प्रमाणानभ्युपगमे प्रत्यक्षत्वमेवानुभवत्वमिति साध्याविशेषदृष्टिभावः साध्याविशेषं परिहरन् शंकते स्मृत्यन्येति। अनुमित्वं तर
कत्वंत्यायांगौरवमेव विपक्षे बाधकमित्यत आह अनुमितावितिं। न झोंजकेति परमाणुगुरुत्वादिकरणामित्यत्र साक्षात्कारित्व ग्रहाप
त्त्यानत्वकत्वं नमिति भावः। आत्मानुमिताविति आत्ममनःसंयोगस्यैव तत्सन्निकर्षत्वादिति भावः। नन्वतिरिक्तानुमितिस्वीकारे व्याप्त्याप
नीत्तमाने कथं न साक्षात्कारित्वग्रहः अथ आत्मन उपनीतत्वादितरेलौकिकसन्निकर्षसत्त्वात्तदंशे लौकिकमेवेति चेत्तर्हि स
मानविषये प्रत्यक्षसामग्र्यावैव सत्त्वादनुमितेरप्यभावः फलबलेन तत्संयोगव्यक्तेर्न संनिकर्षत्वमिति चेत् इहापि तुल्यं इच्छाधीना

ला१

राम
१८०

नुमितौ वसाक्षात्वाभावग्रहोपि विवादग्रस्त इत्यत आह वह्निमिति। नतु सौरभं न पश्यामीतिवत् तस्यापि बाधितत्वं स्यादित्यत आह अगत्ये
ति यदनं साक्षात्करोमीति प्रतीत्या तत्र साक्षात्कारित्वसिद्धेस्तस्य वाव्याप्यवृत्तित्वमनुपपन्नमिति तत्प्रतीतेर्भ्रान्तत्वं इह तु छाप्यंशेन साक्षात्
कारित्वग्रह इति हृदयं यदि पुनस्तस्मिन्नेव ज्ञाने पर्वतमित्यंशे साक्षात्कारित्वधीस्तदाह सामान्येति। तदंगीकारेण पर्वतीयवह्नेर्ज्ञान
लक्षणासंनिकर्षत्वादिति। इत्थं च सन्निकर्षाभावबलेन वह्न्यंशे ह्यनुमितौ प्रत्यक्षत्वाभावसिद्धौ संभवत्यपि पक्षांशे साक्षात्वधीभ्रा
न्तेति भावः। एतेन तु क्तप्रकारेण मतांतरं शंकते व्यवस्थापयिष्यत इति जातिसंकरेति अयं घट इत्यादौ अनुमितित्वं विना प्रत्यक्षत्वं सत्वं प्रत्य
क्षत्वं विना चाप्रसिद्धसाध्यकानुमितौ वानुमितित्वं पर्वतो वह्निमानित्यादौ चतयोः समावेशे संकरः केचिदित्यनेन तस्याप्यर्थापत्तिज्ञानतया
अनुमितित्वं विवादग्रस्तमित्यर्थ संदर्शितः। अत एवोक्तं व्यवस्थापयिष्यत इति तत्संभवेपि इष्टापत्तिमपरे आमाह तत्रेति। तथा च सामान्य
लक्षणया प्रकृते नेदस्यापि ज्ञानलक्षणासंनिकर्षादिति भावः। कदाचिदनुमित्यन्यथानुपपत्तिरेव मानं भविष्यतीति यदि परो ब्रूयात्

अ॰शि॰कृ॰ तत्राह तन्निष्ठेति । अयमभिसंधिः हेतुसमानाधिकरणेत्यादि व्याप्तौ हेतुतावच्छेदकमवश्यं निविशत एव साध्याभाववद्वृत्तित्वमित्यत्राप्यधिका-
१८१ रणतावच्छेदकत्वेन तस्य प्रवेशः तथा च यदा धूमवत्त्वत्वादिकं पक्षानुपस्थितं तदानीमप्यनुमितेरानुभविकत्वात् स पक्षो नेतिन च धूम-
त्वांशे धूमत्वमेव प्रकारः धूम इति ज्ञानस्य धूमवदित्याकारतापत्तेः । अधिकरणतावच्छेदकमिश्रिताभावज्ञानं तु अनुभवविरुद्धमिति इत्य-
मेव व्यापकताज्ञानकारणताखंडनेव क्लृप्तत्वात् धूमपस्थितौ विवेचनीयं उभयथापीति व्याप्यविशेष्यकत्वेन पक्षविशेष्यकत्वेनेत्यर्थः । मू-
ले तृतीयेति व्याप्तिज्ञानं ततो व्याप्तिविशिष्टज्ञानं ततो व्याप्तिविशिष्टज्ञानं ततो व्याप्यविशिष्टज्ञानं मिति क्रमेणेत्यर्थः । वस्तुत इति संप्रदायम-
नुरुध्य स्वमते तु साह ज्ञिकपक्षविशेष्यकानुमितिसमानाकारतया पक्षविशेष्यस्यैव हेतुत्वं अत एवानुमितिलक्षणे तथैवोक्तमिति । तादृशे- राम
ति यस्य प्रतियोग्यधिकरणं प्रसिद्धं तदभावस्यैव संग्रहाद्गगनादेस्तादृशाभावाप्रतियोगित्वमित्यखंडलार्थः आपातत इति वस्तुतो येषां प्र- १८१
तियोग्यधिकरणवृत्तित्वं प्रसिद्धं तदन्यत्वस्य तादृशप्रतियोगिप्रतियोगिकत्वस्यैवं तत्प्रदर्शितोभयाभावत्वस्याखंडशो निरुक्तस्य गगनाभा-

वेपि संभवान्न तद्वारणाय विशेषणमिति भावः। तथापीति तावतैव गगनादिवारणं। एवं सामानाधिकरण्याप्रक्षेपे इत्यादिति धूमवह्निसामा-
नाधिकरण्यसंशयेपि वह्नेर्व्यापकत्वग्रहाधीनानुमितिर्जायेतैवेत्यर्थः। व्यतिरेकेति धूमो न वह्निसमानाधिकरण इति निश्चय इत्यर्थः। तथा च
तादृशनिश्चयेपि यदि धूमस्य पक्षधर्मताज्ञानं तदा परामर्शविलंबादेवानुमित्यभावः। अथ तत्र ज्ञानं तदा वह्न्यसमानाधिकरणघटवानि-
त्यादिज्ञानानां प्रतिबंधकत्वपक्षेन्यप्रतिबंधादेव फलाभावः। तदप्रतिबंधकत्वेनुफलमेवेति समुदायार्थः। ननु धूमवद्वृत्तिः पर्वतो धूमव्या-
पको वह्निरित्यतोप्यनुमितिः स्यादित्यत आह पर्वतइत्यादि। तुल्येति पाषाणमयत्वधूमयोः पर्वतवृत्तित्वज्ञानाविशेषात्प्रतिबंधक-
त्वाप्रतिबंधकत्वाभ्यां फलाभावफलयोः स्वीकारादिति भावः। उपाध्यायमतं शंकते नन्वेति। स्वहेतुः भवति हि वह्निमान्धूमादित्यत्र धू-
मसमानाधिकरणाः सर्वेऽभावा वह्न्यप्रतियोगिका इति यावत्त्वं च धूमवान्वह्नेरित्यत्रापि घटाभावस्य तथात्वादतिव्याप्तिनिरासा-
य अन्यंतपदं स्वसाध्यान्योन्याभाववारणाय साध्यप्रतियोगिकत्वं च साध्यतावच्छेदकावच्छिन्नप्रतियोगित्वं अन्यथा सत्तावान्-

क१

अशिक्ष
१८२ जातेरित्यत्र साधनसमानाधिकरणविशिष्टसत्ताभावस्य साध्यप्रतियोगित्वादव्याप्तिरिति भावः। यावत्त्वस्य व्यापकत्वपरत्वमत आह साध्ये
ति। तत्रावच्छेदकत्वं स्वरूपसंबंधविशेषः। ननु केवलान्वयिनि साध्यप्रतियोगित्वाप्रसिद्ध्यानेनत्वेदृशामित्यत आह साध्येति। प्रमेय
साध्यके साध्यतावच्छेदकावच्छिन्नान्योन्याभावाप्रसिद्ध्या आह संबंधविशेषेणेति। इत्थं वान्योन्याभावात्यंताभावप्रतियोगितयोरेकधर्मा
नवच्छिन्नत्वेपि न क्षतिः। प्रथमे दूषणमाह व्यापकत्वेनेति। द्वितीये दूषणमाह प्रमाणाभावेनेति तथा च मदुक्तव्यापकत्वापेक्षया इदं गुरु
मनभिमतमिति भावः। ननु त्वदुक्तव्यापकतायामपि अप्रतियोगित्वमित्यस्य यावत्त्वप्रवेशान्नवापि गौरवमत आह व्यापकतायां चेति। नन्वेतत्
स्यास्मन्मतेऽप्रवेशान्नव्याप्तिसाम्यमित्यत आह संबंधादीति। धूमवान्वह्नेरित्यत्र धूमप्रतियोगिकत्वं यद्धूमसंबंधव्यक्तौ तदभावो धूमा
भाववद्वृत्ति इत्यस्य त्वयापि वाच्यत्वान्न लघुत्वादिति व्यापकत्वे प्रतियोगितावच्छेदकत्वादीनां तेषां प्रवेश इह तु संबंधविधया वेति राम
लाघवमित्यर्थः। उद्देश्येति धूमवान्वह्निमानित्यत्र धूमादेस्तथात्वमानुमविकमित्यर्थः तत्र विशेषणत्वं वा धर्मान्तरं वेत्यन्यदेतत्। १८२

न्वि
अत्यंताभावे प्रतियोगिवैयधिकरण्यस्य प्रवेशादाह अन्योन्याभावस्येति। विधेयधर्मेत्यादि अत्यंताभावेत्यादिना यथासंख्यमेवोक्तं
एवमग्रे नन्वित्यादावपि यद्यदिति यद्यप्येवं रीत्या एवकारस्यापि अन्ययोगव्यवच्छेदो नार्थः स्यात् अभिधेयं प्रमेयमेवेत्यादावभावात्त
थापि पार्थ एवेत्यादौ लाघवादनुभवाच्च अन्ययोगादौ शक्तिकल्पनेऽत्र कस्यचिल्लक्षणया निर्वाहः। इह तूदाहरणस्य कल्पितल
क्षणयोः संप्रदायविरुद्धत्वादिति अत एवान्यथेत्यादि मूलमपि। ननु साध्यायोगेऽन्यस्य साध्यसंबंधाभावात्मकतया मूलविरोधस्त्वतो
त्याज्य एव अयोगादिति मूलं योजयितव्यमिति। शरीरं स्यादित्यस्य समशीलं धुत्वं नरस्याहनस्याश्चेति। इदं च परार्थस्थलमभिप्रेत्य उदा
हरणं कल्पितलक्षणाभावादिति। वदंतीति साध्याभाववद्वृत्तित्वज्ञानस्य ग्राह्याभावानवगाहितया व्यापकत्वज्ञानाप्रतिबंधकत्वादि
त्यस्वरसो दर्शितः। प्राथमिकत्वमेवोपपादयति क्वचिदिति। ननु साध्यस्य प्रत्यक्षत्वेऽनुमितिरफला स्यादित्यत आह पक्षेति। तथा च त
दर्थमेवानुमानप्रवृत्तिरिति। न चेत्यादि अनुमितेः पर्वतव्याप्यवैशिष्ट्यावगाहिज्ञानमेव कारणं घटाभाववद्भूतलं दंडी पुरुष इत्यादौ त

अशि कृ तुभयवैशिष्ट्यधीर्नहेतुरिति व्यभिचारोद्धार:मानाभावादिति तथाचात्र योजकत्वं व्याप्तेरित्यर्थः वह्न्यादाविति पक्षधर्मः केवलान्वयिनोपि तथा वै
१८३ तादृशधर्मसमानाधिकरणात्यंताभावप्रतियोगित्वाद्वह्नेस्तत्प्रतियोगित्वज्ञानं भ्रमात्मकमिति भावः। कालिकसक्रमिति तादृशप्रतियोगित्वप्र
तियोगिकस्य व्यक्तिविशेषाभावस्य व्यासज्यवृत्तिप्रतियोगिकस्य धूमवान्वह्नेरित्यादावपि सुलभत्वादिति। पक्षधर्मधूमेति व्यापनं प
क्षधर्मत्वेनाज्ञातस्थलवृत्तिशेषः। यद्यपि केवलधूमसमानाधिकरणात्यंताभावाप्रतियोगित्वा[illegible]ज्ञानं यत्र तत्र पक्षवृत्तिधूमसामान्यघ
टितव्याप्तेरव्यापनाद्विशिष्येव कार्यकारणभावग्रहद्वारापि तुल्यः तथापि संयुक्तहेतुकपर्वतीयवह्न्यनुमित्यादौ अनुमितिसामान्यं प्र
ति न वह्न्यभाववदसंयुक्तत्वावच्छिन्नपर्वतवृत्तित्वज्ञानत्वेनैव हेतुत्वं संभवतीति भावः। येनरूपेणेति शाब्दवह्निव्याप्यवानित्यादौ तदभा राम
वादिति। न तु स्वर्गकामोऽग्निष्टोमेन यजेतेत्यत्राग्निष्टोमे स्वर्गसाधनत्वं विधेः प्रतीयते तेन अग्निष्टोमव्यापकत्वगर्भव्यापकत्वं यत्ता १८३
दृशप्रतियोगितानवच्छेदकत्वरूपं तच्च भवदुक्तक्रमेण बाधितं अग्निष्टोमत्वस्य वाजपेययजन्यस्वर्गसमानाधिकरणात्यंताभा

वप्रतियोगितावच्छेदकत्वात् अग्निष्टोमीयस्वर्गवैजात्यस्य कारणताग्रहोत्तरकल्प्यत्वादित्यत आह स्वर्गकाम इति तथा चाग्निष्टोम
वदन्यावृत्तिस्वर्ग इति तत्रान्वयबोधक्रमः। न च तदपि स्वर्गत्वावच्छेदेन बाधितमिति कथमेतदिति वाच्यं। अधिकरणतावच्छेदकस्य
सामानाधिकरण्येनाप्यन्वयदर्शनात् क्वान्यागंगायां नमत्स्य इत्यादीनां विलयप्रसंगात्। तन्मत्स्यत्वस्य प्रतियोगितावच्छेदकको
डीकृतत्वादिति। इत्थं च साध्यप्रकृत्यमेव विध्यर्थ इति भावः। पदविधायकत्वं पदविषयजनकत्वं वा योत्तरग्रंथसंदर्भसंभवादुत्पत्तौ
व्यावृत्ते परिचयेति। परिचयं व्यावर्तकत्वं परिचेयव्यावृत्तिबुद्धिजनकज्ञानप्रकारकत्वं उपलक्षणतया विशेषणतया वा तद्व्यतिप्रका
रकत्वमित्यर्थः। आद्यखंडं मूलं योजयति परिचेयादीति (प्रकारत्वं निरुक्तउपलक्षणविशेषणतान्यतरभिन्ने नापि संभवति यथा
घटत्वादेः तत्राह अवच्छेदकनेति। यथाकृतानुमानस्य पर्वतत्वादिजन्यतयाऽर्थान्तरत्वसंभवेनाह यायद्विशेषणेति। तादृशी बुद्धि
विशेष्यविधयाऽऽत्माद्विविशिष्टबुद्धिरूपेत्यर्थः) सामान्यव्याप्ताविति तथा च धूमरूपविशेषणमादाय हेतुसत्त्वेन धूमविशेषणाज्ञा

श्री शि कृ न्यत्वसिद्धेर्नार्थान्तरमित्यर्थः। धूमविशेषणीकेत्यादीति अत्रादिपदस्वरसाद्धूमविशेषणीका धूमसमानकालवह्निविषयानुमितिरि
१८४ त्येव मूलपाठः व्युत्क्रमपाठस्तु एतदसंमत एवेता दृश्यस्य धूमसमानकालीनत्वादिविषयत्वस्य आनुमानिकत्वेन एतदनुव्यवसायेन
तस्याविषयत्वमवगम्यत इति भावः। विशेषणजन्यत्वेतावतैव धूमजन्यतायां सिद्धायामधिकस्य ज्ञानभागस्य प्रयोजनमाह त
ज्ञानस्येति उक्तसामान्यव्याप्यत्वसाधने हेतुव्यावृत्तिं विशेषणमाह साध्यविशिष्टेत्यादि। धूमकालीनेति इदं स्वपक्षे विशेषणं धूममा
दाय हेतुसिद्ध्यर्थं धूमध्वंसादिनीति धूमध्वंसकालीनानुमितेर्धूमजन्यत्वव्यतिरेकस्य स्फुटतरसिद्ध्यर्थं ध्वंसानुधावनं विशेष्यत इ
ति विशेष्यः पर्वतः तत्रकालीनत्वं विशेषणं तत्र च धूमो विशेषणमित्यर्थः। तेन साक्षाद्विशेषणविशेष्यभावापन्नेन धूम इत्यर्थ इ राम
ति भावः। धर्मान्तरेति यत्र च कालिकसंबन्धेन पक्षतावच्छेदकविशेषणं कालान्तरीणसाध्यमादायानुमितिः तत्र पक्षतावच्छेदकस १८४
मानकालीनत्वं पक्षतावच्छेदकस्यैवेति तदजन्यतया व्यभिचारवारणायोक्तं। तदानीमित्यादि धूमवानितिपक्षे धूमस्य साक्षाद्वि

शेषणतालाभाय धूमकालीनेत्यादेः प्रयोजनं यो रूपमेव विशेषणादृत्तिविशेषणं कालीनवह्निः तत्र विशेषणतापन्नो धूमः ननु विशेष्ये वि
शेषणतापन्नः इत्यर्थः। यद्यप्येकएव धूमो विशेषणविशेष्ययोर्विशेषणतापन्नस्तथापि समानकालीनत्वांशे विशेष्ये विशेषणताप
न्नत्वेन तन्त्वं अत्रनुसमानकालीनत्वांशे विशेषणप्रतियोगिकविशेषणतया धूमवृत्तिर्विशेष्यनिरूपितेत्यर्थः। ननु तस्यैव विशेषणस्यद्वी
दृशावैलक्षण्ये किं प्रमाणमित्यत आह अनुभवेति दण्डवान्दण्डसंयोगवानित्यत्र दण्डवृत्तिर्यासंयोगनिरूपितविशेषणता सा न पुरु
षनिरूपिता किं तु दण्डवानित्यंशे यादण्डवृत्तिविशेषणता सा पुरुषनिरूपितैवेति तदनुव्यवसायसिद्धत्वादिति भावः। नान्विदमिति रि
क्तविशेषणतावादिमते घटतेस्वमतेतु तस्यैव विशेषणस्य तादृशत्व मित्यवरितुष्यन्नकल्पान्तरमाह विशेषणमिति। तदन्तर तथा
कल्पान्तरमाह विशेषणमितिकेचित्। ननु धूमवान्धूमसमानाधिकरणवह्निमानित्यादेयधर्मितावच्छेदक धूमसमानकालीन
त्वेन विधेयं भासत एवेति व्यभिचार इत्यत आह नद्येवेति अवच्छेदकविशेषणस्य प्रयोजनमाह धूमकालीनेति। यद्धर्मविशिष्ट इत्य

प्रशिक्
साध्योऽन्यमाह धूमवानयमिति। न धूमवत्त्वविशिष्ट इति अयमाशयः पक्षविशेषणानां न परस्परमुद्देश्यविधेयभावस्तथानुभवाभा-
१८५ वात् किन्तु तद्विशेषणविशिष्टं पक्षमुद्दिश्य साध्यं विधेयत्वेन भासत इति प्रकृतसंगतिः यद्यपि विधेयतावच्छेदकावच्छिन्नस्य यत्तत्समान-
कालीनत्वेन भानमित्येतावतैव प्रकृतसंगतौ यद्धर्मविशिष्टस्यार्थः तथापि विवक्षावच्छिन्नत्वावच्छिन्नत्वं द्वे विधेयस्य पक्षतावच्छेदक-
क्रोडे तत्समानकालीनत्वेन भानं वर्तत एवेत्यनुशयेन तद्धर्मविशिष्टांशे विधेयतावच्छेदकावच्छिन्नस्य तत्कालीनत्वमानमुक्तं
वह्निमच्चमित्यत्र भासत इत्यनुपपत्ते। तद्धर्मवत्तान्तरमाह संबंधेति। अत्रापि यत्तत्समानकालीनत्वं धर्मान्तरस्येति बोध्यं तेन पू-
र्वापरदर्शिनि स्थलविशेषे वदन्तीत्यनेन विशेष्यविषये त्यादि वैयर्थ्यरूपा स्वरसोदर्शित इति केचित्। तन्न ग तन्तरमते व्यवि- राम
शिष्टमित्युपेक्षितं किन्तु संबंधमर्यादानिर्वचनमेवास्वरसः अत एव तद्धित्याय तत्समशीलं अथवेत्यादौ वदन्ति १८
पूर्वमतेपि तादृशविधेयत्वेऽप्यनङ्गीकारत्यागमन्तरमाह अथवेति। विशिष्टत्वेनेत्यादि यत्र विशिष्टत्वविवक्षणात्वमित्य

र्थकं तथा व्याचष्टे विशिष्टत्वमिति। तच्चैवैलक्षण्यं विशेषणविशेष्यपदयोर्वैयर्थ्यादाह विशेषणेति। ननु समानकालत्वसंबंधेन यत्र
पक्षतावच्छेदकं तत्र पक्षतावच्छेदकाजन्यायां तादृशानुमितौ व्यभिचार इत्यत आह तथात्वेति। ननु तद्व्यापिसाध्येन समानकालीन
त्वावगाहनात्तत्रैव व्यभिचार इत्यत आह साध्यस्येति। ननु यत्र समानकालीनत्वमादाय समूहालंबनानुमितिस्तत्र तदनुमितौ समानका
लीनत्वग्रहजन्यत्वात्तदनुमितावसिद्धिरिति वाच्यं। यद्धर्मसमानकालीनत्वादिनैव तस्य निरासादिति। ननु नवीननये गंधप्रागभावा
वच्छिन्नो घटो गंधवानित्यत्र गंधप्रागभावकालीनत्वं गंधस्य बाधितमित्युक्तमित्यत आह नवीननये त्विति। इत्यन्यदेतदिति एतावता
कालावच्छिन्नत्वमित्येवायाति न तु पक्षधर्मतासमानकालीनत्वमिति भावः। दंडीति यत्रान्वयदा दंडी भवति तदा तथा गच्छतीति तात्प
र्यतात्तादृशशाब्दप्रयोगस्तत्र च व्यभिचारवारणं प्रकृते बोध्यं अन्यथा हेत्वाभावेनासंगत्यापत्तेः। नुत्वाऽनिरुपनीतभाने विषयस्याहेतुत्वा
दिति भावः। पक्षान्वय इति तेन तदानीं पर्वतो वह्निमान् धूमादित्यादौ न व्यभिचारः। अतीतत्वग्रहे तु ध्वंसादेरेव हेतुत्वमिति अतीतत्वाग्रह

शिक ९८६ ...तुमितं ... छिवादात्तद्वारणाय प्रकारांतरमाह कालइति। ननु यत्रातीतस्यैव वर्त्तमानकालीनत्वेनभ्रमं तत्र व्यभिचार इत्यत आह तद्देशेति
कश्चिदित्ययमपि कालेवर्त्तमानत्वंलघीयस्त्वाभिस्वतंत्रविशेषणाविद्वेषेणैव कश्चिदित्युक्तमिभ्रमत्वंपरिष्कुरुते केचित्विति। अत्रापिसामान्य
मुखीव्याप्तिः अन्यथाविद्यमानपक्षतावच्छेदकजन्यतामादायैवार्थान्तरं स्यात्। धर्मान्तरेत्यस्य व्यावृत्तिं दूर्वयुक्ता ननुसामान्यमुखव्याप्तौ
तादृशपक्षतावच्छेदकान्यतयानुमितौ व्यभिचार इत्यत आह समनेति। ननु यदि वर्त्तमानं विशेष्यतावच्छेदकं तदा तादृशज्ञा
नस्य तज्जन्यत्वमेवांगीकृतमतः किं समानकालीनत्वनुसरणेनेत्यत आह समानकालीनत्वेति। तादृश्यविषयत्वे समानका राम
लीनत्वविषयत्वे प्रतिज्ञायमानेति प्रतिज्ञायमानं तद्विशेष्यतावच्छेदकं तज्ज्ञानजन्यत्वस्येत्यर्थः। अतएवेत्यादिना मूलकारएव इदं १८।
प्रकटयिष्यति। परामृश्यमानतावेनेति फलजनकतावच्छेदकरूपेणैव व्यापारजननसमभिव्याहृत्य व्यापारमित्यादिपरामर्शं प्रति
रूपांतरेणहेतुत्वेपि अनुमितिं प्रति परामृश्यमानत्वेनैव हेतुत्वमित्यर्थः। कश्चिदिति दूर्वोक्तविनिगमनाविरहादिना व्यवस्थापि

नचितस्य स्वरूपसः स्वचितः स्वेति लिंगोपहितपरामर्शस्य कारणत्वमाह कं लिंगत्वावच्छेदेनैव परिच्छिन्नतीत्यर्थः। तदप्रसिद्धेति प्रसिद्धावपि लिंगत्वस्या
नुगतत्वाभावादिति। नावीतिमात्रपदेन व्याप्यत्वादिनिरासः। वह्निविति कस्यचित्परामर्शस्य यावद्वह्निसमूहालंबनरूपत्वेत्यर्थः। प्रामाणिक
त्वाभावमेव विवृणोति नत्येति। अन्यथा प्रामाणिकस्यापि कारणीभूतज्ञानविषयत्वेन हेतुत्वेऽदृष्टादौ व्यभिचारस्यामन्वयः तदुक्तमुप
ष्टंभकं दूषयति नवेति। ननु लिंगस्य हेतुत्वं ज्ञायमानत्वमात्रेण वा व्याप्तिपक्षधर्मत्वेन ज्ञायमानत्वेन वा आद्यं दूषयति। सेयव्याप्तिनेति
अंत्ये त्वाह व्याप्तीति लाघवादिति व्याप्तिपक्षधर्मत्वेन ज्ञायमानत्वापेक्षया व्याप्तिपक्षधर्मज्ञानस्यैव हेतुत्वादिति। ननु विषयविशेषज्ञान
हेतुतायां न दूनो नत्कत्व्यं। लिंगहेतुतायां तु स्वत्वस्येत्यत आह किंचेति तादृशेति परामर्शस्येत्यर्थः। कारणतावच्छेदकस्येति आलीढत्वे
यदा कदाचित्तदुपरक्तत्वं। न त्विति तद्विशिष्टत्वं तदुपहितत्वं। दूनदूति। यदा कदाचित्प्रतिबंधकाभाववतः प्रतिबंधकसमवहितस्या
पि वह्नेदीहापत्तिरित्यर्थः। अपि कारणतास्वातंत्र्येण पृथगन्वयव्यतिरेकौ स्तः इति नोनतूक्तमेव विषयविशेषज्ञानहेतुतायांभोरव मित्य

अशिक न आह परामर्शेति। अत्रेति तदुपहितस्य प्रयोजकत्वाभिधाने विशेषणस्यापि प्रयोजकत्वमावश्यकं तथा च बहुतरमपि तदेव कल्प्य
१८७ नेऽनन्त आह। आवश्यकत्वादिति। तत्रैवेति परामर्शहेतुत्व इत्यर्थः। अर्थेष्वपीति। इन्द्रियसंयोगोपलब्धेस्तस्यातिप्रसंगात्तदनुपलब्धि
तस्य कारणत्वेऽनुच्यमाने तस्यैव कारणत्वं युक्तमित्यर्थः स्यादेवेति आपाततोभंगीयं। वस्तुतस्त्विन्द्रियजन्यत्वस्य एकस्याभावाच्चक्षु
संयोगादिनैव कारणत्वं वाच्यं तत्र च लाघवात् चक्षुष्ट्वेनैव न त्वकल्प्यमेव चक्षुःसंयोगस्य तत्प्रत्यासत्तिः चक्षुःसंयोगस्य कारणत्वे
समवायः प्रत्यासन्निश्चेत्यत्रातिप्रसंगः। नन्विन्द्रियस्यातीन्द्रियतयाऽनन्वयादनियामकत्वमित्यत आह स्यादेवेति नोऽन्वयव्यतिरे
कोऽतस्य लिंगस्यानुपरामर्शोपहितत्वेन कारणत्वोक्तौ यद्यपि बहूनां परामर्शानां नियामकत्वमप्यावश्यकं तथापि तदवच्छेदक राम
त्वेनैव कारणत्वं विषयविशेषेण लघोरेकस्य लिंगस्येत्यत आह अपि वेति चैत्रेणेति अस्मन्मते तु परामर्शस्य सामानाधिकरण्य १८७
प्रत्यासत्त्यानतिप्रसंगात् कारणमित्यनुपदमेव वक्ष्यतीति तदिति भिन्नकालमादायातिप्रसंगस्तु परामर्शोपहितस्य कारणत्वविवक्षायैव

निरसनीय इति भावः। इच्छादौ तु नादौ व यथासंख्यमन्वयः। एकार्थेति। एकस्मिन्नात्मनि कार्यकारणयोर्या प्रत्यासत्तिः समवायलक्ष
णा तयेत्यर्थः। अत्र वदंति परामर्शस्यानुमितिसमवायिसमवेतत्वं वा प्रत्यासत्तिः तदनुमितिसमवायिसमवेतत्वं वा। आद्ये चैत्रस्यपरा
मर्शसत्वेपि मैत्रस्यानुमित्यापत्तिः। अनुमितिसमवायिनि समवायेन परामर्शस्य सत्वात्त्वे चैत्रस्यापि अनुमितिसमवायित्वात्। अंत्ये का
र्य घटितसंबंधस्य कार्योत्पत्तेः प्रागसिद्धौ अन्वयव्यतिरेकग्रहासंभवः तत्तत्संबंधावच्छेदभेदेन व्यापकताभेदात् कारणतानंत्यं
चेति। एकेति पर्वतो वह्निमान् धूमादित्यादौ वह्निभिन्नत्वं हेतुधाकरणीयं घटरूपं तत्र घटभिन्नत्वे सति अघटनिर्वह्निभिन्नत्वं एका
न्योन्याभावविशिष्टापरान्योन्याभावरूपं इत्थं सर्वत्रैव बोध्यं यद्यपि साध्यवह्निभिन्नत्वमेकमप्यस्ति तथापि तस्य साध्यात्मक
तयाभासिसाध्यकेवर्तमानत्वमिति। ननु लिंगकालीनत्वं साध्यस्याभावतद्वृत्त्यनुपदमुक्तं तत्कथं धूमप्रागभावादिकमादाय आधे
याद्विसंयोत्थानं ... ते। नावं सूत्रयति तस्यान्येति। नावच्छेदकेन व्याप्यतावच्छेदकं भिन्नं वा तद्वृत्ति तथापि व्याप्तिर्वर्तते इति भावः।

धूमप्रागभावत्वादेरवच्छेदकत्वं साधयति नवेत्तदपीति तस्येव धूमप्रागभावत्वस्यैव न्यूनत्वात्। अन्यथाव्याप्तेरवच्छेदकासमवधाने प्र
तियोगित्वादीत्यापाततः वस्तुतस्तु तदवच्छेदकत्वाभाव एव बोध्यः नचेति धूमसमानाधिकरणात्यन्ताभावप्रतियोगितावच्छेदक
भिन्नत्वं नु सामान्यान्योन्याभावः तत्र च यावत्सु अवच्छेदकेषु धूमसमानाधिकरणात्यन्ताभावप्रतियोगितावच्छेदकत्वं धूमप्रागभा
वसमानाधिकरणाभावप्रतियोगितावच्छेदकत्वं च वर्त्तते तत्र लाघवेन धूमघटितताद्दशधर्मस्यैव सामान्यान्योन्याभावप्रति
योगितावच्छेदकत्वं गत्तं न हीति गोनिष्ठाभावप्रतियोगितावच्छेदकत्वं च द्वयं लाघवेनाद्ययोरेव नांतिमयोरित्यर्थः। एवं सास्ना नाम
त्वान्न गोत्वादित्यत्रापि तथेत्याह प्रत्येकमिति। गोत्वव्निष्ठाद्येन्नयागोनिष्ठत्वादिरेव लघु[illegible]रित्यर्थः। अतिरिक्तत्वादिति। १८८
धूमसमानाधिकरणोन्या[illegible] नीलधूमत्वादेरवच्छेदकतया प्रतियोग्यधिकरणं नीलधूमसमानाधिकरणेत्यादृश्याभावेन प्र
तियोगिन्यूनत्वं तथा च नीलघटाभाववदतिरिक्तघटाभावः प्रमेयेति गुरोरपि धर्मस्याभावप्रतियोगितावच्छेदकत्वं व्यवस्थापितं

ष्टेदयं अन्यथा प्रमेयधूमवान् वह्नेरित्यत्र पारिभाषिकावच्छेदकत्वानुसरणे व्याप्तेर्दुर्ज्ञेयत्वापत्तेरिति तदनुद्धारः (य ङ्घिसामान्यकारणा
स्य परामर्शस्य प्रमात्वरूपकारणतावच्छेदकत्वेनैकलिंगस्य कारणत्वं अथेत्यादिना मूले व्यवस्थापितं तथापि तथावेति ग्रंथस्य विशेष
रूपमवच्छेदकाशांतरेति लिंगस्यैव कारणत्वमित्यभिसंधिना आह तत्रैवेति। अन्यथा सामान्यकारणस्यापि विशेषरूपेण कारणत्व
नियमे सामानाधिकरण्यप्रतियोगितायां च धूमस्य दानं तत्र वह्निरिति कालदेशकर्तृत्वसंबंधस्यैव व्यापकताघटकत्वादित्यर्थः। मत्तां
तरमाह यदा यत्रेति। वर्तमानत्वस्य रसोऽज्ञावनंतरं ... जं तु धूमादेर्धूमकाले धूमदेशे च एकवह्निसिद्धावपि धूमकालावच्छि
न्न धूमदेशीयवह्निसिद्धिः स्फुटैव धूमकाले देशांतरस्याप्यवच्छेदकत्वसंभवात् एवं धूमदेशे कालांतरस्यावच्छेदकत्वसं
भवात् विशिष्टस्य च प्रकृतत्वादिति। मूले समानाधिकरणपदस्य ज्ञानावच्छेदकतयैव प्रकृतसंगतिरिति तथैव व्याप्
ष्टे पर्याप्ततावच्छेदकेति विशेषणज्ञानविशिष्टमासाद्यादेव व्याप्तिज्ञानं परामर्शोपयोगी... शंकते नन्वेति। साध्यतावच्छेदकपर... रासा

अ॰शि॰कृ थारणं कारणमात्रमभिप्रेत्याह तत्रेति। अनुसंस्कारस्यानुमितिफलत्वाज्जनकत्वात्कथं व्यापाररूपपरामर्शजनकत्वमित्यत आह फले
१८९ तिन वेत्यादि विशिष्टपरामर्शत्वेन स्मृतिं प्रति कारणत्वे तथात्वेनैव रूपेणानुमितिं प्रत्यकारणत्वे अनुमितिकारणतावच्छे
दकरूपेण तस्य तज्जनकत्वे फलव्यापारयोरैकरूप्येण प्रयोज्यत्वमिति। व्याप्तिज्ञानत्वेनेति। यद्यपि विशिष्टस्मृतेर्व्याप्ति
विषयकतया व्याप्तिस्मृतिं प्रति व्याप्तिज्ञानत्वेनैव हेतुतेति न तत्र व्यतिरेकः तथापि व्यापकतावच्छेदकपरामर्शत्वावच्छिन्नका
र्यतावच्छेदकत्वं तस्य नास्तीति भावः। इदानीं कारणप्रयोज्यतावच्छेदकव्यापारनिष्ठधर्मेण फलं प्रत्यहेतुत्वमाह नवेति। उ राम
क्तव्यापारप्रयोजकत्वमभिप्रेत्याह। व्याप्तिविषयकेति सामान्यहेतुतावच्छेदकद्वयमुक्तं वाकारोऽनास्थायां अप्रयोजक १८।
त्वमुक्तिरिति नहीति। व्यभिचारमप्याह इंद्रियेति। इंद्रियस्य द्रव्यत्वेन कार्यत्वं प्रत्यक्षं त्वग्निन्द्रियस्य इंद्रियत्वेन तत्संयोग
स्य इंद्रियसंनिकर्षत्वेन प्रत्यक्षज्ञानव्यापदार्थेऽपि स्थितिं प्रति संबंधिज्ञानत्वेन तत्र व्याप्तित्वेन हेतुतापदार्थोपस्थिते

गुणादृशस्मृतित्वेन कार्यताशालिं प्रति तु पदज्ञानस्य पदार्थोपस्थितिं प्रति तद्धीज्ञानत्वेन तत्तद्व्यक्तित्वेन वा हेतुत्वात् तद्ज्ञानत्वे
न पदार्थोपस्थितेः स्व पदार्थोपस्थितित्वेन एवं व्याप्यत्वेनांगीकारे। धारावहनेति प्रथमघटज्ञानस्य द्वितीयघटज्ञानं प्रति वि
शेषणज्ञानत्वेन हेतुत्वं एवं द्वितीयस्यापि तृतीयं प्रति विशेषणज्ञानत्वेन हेतुत्वं तथा च तृतीयं प्रति प्रथमं कारणं स्यात् व्याप्ये
णीकारे तु द्वितीयनिष्ठतृतीयकारणतावच्छेदकविशेषणज्ञानत्वेन रूपेण प्रथमस्य न जन्यत्वमिति भावः प्रथमस्य विशेषणा
ज्ञानत्वेनैव कारणत्वं वाच्यं तत्र च द्वितीयो न व्यापारः तादृशव्यापाराभावेपि विशेषणज्ञानेन द्वितीयस्येव जननादित्यभिप्रे
त्याह यज्जनयित्वैवेति। तज्जन्यत्वे। प्रतिकारणतावच्छेदकरूपेणैव व्यापारं प्रतिकारणत्वनियमे व्यापारनिष्ठफलजन
कतावच्छेदकधर्मेणैव कारणजन्यत्वनियमेपीत्यर्थः। विशेषणज्ञानस्य साक्षादेव तथा कारणत्वमित्यभिप्रेत्याह
संस्कारेणेति। इदं च विशेषणविषयकत्वरूपेण विशिष्टज्ञानं प्रति कारणत्वं वादिनां प्राचां नयेन जन्यत्वेति दिक्

व्यधिकृ
२०६

ज्ञानवारणाय।संशयेति अनुमितौ तु वह्न्यभावनिश्चयत्वस्य विरोधित्वस्तन्त्वनाय। नित्येति द्रव्य नित्यस्येत्यादि व्याप्तेरनभ्युप
गमेन तदभ्युपगमे तु सामानाधिकरण्यप्रत्यासत्त्या ह्रदे वह्न्यनुमित्यापत्तेः व्याप्तिविषयत्वेन कारणत्वं दूषयति यदि
त्वेति यच्छब्देनाहृशपदार्थोपस्थितित्वेन कारणत्वे व्यापारं प्रति विशेषणज्ञानत्वेन तथोपस्थितिकारणत्वेनैवोक्तनिय
मनिर्वाहस्तथापि व्याप्तिविषयत्वावच्छिन्नकारणतावादिमतमात्रं निराकृतं भिन्नमनं दूषयति तु मुपन्यस्यति यत्त्विति। अत्रापि
व्यापारफलयोः समानरूपत्वयोऽन्यत्वानियमः कान्यमित्यादिद्वयं वान्यथासिद्धिः शब्दाश्रयत्वेनाकाशादेर्वारणाय गौ
रवप्रमाणिकत्वोपपादिकां युक्तिमाशंक्य।निषेधति नन्वेवमिति।ननु गन्तन्तर्हि दंडस्य कारणत्वेनेत्यत आह दंडत्वेनैवेति राम
यद्यपि दंडत्वं नैकं हस्तादेरपि कारणत्वात्।न श्रव्यत्वं तथा इतरकारणसमवधाने जलादिसत्त्वेपि घटोत्पादप्रसंगात् १९६
तथापि ताहृशस्य सर्वद्रव्यत्वं ननु ताहृशस्य सर्वद्रव्यसत्त्वेपि कथं घटानुत्पाद इत्यत आह क्रियेति।जनकत्वेन

कारणत्वं त्वग्निस्वरूपयोग्यत्वं वाग्निफलोपहितत्वं वा आद्ये तु द्वेति। तत्प्रयोजकतायाः अग्निविरहप्रयोजकतायाः अन्त्ये
त्याह अग्निविशिष्टत्वेनेति। तन्तुरूपकादीनां पृथगन्यथा च तु विधानसत्वात्तत्कारणत्वमित्यत आह नस्याद्वेति द्रव्यस्वरूपयोग्य
तावच्छेदकधर्मवत्वनिर्णयादेव प्रवृत्तेरिति निमित्तकारणतावच्छेदकस्यातिप्रसक्तत्वादाह अस्त्वेति। तथा घटजनकतावच्छेदके प्रथ
मोपस्थितत्वं अग्निजनकत्वग्रहे अन्यथाग्निजनकत्वेनेव घटजनकत्वे तथा च परस्पराश्रय इति भावः। अत एव तादृशसंयो
गविशेषादेरवच्छेदकत्वादेव प्रतिबंदिमाह किंवेति। शब्दादीनामिति यत्र शाब्दमिष्टसाधनताज्ञानं तदभिप्रायेण प्रतिबंध्यद्वार
माह तज्ज्ञानकत्वेनेति प्रकृते परामर्शजनकत्वेन अन्यत्रानुमानप्रमाणगणमनुसंधेयं। व्याप्तिज्ञानस्य परामर्शत्वव्यापकरूपा
कारणत्वं एवं उपपत्तिद्वयं दूषयति किंत्विति। तदवच्छिन्नेति। एककार्यतावच्छेदकानवच्छिन्नं प्रति व्याप्यव्यापकभावापन्नाभ्यां रूपाभ्यां न हे
तुत्वमिति। अतएव सामान्यविशेषकार्यतावच्छेदकभेदेन तथा हेतुत्वेऽपि न क्षतिः। नन्वियमन्यथासिद्धिरन्यथासिद्धित्रयमध्ये

आशि क प्रतिक्षेपस्तत्राह दर्शयितव्या नेति प्रपृष्टं नकेषु ताद्दृशधर्मे नान्वयव्यतिरेकविरहादेव नकारणत्वं किमर्थं ताद्दृशान्यथासिद्धिकल्पने
१६१ नेतिभावः अत्रेत्र अनुमितौ तथात्वं कारणत्वं कारणांतरासंभवस्यैव कल्पकत्वेत्याह चिकीर्षामिति तथात्वापत्तेः कारणत्वाप
त्तेः। तत्र चिकीर्षायां इहापि अनुमितावपि अनुमितिमतिर्मानसी मनोऽसाधारणकारणकज्ञानत्वादित्याशंकते मनद्इति। तर्हि चि
कीर्षा मानसी मनोऽसाधारणकारणत्वादित्युत्तरयति चिकीर्षादीति। मनोऽसाधारणकारणत्वस्य मानसप्रयोजनकत्वं खं
डनेन बाधः इच्छति किंतु नहीति। खंडनमाक्षिप्योत्तरयति किंनामेति। न किंचिदिति मानसत्वस्य नित्यत्वात् तत्प्रत्यक्षं मानस
त्वप्रत्यक्षं तत्सामग्री मानससामग्री तद्वत्किं तो व्यक्तिः मानसत्वावच्छिन्नोत्पत्तिं करणाभेदः मनोरूपकरणाभेदः कार्यवै राम
जात्यं अनुमित्यादिकार्यवैजात्यं नवयं कारणभेदाभेदावेव कार्यभेदाभेदप्रयोजकाविति ब्रूमः। अपितु सामग्रीवैल १६१
क्षण्यप्रयुक्तमित्याशयेनाह सामग्रीति। आद्यांतरभेदेन दृष्टांतद्वयमाह यथेति कथमिति उपमित्यादावपि तुल्यन्यायेन मनस

पर्वतत्वात्वादिति भावः। अप्रमात्वेन ज्ञानत्वन्तु प्रमितित्वे लक्षितस्य प्रयुक्तेति [illegible] त्यर्थेनाह करस्येति। तद्धर्मित्वस्य केवलान्वयित्वया
व्यावर्त्तकत्वादाह अभावेति अन्यस्य विगोत्वादप्रवेशादाह ज्ञानत्वेनेति अतिप्रसंगस्तु विशेषसामग्रीविरहादेव निरस
नीय इति विशेषसामग्रीमात्रं तन्न दिति। ननु सत्त्वं किमित्युपेक्षितमिति वाच्यं। नियताजनकगगनादिव्यावर्त्तकस्यैव संभ
वति। अत्र पुनः सामान्यस्यातिप्रसक्तस्य ग्रहणायोगात्। गोत्वादिष्वुपलक्षणं तानि ह शाब्दामर्शत्वाभावाद्धेत्वपि द्रष्टव्यं
वह्निव्याप्तित्वं नैकमित्यनुत्क्वाह वस्तुत इति। वह्निज्ञानत्वेनैवेति नन्वज्ञानत्वमेवास्तु सामान्यविशेषयोरेकप्रयोज्यत्वा
पत्तेः। एवमिति अप्रसिद्धाभावानुमितौ वह्निभावयोरेव व्याप्तिज्ञाने वह्निज्ञानस्य हेतुत्वादिति। एतेन साध्यज्ञानस्य
जनकत्वप्रदर्शनेन इदमभ्युपगमवादेन वस्तुतो नामच्यानकार्यकारणभावेमानाभावः। केवलान्वयिनीति घ
टत्वादिन्यस्य तुर्यतापत्तेः तत्तद्व्यापकत्वानुधावनं एकवचनमनधिकरणत्वकत्वमन्यत्रैव निराकुर्वन्नाह तत्रेति

अशिकु
१६२

प्राचीनोक्तासद्विपक्षत्वे सिद्धान्तसिद्धिव्याघातं निराकुर्वन्नुपसंहारमाह अत्यंताभावेति स्वलोकस्य गृह्य ग्राह्यायां तु केवलान्व
यीत्यधिकं स्यादिति ध्येयं एवमित्यादि साध्यकत्वे विशेषणं तेन गृहीतप्रकृतसाध्यवद्वृत्तित्वकोटौ व्यतिरेकि साधकत्वमेवेत्य
र्थः। एवमुत्तरत्रापीदं वमूलानुसारेण केवलान्वयित्वदशायां तु गुरुत्वावस्थायाः घटितत्वं संयोगाद्यभावसाध्यकादिसंग्रहाय व्या
प्यवृत्त्यत्यभावविशेषणतात्वं यत्र कवनाधिकरणे बोध्यं तेन संयोगसाध्यके नातिव्याप्तिः। अंत्यद्वयं च गुरुत्वविशेषघटि
तं तेनेश्वरयोगिभ्यां सर्ववस्तुग्रहेऽपि न क्षतिः। एतस्य यदि दुर्लभत्वं तदा कालांतर्भावोऽपि बोध्यः। अत्र व्यतिरेकित्वं यत्र क
वन व्याप्यव्यतिरेकप्रतियोगित्वं बोध्यं साध्यकमित्यनेनाज्ञायमानव्युदासः। आचार्यमतमाह व्याप्तीति तन्मतेऽन्वयव्याप्तिज्ञा
नमेव हेतुर्न व्यतिरेकव्याप्तिज्ञानं अन्यव्याप्तिज्ञानस्यान्यानुमितिजनकत्वात् तत्संग्रहः। क्वचिदन्वयसहचारेण क्वचिद्व्यति
रेकसहचारेण क्वचित्तु द्वाभ्यामिति क्रमेण लक्षणत्रयगमनं अयं च पूर्वमतान्द्विशेषः यद्व्यतिरेकि साध्यस्यापि व्यतिरेकसह

राम
१६२

चाराद्यज्ञानदशायां केवलान्वयित्वादिकमिति। अत्रापि पूर्ववत्पूर्वावस्थाभेदो बोध्यः। अन्वयसहचारो अन्वयसहचारज्ञानं अन्वयसह
चारज्ञानमात्रगृहीतत्वमन्वयसहचारज्ञानातिरिक्ताऽगृहीतत्वे सति तद्गृहीतत्वं नत्वात्मप्रसिद्धं आत्मादेरपि ग्राहकत्वात्। न च तदन्यस
हचारज्ञानागृहीतत्वं वाच्यं हेतुसमानाधिकरणोत्यादिव्याप्तौ हेत्वभावादेरपि सामानाधिकरण्यग्रहस्य ग्राहकत्वेन न दोषस्तादव
स्थ्यात्। अत्र मात्रपदेन साध्याभाववद्वृत्त्यभावसहचारज्ञानमेव व्यावर्तनीयमिति वाच्यं। यत्र केवलान्वयित्वेन तथासहचारज्ञानमप्र
सिद्धं तत्राव्याप्तेर्दुर्वारत्वादित्यत आह तत्रेति। प्रकृतव्याप्तिः अन्वयव्याप्तिः। तद्ग्राहिका या व्याप्तिज्ञानविषयसहचारत्वं विषयतासं
बन्धेन सविषयसहचारत्वव्यापकं यद्घटकसाध्यसाधनसहचारवत्त्वमित्यर्थः। ज्ञाननिष्ठहेतुतावच्छेदकसहचारित्वं तेन सहचा
रज्ञानविषयीभूतसहचारान्तरमादाय व्यापकत्वविरहेऽपि न क्षतिः। अन्वयसहचारत्वं प्रकृतव्याप्तिघटकसाध्यसाधनसह
चारत्वं तथा च प्रकृतव्याप्तिग्राहकज्ञानं न च प्रकृतसाध्यसाधनसहचारकत्वमित्येवास्तु प्रकृतव्याप्तिमादाय प्रकोक्तिभंगापे

न॰ दी॰ कृ॰ नेः। अत्र च साध्यसाधनप्रदेशयोरेव सा शंकामाह नादृशोति प्रकृतव्याप्तिग्राहकज्ञानविषयार्थकं अन्यत्र पूर्ववत् समीकृतो नुरोधेना
१९३ हप्यहीनेति। एतन्मते चान्यसहचारेणान्यव्याप्तिग्रहे अतिप्रसंग इति व्यतिरेकसहचारेण व्यतिरेकव्याप्तिरेव गृह्यते अनुमितिज
नकत्वं च व्याप्यो प्रकृतसाध्यव्यभिचारधीविरोधित्वेनैवेति। अनयोस्तत्त्वं पुनरन्यत्र विवेचयिष्यामः। प्रकृतहेतुत्वं प्रकृतहेतुताव
च्छेदकावच्छिन्नहेतुत्वं एवं प्रकृतसाध्यत्वमपि ज्ञानविषयव्याप्तित्वं प्रयोजनं पूर्ववत्। अत्र व्याप्तिज्ञानानुमित्योः। विषयतासंबंधेन
ज्ञाननिष्ठा हेतुतावच्छेदकावच्छिन्नव्याप्तित्वं प्रयोजनं पूर्ववत्। अत्र व्याप्तिज्ञानानुमित्योः कार्यकारणभावे तत्कालीनतत्पुरुषीयत्वा
दिकं निवेश्यं नातः कालांतरीयपुरुषांतरीयव्यतिरेकव्याप्तिज्ञानस्य स्वरूपयोग्यत्वनिबंधनो दोषः। व्याप्तिज्ञानत्वे विवक्षिते व्याप्तिका राम
रणताकस्य फलोपधानं वा विवक्षणीयं प्रकृतसाध्यकेत्यस्य प्रयोजनमाह जलमिति इदं च यत्र यत्र पृथिवीत्वव्यापकाभावप्र १९३
तियोगित्वं तत्र निर्गंधत्वमित्यन्वयव्याप्तेरेव प्रकृतसाध्यानुमितिर्व्यतिरेकव्याप्तिज्ञानात्तु पृथिवीत्वाभावानुमितिस्तादृशायां बोध्यं।

नत्वहेतुतावच्छेदकावच्छिन्नहेतुकपृथिवीत्वाभावानुमित्यौपयिकव्यतिरेकव्याप्तिस्सायत्रयत्र पृथिवीत्वं तत्र तत्र पृथिवीत्वव्यापकाभाव
प्रतियोगिमत्त्वाभावइत्याकारासात्वहेतुतावच्छेदकेतिवाच्यं अस्याअपि व्याप्तेः पृथिवीत्वव्यापकतावच्छेदकरूपावच्छिन्नाभावत्व
मुद्रया हेतुतावच्छेदकशरीरत्वात्तान्वेजलत्वादिकमुपेक्ष्य किमेतावत्पर्यंतानुधावनमितिवाच्यं पत्तद्व्याप्तिहेतुतावच्छेदकमुद्रयाऽप
योगित्वेपि व्याप्तिज्ञानमुद्रया नोपयोगित्वमेतत्। प्रदर्शनपरत्वात् प्रकृतहेतुकेत्यस्य व्यावृत्तिमाह बस्नभाववानिति इदं च यदाप्र
कृतसाध्यं प्रत्यन्वयित्वमेव हेत्वंतरस्य च प्रकृतसाध्यं प्रति व्यतिरेकित्वं तदाप्रकृतहेतुकेत्यस्य प्रयोजनस्यलं यदारेदमेवस
पांतरेणाप्रकृतसाध्यं प्रति व्यतिरेकि तदाहेतुतावच्छेदकावच्छिन्नेत्यस्य फलं तत्र बोध्यं तत्रापि व्यतिरेकव्याप्तिहेतुतावच्छेदक
व्याप्तिहेतुतावच्छेदकानुधावनं पूर्ववदेव बोध्यं नच प्रकृतहेतुकपरामर्शे प्रकृतसाध्यान्वयव्यतिरेकव्याप्तिभानमेयत्वादस्यान्व
यव्यतिरेकित्वमेवेति व्याप्तिरितिवाच्यं। व्यतिरेक।व्याप्तेःपक्षधर्मतासंशयप्रकारत्वात् प्रतियोगिमत्त्ववानितिपक्षधर्मताप्रतियोगि

आ॰टी॰कृ त्वे व्यतिरेकव्याप्तिरूपतादृशप्रतियोगित्वप्रकार इति। अन्वयव्याप्तेः प्रकृतसाध्यकप्रकृतहेतुकानुमित्यौपयिकान्वयव्याप्तेः। ननु से
१८४ वन्ननु प्रकृतसाध्यकप्रकृतहेतुकानुमित्यौपयिकव्याप्तिरेव तेन सा यदि प्रकृतहेतुकानुमित्यौपयिकी स्यात्तदा तस्य प्रकृतसाध्यग
तियोगित्वाभावात्। केवलान्वयित्वप्रसंगस्यादित्युक्तं। अतएव मणिकृन्मतानुसारादेतद्यद्भावाभावव्याप्तिस्यादौ व्यतिरेकव्याप्ते
र्लिंगतावच्छेदकत्वेपि व्याप्तिज्ञानत्वेनाहेतुत्वादेव तथात्वलिंगतावच्छेदकावच्छिन्नलिंगज्ञानस्याभावप्रतियोगित्वेनाज्ञातस्य हेतुत्वा
देव तन्मतेन केवलान्वयित्वसतिरिति भावः। लाघवादाह अभावप्रतियोगित्वेनेति। लिंगज्ञाने लिंगतावच्छेदकावच्छिन्नलिंगज्ञानं। एव
मिति प्रकृतसाध्यकप्रकृतहेतुकानुमित्यौपयिकव्याप्तित्वव्यापकप्रकृतसाध्याभावनिष्ठव्याप्तिकत्वं केवलव्यतिरेकित्वं अन्व राम
यव्यतिरेकित्वं चैतत्कालान्तर्भावेन प्रकृतसाध्य निरूपितव्याप्तिज्ञानजन्यप्रकृतसाध्यकप्रकृतहेतुकानुमितिकत्वे सति प्रकृत १८४
हेत्वाभावनिरूपितव्याप्तिज्ञानजन्यप्रकृतसाध्यकप्रकृतहेतुकानुमितिकत्वं यत्तु प्रकृतहेतुकसाध्यकानुमित्यौपयिकज्ञानवि

षयव्याप्तित्वव्यापकान्वयव्यतिरेकव्याप्त्यन्यतरत्वमिति तन्न दृशाविशेषे केवलान्वयिकेवलव्यतिरेकिणोः व्याप्तेः अभिधेय
त्वं वशात् बोधविषयत्वं शक्तृशक्यत्वं वा आद्ये अथेत्यादिमूलासंगतिरित्यतो न्याय वर्त्ते अभिधेयत्वं शक्तृशक्यत्वमिति व्याघा
तस्यानिष्टप्रसंजनात्मकस्य प्रकृतेनुपयोगादाह विपक्षस्य सिद्धिरिति ननु यदि व्यावृत्तत्वं यत्र नास्ति तत्रैव केवलान्व
यित्वं तदा कंबुग्रीवादिमत्त्वेपि अवच्छेदकत्वाभावात् व्यावृत्तत्वाभावेन तत्रैव धर्मत्वं हेतुरनैकान्तिक इत्यत आह तत्रेति न
था च व्यावृत्तत्वं न ततो व्यावृत्तमिति भावः गगनादीति व्यावृत्तत्वं यतो व्यावृत्तं तत् केवलान्वयीति धर्मत्वस्यानैकान्तिकत्वं
मूलोक्तमसंभवि अवृत्तिश्च एव तस्य व्यावृत्तत्वात् तेषु न च धर्मत्वाभावात् अत्यंताभावप्रतियोगित्वस्यैव लक्ष्यस्यासंभ
वात् तत्त्वाप्रसिद्धिर्न घटत इति तस्य लक्षणत्वं विघटयन्नाह नन्विति । तथा च नेकस्यापि केवलान्वयित्वमिति भावः । क
थंचिदिति वस्तुतस्तु गगनव्यवहारः शब्दोपदानवादादिवेति हृदयं । वस्तुत इति इह भूतलेकपालनाशात्

२८५

आरी कु

घटो ध्वस्त इत्यादिप्रतीतेरिति भावः। भूतलादिदेशे तस्यावर्त्तमानत्वे पुनराकाशाभावे इति तथा च तद्वारणप्रकारेणैव तदपि वा
च्यमिति भावः। ननु भावाभावस्य प्रतियोगित्वं घटादावेवास्तु आकाशादौ कुतः इत्यत आह स्वावधारणमिति तथा चाभा
वाभावत्वं व्यापकं प्रतियोगित्वं व्याप्यं प्रकृते च प्रतियोगित्वसत्त्वात् तदपि वर्त्तत इति भावः। ननु भावत्वस्याभावाभावत्वव्या
प्यत्वे किमपि न मानं इत्यत आह प्रतियोगित्वादिति प्रतियोगित्वस्य तु तत्त्वे मानमाह यदा इति इदं च प्रतियोगित्वं तत्त्वे
न व्यवह्रियमाणत्वं नातः साध्याविशेष इति अत इति घटाभावस्यापि प्रागभावादि यत्र यत्प्रतियोगित्वमिति ननु घटा
न्योन्याभावस्याभावो न कम्बुग्रीवादिमत्त्वादिकमित्यत आह प्रतियोगितावच्छेदक इति ननु भावत्वज्ञानप्रतिबन्धक
ज्ञानविषयस्यैवाभावाभावत्वेन ज्ञाप्यस्यापि तदभावाभावत्वापत्तिरित्यत आह तदभावत्वं वेति। तथा च तदभावत्व
ज्ञानप्रतिबन्धकत्वं अभावव्यवहारविषयत्वं वा तद्विषय इति यद्यप्यत्र घटाभावाभाव इति ज्ञानस्य सर्वं बंधत्वे न भा

राम
१८५

ष्ममाणो संबंधविशेषत्वेपि न क्षतिः तथापि संबंधत्वेन संबंधस्य न प्रतिबंधकत्वमिति तदुदास इति भावः ननु संबंधस्यापि
व्यावर्त्तकत्वादिना ऽज्ञातस्य तथा प्रतिबंधकत्वमस्त्येवेत्यत आह संबंध संबंधेति न स्वनवृत्ति तथा च व्यावर्त्तकत्वादि
ना ऽज्ञानस्य तथा धीप्रतिबंधकत्वं तस्यैवाभावाभावत्वमिति प्रतियोगितावच्छेदके तिघटाभावप्रतियोगितावच्छेदकसंयो
गादेस्संवादो हनैस्तत्रापि संयोगसंबंधावच्छिन्नघटाभावव्यवहारो न स्यात् अनतिप्रसंग इत्यत इति अन्य प्रतियोगितावच्छेद
कसंबंधस्यान्याभावविरोधिता निराकरणायेत्यर्थः व्यधिकरणेति तथा संबंधविशेषेणेत्यादिनायत्तु त्यन्तमापादितं तत्
समानाधिकरणसंबंधावच्छिन्नाभावे इह वाभावाभावः प्रतियोगी तस्य च प्रतियोगितावच्छेदकसंबंधेन विरोधिनस्ते
न संबंधेनाद्वृत्तेरेवाभावस्य केवलान्वयित्वं मन्मते श्रीमत्तेभवतो व्यधिकरणस्य तेसंबंधविशेषणियंत्रितस्य [illegible]
व्यधिकरणसंबंधस्य प्रतिबंधकत्वे दोष इत्यत आह तद्वृत्तीत्यादि अयमर्थः किमभाववत्त्वेन प्रतियोगितावच्छे

अशिक दकसंबंधेन विरोधः किंवा प्रतियोगिता संबंधत्वेनाद्ये आह अभावेति अभावमात्रविलय इत्यर्थः अंत्ये त्वाह तदभावेनि
१९६ अत्रापि तद्वृत्तिभावनामित्यपि बोध्यं प्रदिव विशिष्टकल्पनायामेव प्रतियोगी प्रतियोगितावच्छेदकसंबंधो वा तदभावाभाव इत्य
त्र विनिगमकाभाव इत्याशंक्यते व्यधिकरणसंबंधावच्छिन्नाभावत्वस्य त्वभावत्वनास्ति केवलान्वयित्वात् इति तदा प्रतियो
गितावच्छेदकसंबंधानुधावनेन गौरवमेव विनिगमकमिति केचित्तु अनति प्रसक्त इत्याद्यनुरोधात्त्व प्रतियोगितावच्छेदकसंबंधप
रतदभावद्वृत्तिपरएव योजयंति तद्वृत्ति प्रतियोगितावच्छेदकव्याधिकरणसंबंधवति अभावविलयः व्यधिकरणसंबंधावच्छिन्ना
भावविलयः ननु प्रतियोग्यवच्छिन्नसंबंधस्य भावाभावोवक्तव्य इत्यत आह तदभावेति तस्य व्यधिकरणसंबंधावच्छिन्नाभावस्य यो
भावोभावदभ्युपगतः तद्विलोपप्रसंगः प्रतियोग्यवच्छिन्नसंबंधस्य प्रसिद्धेरित्याकूतः परिष्कृत इति लक्षणप्रसिद्धिप्रयुक्तलक्षणासं राम
भवनिराकरणमेव परिष्कारः अतएव मूलकृता आकाशेत्यादिग्रंथेन तथैव प्रतिपादितं अभ्युपगमवादत्वं घटयति भाववत्तीत्यादि १९६

मानत्वेहेति आकाशाधिकरणाप्रसिद्ध्या आकाशाभावो नास्तीति प्रतीतेरप्रसिद्धेरिति भावः ननु प्रतियोगित्वं तदभावाभावत्वं तथा च आकाशस्य
प्रतियोगित्वाप्रसिद्धेरेव तदप्रसिद्धिरित्यत आह अभावेति क्रमिति स्वाभावस्याभावत्वं स्वरूपसंबंधस्यैव शरणीकरणीतया तस्यैव ल
क्षणत्वादिति न चाकाशे आकाशाभावाभावः आकाशाभावप्रतियोगित्वादिनानुमानादेव तत्प्रसिद्धिरित्यत आह अभावप्रतियोगित्वे वेति
अप्रयोजकमिति यत्तदर्थयोरनुगतत्वस्याभावे सामान्यव्याप्तेरसिद्धिः विशेषव्याप्तिस्त्वसिद्धैवेति ध्येयं । एवं चेति वृत्तिमत्पदस्य मूलोक्त
प्रयोजननिरसनमित्यर्थः विवक्षाफलमाह अत एवेति ज्ञानस्य साक्षात्संबंधेन केवलान्वयित्वेपि परंपरासंबंधेन केवलान्वयित्वं सूचयितु
माह ज्ञानत्वस्येति परंपरासंबंधेन स्वाश्रयविषयतया संयोगेति शाखावच्छिन्नवृक्षे संयोगाभावो नास्तीति प्रतीत्या संयोगस्य तदभावा
त्मकत्वमिति भावः ननु प्रतियोग्यसमानाधिकरणत्वं स्वप्रतियोग्यधिकरणानधिकरणत्वं तथा चाकाशाधिकरणाप्रसिद्ध्या आकाशाभा
वोपि प्रतियोग्यसामानाधिकरण्येनेति प्रतियोग्यसमानाधिकरणाभावांतरमादाय कालेऽतिव्याप्तिरित्यत आह आकाशाभावो वी

अरीक्ष ति प्रतियोग्यसमानाधिकरणस्य संबंधविशेषनियंत्रितत्वेनाकाभावकीरंशा प्रतियोगितावच्छेदकसंबंधेनाकाशीयत्वाकाशाभावाधिक
१८७ रणानुयोगित्वयोरभावेनस्यापि प्रतियोग्यसमानाधिकरणत्वादित्यर्थः। नन्वेवं सत्ताभावोपि नप्रतियोग्यसमानाधिकरणः स्यात् प्रति
योगितावच्छेदकसमवायेसत्ताप्रतियोगिकत्वाभावाधिकरणनिरूपितयत्किंचिदनुयोगिकत्वयोःसत्वात्समवायनिरूपितानुयोगि
कत्वयोःसत्वात्समवायनिरूपितानुयोगिकत्वविवक्षणेतु सुतरामप्रसिद्धिरित्यतोवृत्तिमत्वद्वृत्तिमूलस्थलक्षणमेव षष्ठीतत्पुरुषसमा
सादेतदर्थकमितिकेचित् तत्र तथापीत्यादिविरोधात् तस्मात्स्वनंत्रविवक्षापवेतिव्याप्यवृत्तीतिस्वसमानाधिकरणात्यंताभावप्रति अ५
योगित्वं यदितत् तदासंयोगेऽतिव्याप्तिस्तदभावस्य निरुक्ताव्याप्यवृत्तित्वात् उभयत् किंचिदधिकरणेताद्दृशत्वंतथाच्चाननुग
मइत्यस्वरसः कश्चिदित्यनेनसूचितः अखिलमितिप्रतियोग्यसमानाधिकरणत्वेस्यत्र प्रतियोग्यसंबंधित्वं वृत्तिमत्वमित्यत्रसं राम
बंधित्वमिति अत्यंतपदं चाविवक्षितमितितथाचेतिप्रमाणं प्रमाज्ञानीयत्वेनानुगमं कुर्वतोमूलस्यएतदभिमतमितिभावः व १८

स्कतोऽवच्छेदकाविवक्षणे विशिष्टाभावादिकमादायासंभवः ननु द्रव्यभेदगुणभेदयोरन्यतरत्वेन केवलान्वयित्वेपि द्वित्वेन रूपेण केवलान्व
यित्वापत्तिः द्वित्वावच्छिन्नाभावस्य प्रतियोगिसमानाधिकरणत्वादित्यत आह द्रव्यंचेति तथाच प्रतियोगितावच्छेदकावच्छिन्नानधिकर
णयोर्द्रव्यगुणयोस्तस्य सत्वात् नातिव्याप्तिः नचैवमिति गोत्वाश्वत्वयोर्द्वित्वेन केवलान्वयित्वं स्यादित्यर्थः प्रथमविवक्षा णव प्र
तियोगितावच्छेदकसंबंधेन तदुभयप्रतियोगित्वाप्रसिद्ध्या निरुक्तोभयाभावेन प्रतियोगिवैयधिकरण्यहानिः इदमेव कृतोक्तो
तदवच्छिन्नेति द्वितीयविवक्षानुसारेण समाधत्ते नाहश्रेति धर्मिणो गोत्वाश्वत्वयो[illegible]रित्यर्थः। सिषाधयिषेत्यादिग्र
हणाभिप्रायेण मूलासंगतिरिति सत्वादाह संदिग्धेति न तु ऽस्तित्वं कालसंबंधित्वं तच्च गगनमस्तीति व्यवहारात् केवलान्वयीत्यनेनामू
लासंगतिरित्यत आह घटेति संशयस्यानिश्चयाप्रतिबंधकत्वादाह साध्येति इत्थं च मूले च कुत्रचिद्धियः प्राचीनमते नाह विशे
षणेति ननु भूतले घटो न वा भूतलं घटं नवेति संदेहयोः प्रतिबंधकत्वमस्तु घटो भूतल इत्यभावप्रतियोगीनवेत्यस्य तु कुत इत्यत आ

हविरोधीति। न चास्याग्रे मूलकृतैव तथोक्तमिति वाच्यं। तो विशेषणविशेष्यभावभिन्नयोरपि न प्रतिबंधकत्वमिति कैवकथा एतस्येति। न च समानप्रकारक
त्वस्य पकस्याभावात् विशेष्योपादानेन विनिगमनाविरहात् उभयोरपि प्रतिबंधकत्वमिति वाच्यं घटवद्भूतलमिति निर्णयस्य घटाभाववद्भूतलज्ञानाप्रति
बंधकत्वेऽनुभवविरोधइत्यावश्यकत्वेन तस्य प्रतिबंधकत्वेऽपरस्यतदुन्नायकत्वेनाप्युपपन्नेरिति भावः। पक्षनिष्ठात्यंताभावाप्रतियोगित्व
ज्ञानं साधकं तदत्यंताभावस्य योग्यतेत्यादिमूलसंगतिमित्यतो व्याचष्टे पक्षनिष्ठेत्यादीति कथंचिदिति बाधाभावसंपादकतयेत्यर्थः। आ
तएवन्यूनताभंगाय तादृशज्ञानविरोधिज्ञानस्येत्युक्तं साध्यसाधकत्वेनेति मूलस्य यथाश्रुतार्थकत्वं वक्षयन्नाह पक्षनिष्ठेति ननु तथापि
तत्छेदेन ज्ञानाभाव एव वक्तव्यः स वा संगत इत्यत आह नस्येति साध्यं घटत्वेपि निष्ठाभावप्रतियोगिपक्षः साध्याभाववानिति ज्ञानसाधा
रण्यापादसाध्यविशिष्टेति विपक्षवृत्ति विपक्षत्वावच्छिन्न इत्यर्थः। अन्यथा यत्किंचिद्विपक्षे हेत्वभावसत्वेपि व्यभिचारित्वशंकादर्शना
दग्रिममूलासंगतिः स्यादिति। न चेदमपि व्यतिरेकव्याप्तिस्वरूपं तथा च व्यतिरेकव्याप्तिर्व्यतिरेकव्याप्त्यावुपयुज्यते इति मूलासंगतिरित्य

तत्राह साध्याभावेति अत्र वदंतीत्यादि इदं वाच्यं ज्ञेयत्वादित्यत्र वाच्यत्वाभाववदवृत्ति ज्ञेयत्वं ज्ञेयत्वसमानाधिकरणात्यंताभावप्रतियोगितानवच्छे
दकवाच्यत्वकत्वं यावद्वाच्यत्वव्यापकत्वं वा एतद्विषयकज्ञानमस्ति लाघवेनाद्यस्यैव कारणत्वं कल्प्यते नापरयोः यदि वाद्यं विहाय मध्यमे नाप्य
नुमितिहेतुत्वं उच्यते तदा यत्रानौपाधिकत्वमात्रं तत्राप्यनुमितिस्वीकारेण तस्यापि हेतुत्वापत्तिरिति भावः अनुमितिकारणीभूतज्ञानविषयत्वं
उनमेव केवलान्वयिखंडनं यद्वा विशेषदर्शिनोऽनुमितिखंडनमेव तत्राप्येतेन साध्यत्वसाधनत्वयोरैक्याभावात् केवलान्वयिनि तद्रूपस्या
प्यभावात् कथं साधारणेन कारणत्वमिति परास्तं साध्येति साध्याभाववदवृत्तित्वं हेतुतावच्छेदकसंबंधेनावृत्तित्वं तच्च साध्याभाववदसंयुक्त
त्वादिकं तच्च यावत्संयुक्तव्याप्यसाधारणं न च तद्गुणादिसाधारणमित्याह इति व्याप्तिः संयुक्तत्वेन विशेषणात् अत एवाह प्रायश इति तदेव वि
शदयति साध्याभाववतीत्यादिना न वृत्तिभिन्नत्वादीति तद्वृत्तित्वात्यंताभावत्वं आदिपदग्राह्यं नत्वेवमित्यत्र हेतुः वह्न्यभावेति इदमुपल
क्षणं वह्न्यभाववतां ह्रदादीनां तत्संयुक्तत्वस्य च मानं बोध्यं धूमसमानाधिकरणानां महानसादीनां तत्संयोगस्य च मानं बोध्यं न तु तत्संबंधस्य

अनि॰ १९९ तदवच्छेदकत्वस्याभावे बोध्यं प्रतियोगितायाः संबंधमर्यादया भानसंभवात् तदवच्छेदकत्वेति प्रकारांतरेति किंचिद्धूमविशिष्टवह्नित्वस्य धूमस
मानाधिकरणाभावप्रतियोगितावच्छेदकत्वेपि तदवच्छेदकत्वं तावत्स्येव पर्वतीयत्वविशिष्टवह्नित्वे तदभावः यदि वावच्छेदकत्वस्य विशिष्टानुवृत्तितया
विशेष्यमात्रवृत्तित्वं संभाव्यते तदा वह्नित्वं नावच्छेदकं किंतु विशिष्टवह्नित्वं इति प्रतीतिबलादेव तस्य विलक्षणः संबंधोऽवशेयः परे तु वह्नित्वत्वं अव
च्छेदकतानवच्छेदकं इत्येव वक्तव्यं इत्येव अतएव सुतरामित्यपि संगच्छते इत्याहुः अन्ये तु वह्नित्वमवच्छेदकं न पारिभाषिकमिति प्राहुः न च भयोरि
त्यमनुगम एवेदं दूषणं त्रयं तु व्यापकताज्ञानेनेत हेतुरंगीकर्म इत्यत आह व्यापकत्वेति आनुभविकत्वाभावे फलत्वादाह नवायोक्तिकमिति ज्ञानत्वे
ति व्यापकताज्ञाने यथा साध्यतावच्छेदकस्याभानं तथैवानुमितावपीत्याशयः अत्रैवोपष्टंभकमाह अन्यथेति ननु व्यापकतावच्छेदकमात्रवृत्ति राम १९९
धर्मो यत्र व्यापकताज्ञाने प्रकारस्तत्रज्ञानवानित्यनुमितिर्न भविष्यतीर्भविष्यतीत्यत आहानुभवत्वेति अनुभवत्वव्यापकेति प्रत्यक्षत्वव्यावृत्ति
नायमनुगमेति लक्षणाधाः एतेन त्रयज्ञानवानित्यनुमितिस्तत्र ज्ञानवदन्यादृष्टित्वज्ञानं कारणं यत्र तु व्यापकताज्ञानं कारणं तत्र ज्ञानत्ववानित्य

वानुमितिरितिपरास्तं उभयसाधारणहेतुत्वस्यदूषितत्वात् व्यापकताज्ञानमात्रकारणत्वोक्तौ वक्तदोषतादवस्थ्यात् विभिन्नानुमितिमादाय कार्यका
रणभावकल्पनेमानाभावादिति। एतेनोक्तदोषेणदूषणांतरमप्याह सर्वजनेति अनएवोक्तदोषापेक्षयाचकारः अनुमितिभावेऽनुमितित्वे ननुवि
शेषदर्शिनः कथंप्रमेयत्वाद्यनुमितिरित्यतआह प्रमेयत्वादेरितितथाच प्रमेयत्वसाध्यकानुमितिरसिद्धैवेतिभावः ननुकेवलान्वयित्वघटवृत्ति
त्वयोः सहचारः केवलान्वयिधर्मएवग्राह्यः सचासिद्धइत्यतआह कथंचिदितितथाचसत्तादेरेवसुलभोदृष्टांतइत्यतआह कथंचिदिति
अन्यथातद्वृत्तित्वधर्मत्वावच्छिन्नव्यापकत्वोक्तौक्तदोषतादवस्थ्यात् एवंसाध्याभाववद्वृत्तित्वस्यैवहेतुत्वेनगुरुणोपिव्यभिचारज्ञानविरोधि
त्वेनैवहेतुतानविव्यतीत्यतआह व्यभिचारज्ञानेतितदेवआह यतिवह्न्यभावेतिकदाचिदितिधूमाभावः वह्न्यभावसमानाधिकरणाभावप्र
तियोगीतिज्ञानं वह्न्यभाववतिधूमाभावाभाववृत्तिव्यभिचारज्ञानोपमर्दकं संभाव्येत धूमाभावस्याभावइत्यत्र धूमाभावेप्रतियोगित्वा
वगाहनात् उक्तव्यभिचारज्ञाने प्रतियोगित्वस्यसंबंधविधयेवभानं धूमाभावोऽप्रतियोगीतिज्ञानेतुप्रतियोगित्वस्यप्रकारतयाभानं इति

अशिद्ध २०

यदितदातद्दपिनविरोधेधूमइत्तिज्ञानंतुस्वरूपपरमाहतंइत्याशयवानाहनत्वितिनतुव्यतिरेकव्याप्तिग्रहानंतरंज्ञानज्ञानजायतएवतत्रानुमिति
रेवपर्यवस्यतीत्याहव्यतिरेकेतित्वेनानुमितित्वेनानुमितित्वेननत्वनुभवविवादइत्यत आहकेनेति केत्रकारणांसामग्र्यभावबद्धित्तिव
ज्ञानंनन्वन्यदप्यस्तिकारणंइत्यत आहसामग्रीतिकिंत्विति अर्थापत्यापिनानुमिनोमीत्यनुभवादिति [illegible] केनेतियथाशाब्दानुमितिद्व
यसामग्रीसत्वेप्रमाणासंप्लववत्त्वेहापीतिभावःतस्यातीन्द्रियत्वादित्तियद्यपितयोरे [illegible] लीनतैकदेशीयत्वयोःसंबंधमर्थ्यादियाप्र
विशेनयद्यत्रताहृशीसिद्धिःस्यात्तदाउपलभ्येतइतियोग्यानुपलब्धिसंभवःनथापीतीन्द्रिय [illegible] कालघटितनयातथोपलंभा
भावेनतयोरेकसंबंधेमानाभावेवातात्पर्यनिरस्तौदित्तिसिद्धसाधनस्यवादस्यलवार्थान्तरविधयातस्यदूषकत्वमितिनिनु
तद्विवादग्रस्तइत्यत आह साध्यादीतिनतुतत्साध्यकतन्यद्ग्रोकताहशजन्यत्वेनेवानुमितित्वंसाध्यत्वंइत्यत आहतज्जना राम
त्वस्येति असंभवादिति अनुमितित्वस्यजातित्वादितिभावःएतेनप्रत्येकत्वखंडनेनकेचिदित्यस्वरसोद्रावनेतद्वीजंतुनानुमि २००

नोमीत्यनुभवविरोध इति संप्रयोगसमवायाभ्यां क्रमेणाह नन्वयं देश इति तथा चेत्यादिना नन्वत्र जलमिति पक्षता हि देशो निरर्थक इति वाच्यं
पक्षधर्मताज्ञाने सत्यपि व्याप्तिज्ञानविलम्बेनानुमितिविलम्बः स्यादिति प्रदर्शनपरत्वात् सरति मितितथा च जातो जलवृत्तित्वानुमान
मेवेति भावः प्रागेवेति व्यापकसामानाधिकरण्यव्याप्तिविचार एवेत्यर्थः नीलसमवेतत्ववृत्तिनीलगवि व्यभिचारवारकतत्साध्यके
तद्धेतुके लाघवेन साध्याभाववदवृत्तित्वस्यैव व्याप्तित्वमङ्गीकृत्याह परं परे त्विति वस्तुतस्तु साध्यवदन्यावृत्तित्वमेव व्याप्तिः प्रति
योगीत्यादि विशेषणाप्रवेशगौरवात् स्वाधिकरणवृत्तिसाध्यवदन्यत्वस्य वक्तुमशक्यत्वप्रवेशगौरवाच्च स्वीकुरुवेत्यादिकं
त्वभ्युपगमवादेनेति संक्षेपः साधारणोक्तिः आचार्यमतानुसारेण साधारणोक्तिः क्वचित्तु सुक्तके साधारणोक्तिरिति पाठः तत्र
त्रान्वयव्यतिरेकिवारणाय व्यतिरेकसहचारो वार्थो बोध्यः मीमांसकस्य च केवलान्वय्यनङ्गीकारात्तदुक्तिप्रदर्शकमू
लमसङ्गतमित्यत आह प्रयतितवेतितथा च नैयायिकं संबोध्य तदनुसारेणैवोक्तं इति। ननु व्यतिरेकिणि हेतुसमानाधिकरणात्या

असिद्ध
२०१

दि अन्वयव्याप्तिसाधने साध्याप्रसिद्धिः प्रसिद्धौ वा कृतमनुमानेनेत्यत आह साध्यव्याप्यत्वमिति अंततइति तदितरासत्त्वमिति मधिकृ
त्यननुसरणाद्ज्ञानस्य कारणत्वप्रस्तावे निरूपयतीति मूलं व्यर्थमित्यत आह उपाधिज्ञानेति न सिद्धसाधनमिति पृथिवीतरभि
न्नेत्यनुमितौ पृथिवीतरभिन्ने त्याकारकसिद्धेरप्रतिबंधकत्वादिति पृथिवीत्वस्येतिसर्वत्वस्यानुमितावप्रकारत्वादितिभावः
ननूपनये पृथिवीत्वत्वेन पृथिवीत्वस्य भानं तत्र पृथिवीतरासमवेतत्वे सति पृथिवीवृत्तित्वगर्भं तथा च पृथिवीत्वस्य तावतो
वपदे धर्मताभाने उपनयवैयर्थ्यमित्यत आह अत्रचेति अधिकारेण व्याप्तिविशिष्टत्वेन हेतुतावच्छेदकावच्छिन्नरूपेणाप
दे वृत्तित्वप्रदर्शनपरतयैवोपनयसार्थकतास्त्विति पृथिवीत्यत्र पृथिवीत्वस्य स्वरूपेणावेशात् तद्ग्रहेपीति धूमवह्न्योर्म
हानसे धूमाभाववह्न्यभावयोर्लिङ्गदेग्रहेपि अयःपिंडे शंकानादवस्थानात् तदधिकरणीय व्यभिचारशंकानिवर्त्तकत्वेनौ
चाहाधिकरणेतितत्त्वादिति अयंभावः साध्याभाववद्वृत्तित्वरूपव्यभिचारस्यभानात् इयं साध्याभाववत्त्वं तद्वृत्तित्वं वहि

राम
२०१

क ३

तोनत्रहेत्वधिकरणेसाध्यवत्त्वज्ञानेजातेतदधिकरणेसाध्याभाववत्त्वज्ञानंनभवतिएवंसाध्याभाववतिहेत्वभावइतिज्ञानेजाते
तदधिकरणेसाध्याभाववतिहेतुज्ञानंनभवतितत्रसाध्यवत्त्वसाधनाभाववत्त्वदलेएवप्रयोजकेनत्वन्यतत्समूहालंबनमुद्रयाधि
कस्यप्रयोजकत्वेनरासभादिसाधारण्यमिति।ननुऽन्वयसहचारव्यतिरेकसहचारस्यापिहेतुत्वंनलिब्यतीत्यतआहव्यतिरेके
तितथान्वोदाहरणेनव्यतिरेकव्याप्तिःप्रदर्श्यतेनतज्ज्ञानस्यजनकत्वात्नतूदाहरणेनसहचारमात्रंप्रदर्श्यतेनतद्व्याप्तिरितिभि
न्नमतमाश्रयंकथनिबध्नतियत्त्वित्यादिनाअर्थांतरादीत्यादिपदेनाप्रयोजकत्वपरिग्रहः।ननुकथकसंप्रदायानुरोधादेवनयकादि
वेमर्यादेत्यतआहव्याप्तिबोधकत्वमितिननुनतोऽन्वयव्याप्तिरेवबोध्यतांआस्थीयतांचतदर्थंप्रकारांतरमपीत्यतआहनचेति
नचिक्कादावितिसंयोगिद्रव्यत्वादित्यत्रसंयोगसामान्याभावस्यद्रव्यवृत्तित्वंसर्वैरनभ्युपगतंकपिसंयोगिएतत्वादित्यत्रैतत्वस्य
गुणादिरूपतयाऽत्यंतिकालावच्छेदेनस्वयंतदभावाभ्युपगमान्नाव्याप्तिरित्येतदुपेक्ष्यएतदुक्तंसाध्यत्वावच्छेदकेत्यादिक्रमेण

आ॰शि॰कृ॰
२०२

प्रागुक्तेद्वये बोध्यं अवच्छेदकद्वयव्यावृत्तिस्तु सकलसाध्याभाववन्निष्ठेत्यादिवद्बोध्या इदं तु विचार्यते व्यापकतालक्षणे प्रतियोगि
व्यधिकरणपदं दत्वा साधनाभावे प्रतियोग्यसमानाधिकरणत्वं देयं तदपेक्षया तदुभयत्याग एव श्रेयान् संयोगेनात्मत्वे साध्ये संयोगा
भावस्यात्मत्वाभावसमानाधिकरणाभावप्रतियोगित्वेन व्यापकत्वविरहेणाव्याप्तिनिरासादिति अत्र वदंति व्यवहारो प्रयुक्ताव्या
पकतायामित्येवं तथा निर्वचनात् अखंडाभावतया च न वैयर्थ्यं। नव्यास्तु इदं द्रव्यं संयोगवदन्यत्वादित्यत्र द्रव्यत्वाभावाभाव
संयोगवदन्यत्वाभावयोः प्रतियोगिवैयधिकरण्यानुपादाने व्यापकत्वं न स्यात् अन्योन्याभावाभावस्य प्रतियोगितावच्छेदकरूपत
यासंयोगवदन्यत्वाभावस्य च संयोगरूपस्य द्रव्यत्वाभावाभावरूपद्रव्यत्वसमानाधिकरणाभावप्रतियोगित्वादित्याहुः। न तु संयो
गाभाववत्त्वात् विभागाभावादित्यत्र व्यतिरेकिणि लक्षणमव्यापकं प्रतियोगिव्यधिकरणतादृशाभावाप्रसिद्धेरित्यत आह। संयोगाभा
वद्वृत्तित्वं तु पृथक्त्वस्य केवलान्वयित्वे विशिष्टे तस्मिन् साध्ये लक्षणमतिव्यापकं स्यादित्यत आह प्रतियोगीति तत्र संयोगाभावेम

राम
२०२

विभागाभावः तादृशः प्रतियोगिवैयधिकरण्यावच्छेदकावच्छिन्नः तथा च प्रतियोगिवैयधिकरण्यावच्छेदकावच्छिन्नसंयोगाभाववान् तादृ
शविभागाभाववानित्यादि संग्राह्यमेवेति भावः ननु धूमवान्वह्नेरित्यादौ द्रव्याभावत्वेन व्याप्यतया आर्द्रेन्धनजत्वाभावेन व्यापकतया
प्रतिव्यापकं स्यादत आह व्याप्येति वैज्ञानिकमिति न तु साध्याभावेत्यादि व्यतिरेकव्याप्तिलक्षणांशघटितमेव तस्य चात्राबोध
इति साध्याभावेत्यादि वैज्ञानिकत्ववर्णनमनुचितं अन्यथा वह्निमान् गगनादित्याद्यनुरोधेन हेतुसमानाधिकरणेत्यादि व्या
प्तिघटकमपि वैज्ञानिकतया व्याख्येयमिति वाच्यं साध्यस्य साधनादित्यत्र तस्य मूललक्षणपर त्वाभावेन वास्तविकत्वशं
कानिरासायानन्तरनयात तथा व्याख्यानात् तथा च मूलोक्तसाध्याभावेत्यादिकं व्याख्यानं न तु स्वोक्तसाध्याभावेत्यादिकमिति
न तु साध्याभाववत्त्वज्ञानेनेयत्येऽप्रसिद्ध्याभावसाधारण्यं न स्यादित्यत आह व्यापकीयत्वेनेति व्यापकतावच्छेदकावच्छिन्नीय
त्वेनेत्यर्थः साध्यस्य साधनादिति मूलस्योपष्टम्भकत्वं व्यापकेत्यादिमूलस्य वक्ष्यमाणपरत्वं न घटत इत्यत आह अभावावि

व्या०रा० विशिष्टाभावप्रतिबन्धक इति तेन नाहार्यानिश्चयसत्त्वेऽपि कामिनीजिज्ञासादिना प्रतिबन्धेऽपि न क्षतिः। ननु व्यापकाभावेन व्याप्याभावनिश्चये को
२०३ ऽपि व्याप्याभावत्वप्रकारकत्वानिवेशने जलादित्वेन जलादिभेदो न सिध्येत् इत्यत आह यद्रूपेति ननु व्यापकत्वांशे विरहे हीनेऽपि इदानीमुद्बुद्ध
संस्कारात् वह्नित्वावच्छिन्नज्ञानादेवानुमितिः स्यादित्यत आह व्यापकत्वनिविष्टेति अतिप्रसक्तत्वात् व्यापकत्वस्य व्यापकप्रतियोगिका
भावसत्त्वेनानुमित्युत्पादकत्वात् व्यापकत्वावच्छिन्नेति यद्यप्यत्र केवलान्वय्यादिकं प्रविष्टं तथापि संयोगेन व्यापकत्वावच्छिन्नस्याभावो
गुणादौ समवायेनाभावो जात्यादौ सुलभ एव एतदेवाह संभवतोऽपीति असार्वत्रिकत्वात् ह्रदो निर्धूमः निर्वह्नित्वादित्यादावभावात्। कार
णाननुगम इति निर्वह्नित्वहेतुकनिर्धूमत्वानुमितावेव वह्न्यादेर्नानारूपेण व्यापकतासत्त्वात् कारणाननुगमः न चान्वयव्याप्तावपीत्थम
ननुगमः विशिष्यकत्वनत्रापि संभवतीति वाच्यं निर्धूमानुमितावेवोक्तकारणानां नानाप्रकारककारणत्वस्य सत्त्वादननुगमात् संयो
गादिना व्यापकत्वग्रहे गुणादिपक्षकानुमितौ व्यापकत्वावच्छिन्नाभावस्यापि संभवादननुगम इत्यपि केचित् पूर्वोक्तमेवोपसंहरति एवं चेति राम २०३

अनुगतकारणतावादिमते धूमेति अत्र च धूममव्यापकतावच्छेदकतावच्छिन्नप्रतियोगितायस्येत्यर्थे वशान्नसामान्याभावत्वमिति न पूर्वोक्तासाव
त्रिकत्वदोषः व्यापकत्वस्यैक्याभावः कश्चिदित्यनेन सूचितः ननु व्याप्तित्वस्यैक्याभावान्मूलमसंगतमित्यत आह त्रेतित तथात्वाभावादिरेव तथा
विधोऽर्थ इति भावः पक्षस्य पक्षतावच्छेदकावच्छिन्नस्य ज्ञानापेक्षया लाघवादाह पक्षेनेति यद्यपि च पक्षज्ञानमात्रं कारणमित्युक्तौ लाघवं वैप
रीत्यं तदा पाकानुमानादिवदप्रसिद्धपक्षकानुमानस्यापि स्वीकाराद्व्यभिचार एवेति पूर्वाः स्वरसो बोध्यः ननु वह्न्यभावाभावस्यैकत्वप्रकारकान्वय
व्याप्तिग्रहाधीनानुमितौ व्यतिरेकव्याप्तिजन्यानुमितेन कश्चिद्विशेष इत्यत आह अन्वयिनेति तथा चान्वयिनेति तत्त्वावान्वयिनि वह्न्यभावत्वाभा
वत्वनिरूपितवह्न्यभावाभाववैशिष्ट्यवैशिष्ट्यबोधव्यतिरेकिणि तु पक्षवृत्तिरभावो वह्न्यभावीय इति एकस्य द्वयमिति न्यायेन बोधः अभाव
त्वं तु सामान्यसामग्रीमहिम्नैव भासते अनुभवानुरोधात् पक्षवृत्तिः प्रतियोगितासंबंधेन वह्न्यभाववानित्येवानुभवो न कस्यांतरंगौ
रवादिति अभावत्वाभानमेवेत्यपि वदंति इत्थं च विचारणीयमिति योजनानवेतदनुरोधादेवानुमित्योर्वैलक्षण्यं व्यतिरेकिनि वि

अशिकु
२०४

शिष्येव कार्ये कारणाभावान्निर्वाह इति वाच्यं परामर्शात्मकविशेषणतावच्छेदकज्ञानमादायानुमितेर्विशिष्टवैशिष्ट्यरूपत्वासंभवादिति अनु
मितित्वावच्छिन्नाप्तवादिनां मतमाह केचित्त्विति अयमस्वरसः विशिष्टवैशिष्ट्यबोधं प्रति विशेषणतावच्छेदकप्रकारकज्ञानस्य जनकत्व
ध्रौव्यं तत्र यदि प्रकारान्तरेण विशेषणतावच्छेदकप्रकारकज्ञानमादाय तदुपपत्तिस्तदा तादृशज्ञानाभावस्थलेऽनुमितेर्विशिष्टवैशिष्ट्य
बोधत्वानात्मकत्वस्वीकार इति तदाकारावश्यकत्वे कृतं परामर्शानुपनीतभानस्वीकारेणेति। ॥२०॥ उचितेति औचित्यं कथकसं
प्रदायसिद्धत्वं आनोव्युत्क्रमोक्ततादृशसमुदायस्य दासः पंचकत्वं वक्ष्यादिसाधकन्यायाभिप्रायेण ज्ञातोऽसाधकतास्यतीयवतुरवयव
न्यायेऽव्याप्तिः न च पक्षघटितानुपूर्व्यो विन्यादेव सिद्धौ विशेष्यदलवैयर्थ्यं द्वितीयावयवघटितन्वाक्यचिकाधिनोचितानुपूर्वीकत्व राम
संभवात्समुदायत्वं तु न्यायत्वस्य व्यासज्यवृत्तित्वस्फोरणाय ननु न्यायज्ञाने तदघटितप्रतिज्ञादिज्ञानं तस्मिंश्च ज्ञाने न्यायज्ञाननि २०४
त्यन्योन्याश्रय इत्यत आह प्रतिज्ञात्वादिकमिति ननु साध्यादिभेदेन नियंत्रणोऽननुगम इत्यत आह व्याप्त्यादेरिति मूलोक्तल

तां दूषयति एतेनेति समाहितमिति त्यनेनान्वितं ननु प्रतिज्ञानिगमनयोः । तथात्वेपि प्रतिज्ञायाहेतुमादाय निगमनस्य वोपनयमादाय
तथात्वसंभवादित्यत आह उदाहरणेति प्रागेवेति सूत्रमित्यतोर्थकोन्वयः कथं विदितिउपनयस्यायमादिवदानुषंगेनुनतथात्व
माकांक्षाशांतेरितिभावः विशिष्टेकार्यैति प्रतिपत्तिः परामर्शः । तत्परत्वं तत्तात्पर्यकत्वं तद्विषयपरामर्शविषयः तत्पदार्थः व्याप्तिपक्षध
र्मतारूपः तदानुकूल्यं परामर्शानुकूल्यं तथात्वमितिहेतु आप्त्यादिप्रदर्शकोपस्थापनद्वारा तद्वाक्यस्यापि तथात्वमित्यर्थः प्रतिज्ञादीनां
सर्वेषांन्यायघटितत्वेनगौरवादाह न्यायेति अत्रन्यायांतर्गतत्वं अनुक्रमेणानेन प्रतिज्ञास्य निगमनस्य यो पर्वतोवह्निमानितिभा
गयोर्नीतिव्याप्तिः नन्वत्रलक्षणेऽव्याप्तत्वकोटोपंचमत्वं तत्त्वलाक्षणिकपदवत्त्वमेववक्तव्यं तथाच धूमादालोकवानित्यादौ प्रतिज्ञै
कदेशे धूमादितिभागे ऽतिव्याप्तिः तस्यापि न्यायांतर्गतत्वे सति तथात्वात् नन्वप्रकृतसाध्यान्वितेत्यादिविवक्षयैव तत्प्रतीकार
तथापि पांडरप्रभवत्वे सति धूमादित्यादेरितिव्याप्तेरेवमन्यदप्यूह्यमत आह प्रतिज्ञाद्यघटकेति अत्राद्यपदत्वमेकदेशास्य

अधिक वारणाय द्वितीयदलं तु विभिन्नभागघटितस्य वारणायनेन प्रतिज्ञैकदेशहेत्वेकदेशयोः प्रतिज्ञाहेत्वादौ अन्यायपर्यन्तस्य च वार

२०५ णं अत्रापि न्यायान्तर्गतत्वे सतीत्यनुषंजनीयं अतो नोदासीनाव्याप्तिः घटकत्वं च स्वभिन्नत्वे सति तद्विषयकप्रतीत्यविषयत्वं

नातः प्रतिज्ञादिष्वसंभवः प्रतिज्ञाहेत्वेकदेशातिव्याप्त्या प्रतिज्ञाहेत्वादेरिव प्रतिज्ञानिगमनैकदेशनादेरपि धरणमिति ध्येयं

केचित्तु न्यायान्तर्गतत्वमात्रेण च प्रतिज्ञानिगमनैकदेशातिव्याप्तिः प्रतिज्ञाहेत्वित्यादिरूपविलक्षणतया प्रतिज्ञानिगमनादेर

पि संग्रहादित्याहुः भागद्वयमित्यत्र द्वित्वमविवक्षितं प्रतिज्ञादीत्यत्रापि न्यायान्तर्गतत्वमनुषंजनीयं प्रतिज्ञात्वादिकं च स्व

विवक्षित प्रतिज्ञाप्रतिपाद्यत्वमात्रेणोपकदेशविषयस्यापि संग्रहादतिव्याप्तिरत आह तत्तदिति केचित्त्वस्य रसोद्भावनं नावहि

शाब्दार्थज्ञानजनकत्वस्याधिकविषयेऽपि सत्त्वादतिव्याप्तिः न स्येवेति मूलं लक्षणाद्वयसंत्वं च न क्षतिकरमित्यस्य संलग्नं राम

इत्यतो भावं द्रष्टव्यमिति न श्राव्येति अनेन वादिना लक्षणान्यथानुपपन्नेर्मानत्वं मुक्तस्यास्तामिति भावः सर्वासामेक सांकर्य २०५

माविष्टं त्रुमाह यं वेति तुल्यन्यायतया न्यूनतापरीहाराय तदाह द्वित्रादीति तत्र तत्रेति न्यायजन्ये द्वित्रादिजन्ये एकैकजन्ये चेत्यर्थः
सर्वत्र सर्वजातिस्वीकारेऽन्यूनानतिरिक्तवृत्तिनानाजातिस्वीकारः स्यादित्यत आह एकेति एतन्नयेऽवच्छिन्नस्थान्यथेत्यस्यानु
गतकारणं विनाजात्यस्वीकार इत्यर्थः पूर्वनयेऽव जातिस्वीकारवदित्यर्थः आहुरित्यस्वरसोद्भावनं न ह्रीजं तु निष्कृष्टैक
जातिस्वीकारे संकरार्थी संगतिरिति तदाहरणान्नेति तत्र हेतुविशिष्टपक्षसाध्यवैशिष्ट्यज्ञानजननं पनयात्त्वे निति तत्र पक्षता
वच्छेदकविशिष्टे विशिष्टहेतुवैशिष्ट्यज्ञानमिति क्रमेणोपनयव्यावृत्तिः अत्र च हेतोः पक्षतावच्छेदकत्वस्य साध्यत्वस्य चाने
गीकारात्तयोरतिव्याप्तिः एवमनुपंगास्वीकारेणानिगमनेऽतिव्याप्तिः तत्र मूले यथाक्रमतिति बोध्यं। तद्देश्यत्वस्य ज्ञ
प्तावच्छिन्न तथा अत उद्देश्यीय प्रतिज्ञासमव्याप्त्या इह प्रकृतेत्यर्थ इति तद्वह्निसाध्यक इति चाद्य प्रकृतपदादानेयत्तु किंचि
न्यायावयववत्वे सति प्रकृतानुमित्यन्यूनेत्यादिकमर्थः स्यात्तथाच वह्निव्याप्यसाध्यकप्रतिज्ञालक्षणस्य वह्निसाध्यकोप

अदीक्ष नयेऽस्ति व्याप्तिः तद्दाने तत्तत्साध्यकन्यायावयवत्वाभावान्नातिव्याप्तिरित्यर्थः द्वितीयप्रकृतपदादाने प्रकृतन्यायावयवत्वेऽसति यत्किंचि
२०६ दनुमित्यनुकूलेत्यादिकमर्थः स्यात्तथा च वह्निसाध्यकप्रतिज्ञात्वलक्षणस्य वह्निसाध्यकोपनयेऽस्ति व्याप्तिः तद्दाने च वह्निसाध्यकानुमित्यनुकू
लानतिरिक्तेत्यादेरभावान्नातिव्याप्तिरिति प्रकृतत्वस्याव्यावर्तकतया निष्कर्षमाह तथा चेत्यादि अत्र साध्याप्रवेशे वह्निसाध्यकोपनये
पर्वतपक्षकवह्निव्याप्यधूमसाध्यकप्रतिज्ञालक्षणातिव्याप्तिः तस्यापि पर्वतपक्षकन्यायावयवत्वात् पक्षपदादाने च अप्रसिद्धेश्चेयं व
ह्निमदित्यत्र हेत्वर्थप्रविष्टसंबंधेन वह्नेः साध्यत्वे वह्नेरित्यादौ हेतावतिव्याप्तिः तस्यापि वह्निसाध्यकन्यायावयवत्वात्ज्ञानज्ञाप्य
त्वपक्षकवह्निसाध्यकानुमित्यनुकूलानतिरिक्तविषयकमात्रांशे शाब्दज्ञानजनकत्वात् च एवमुक्तरूपापि बोध्यं ह्रमादित्यादि नत्वप्र राम
हेत्ववयवप्रविष्टज्ञानज्ञाप्यत्वस्यैव वह्निनिरूपितत्वेन भिन्नतया अनतिरिक्तपदेनैव वारणं न च धूमादित्य +ध्व+ त्र सर्वत्र पंचम्याया २०६
वतेर्ज्ञानज्ञाप्यत्वमुपस्थाप्यते गृहे घट इत्यत्र गृहान्वयि घटस्येव अत्रापि आलोकान्वयिज्ञानज्ञाप्यत्वस्य अन्वयबोधस्वीकारादिति

चेन्न धूमाद्वह्निमतःप्रथमोद्भूत्य तात्पर्यो तन्न च हेत्ववयवजन्यबोधेयावत्ज्ञानज्ञाप्यत्वमेव भावनामिति वाच्यं श्रोतृरकालीनवाक्यैकवाक्य
ताबोधतात्पर्यानुरोधेन तदन्वयिज्ञानज्ञाप्यत्वस्यैव तात्पर्यमिति अन्यथानुकुलपवनीत्यादावपि यावत्कर्मतान्वयापत्तेरिति न्यूनतेति वह्निमा
नित्यत्र विशेष्यसाकांक्षत्वादित्यर्थः आदिपदादयमित्यादिपरिग्रहः तथाच न्यूनविषयकशाब्दज्ञानजनकत्वं इत्यंश अनुषंगादन्यूनविष
यकशाब्दज्ञानजनकत्वेन नानुसारक्किकान यथाश्रुताशंकानिरासिकाद्रत्यत आह तदर्थ इति न परामर्शहेतुर्न परामर्शप्रयोजकः अन्याया
वयवद्रित्यर्थः तदपि निगमनमपि न नुञ्च बाधितत्वादेः पदार्थत्वेन वाक्यार्थत्वेन वा न तदर्थत्वं न वलक्षणायोनत्वं विनापि लक्षणां न ह्योधो
पपत्तेरिति निगमनसि कुत्र्याह न ह्यौपयिके ति विशिष्टेति व्याप्तिपक्षधर्मताविशिष्टेत्यर्थः पृथिवी इतरेभ्यइति यच्छब्दीनरेभ्यइत्यस्यैव बकु
सुदर्शनात्तथा संप्रदायः तेथापि इत्थमपि न ह्नतिरिति भावः ननु अनतिरिक्तपदं नेनदाहरणेन अयमर्थः प्रतिज्ञाहि पृथिव्यां इतरभे
दं विषयीकरोति उदाहरणं चेतरभेदाभावे पृथिवीत्वाभावं च जलादौ विषयीकरोति अतिप्रसक्तत्वादिति तत्पदानेपि इतरावयवसाध्य

आ॰ शि॰ छ रूपादित्यर्थः तावतापि तात्पर्यभ्रमेणापि तथात्वसंभवः पृथिवी निष्ठेतरभेदवत्त्वविषयीकरणासंभवः यत्रेत्यादि यद्यपि पृथिवीतरभेद
२०७ वयत्तावती यत्र इत्याद्यन्वयः संभवत्येव तथापि साध्याभावतात्पर्यकत्वानिर्वाह इति भावः अत्र केचित् अत्र तादृशशाब्दज्ञानजनकत्वं फ
लोपहितं सभावौभादिना अजनितबोधायां प्रतिज्ञायामव्याप्तेः किंतु योग्यत्वं तदवच्छेदकं वसमानानुपूर्वीकत्वं तथा च इतरेभ्यो भिद्यत इ
त्यस्यापि सांप्रदायिकतया पृथिवी इतरेभ्यो भिद्यत इति वाक्यतादृशानुपूर्वीकमेव निर्वहनीति व्याप्तिर्नवसेयेति तत्र विरुद्धतात्पर्य
कत्वादेरभावस्य योग्यतावच्छेदककोटिप्रविष्टत्वात् अन्यथातिप्रसंगात् तथा च विरुद्धसमभिव्याहारत्वान्न तथात्वमिति वाक्ये
केति नयनयार्थस्य विशिष्टस्य विशेष्यतावच्छेदकत्वादित्यर्थः तदेति इदं च पक्षसाध्यतद्वैशिष्ट्यभानमभ्युपेत्य यद्विच पक्षतताव
च्छेदकप्रकारेण पक्षे साध्यतावच्छेदकप्रकारेण साध्यवैशिष्ट्यभानमुपेयते तदाह यत्र चेति पक्षस्य तादृग्यं पक्षतावच्छेदकप्र राम
कारेण साध्यवत्ताभानार्थं तथा च पर्वतो वह्निमानित्यत्र यो यो वह्निमान् स वह्निमान् तथा पर्वत इति दृष्टान्तवद्युदाहरणे २०७

वह्निव्याप्यवह्निमानयमित्युपनयार्थं पक्षतावच्छेदकप्रकारेण पक्षस्य दृष्टान्तत्वं विरुद्धमित्युपनयपर्यन्तानुधावनं यदि च वक्ष्केकदे
श्यतावच्छेदकतया विधेयतावच्छेदकत्वमनुपपन्नमिति तदुदाहरणानुपपत्त्या नन्यायप्रयोग इति विभाव्यते तदाह यत्र वेति यदि च
उदाहरणीयशाब्दादिभ्यः साध्यत्वेनैव बोध्यः पक्षतावच्छेदकस्य अवच्छेदकत्वविषयीकरणं वन दाहसत्त्वं नेस्य वेति अवय
वा घटकेतिप्रतिज्ञैकदेशवारणाय तत्र अतिरिक्तपदं सर्वमिति व्यासज्यवृत्तिधर्मस्य पक्षतावच्छेदकतया सर्वत्वानेवानु
मितौ विषयीकरणं तथा चातिरिक्ताप्रसिद्धिः अत्र सर्वपदानुपादाने अभिधेयत्वप्रकारेण तदवच्छेदेन पक्षतायामविधावद्वि
षयत्वं विवादग्रस्तं अभिधेयपदानुपादाने सर्वपदस्य नानाविधावेत्ताबुद्धिवारकतया यावद्विषयतायां विवाद इति तत्पदं त
द्दाने च समभिव्याहारितया यावत्पदार्थवृत्तिसर्वत्ववावगतत्वात् सर्वपदस्येति तत्त्वाभ इति न ताहृशीति तथा च न्यायाभावा
देव न तत्त्वेन्यमिति तेन नु प्रमेयत्वं अभिधेयनिष्ठात्यन्ताभावप्रतियोगि न वेति संशयः संभवेत्येवेत्यतः प्रकृतानुमितौ तिन न्व

नेऽ　　　　　　　　　　　　　　　　　　　　　　　　　　क१

अशिष्ट न्तेऽपनयेऽतिव्याप्तिरिति प्रकृतानुमिति प्रकारेत्वेति अत्र च प्रकारतामात्रं सामान्यं वा विलक्षणप्रकारता वा आद्ये दूषणमाह सकल
१०८ मिध्येयेति द्वितीये दूषणमाह सकलेति सर्वेषां प्रकारत्वाय नु दाहरणोत्तमयत्र साकल्ये अत्यंताभावेति विलक्षणप्रकारतास्वनायसर्वम
नसाधारणाय व्यतिरेकिसाध्यत्वव्यत्वमुक्तं हेतुपक्षतावच्छेदककोटिप्रविष्टोयः कश्चित्पदार्थो विलक्षणप्रकारतया अत्रेदं ध्येयं इदं
च विशिष्टनिरूपितप्रकारताया अवेत्यद्वितयेति विलक्षणप्रकारतासमसंख्यप्रकारताकत्वविवक्षया त्वपनयवारणं तत्र पक्षतावच्छे
दकवह्निमत्त्वेन व्याप्तिभाना अधिकप्रकारतावत्वादिति कश्चित् प्रकृतेत्यादि प्रकृतसाध्यवैशिष्ट्यविषयत्वमात्रोक्तौ वह्नीयद्रव्या
त्मप्रमेयवह्निमान् पर्वतो वह्निमांश्च द्रव्यान् इत्यत्र हेत्ववयवे अतिव्याप्तेः अत्र साध्यवैशिष्ट्यविषयत्वेनान्यूनविषयत्वात्
ताद्रशविलक्षणविषयताशून्यत्वाच्च अत आह प्रकृतेपक्षेति पक्षतावच्छेदकावच्छिन्नेत्यर्थः प्रकृतसाध्येत्यस्य व्यावृत्तिमाह राम
प्रकृतेत्तिनुत्वं प्रमेयं अभिधेयादित्यादौ अत्र साध्यतावच्छेदकव्यावृत्तिरपि बोध्या इदं च व्याप्तिविषयकत्वविवक्षानुसारेण दू १०८

हे१　　　　　　　　　　　　　　　　　　　　　　　श्रो१

मात् प्रमेयवत् ज्ञानज्ञाप्यत्वं अभिधेयवत् धूमादित्यत्र बोध्यं ज्ञानज्ञाप्यत्वं प्रमेयं प्रमेयत्वादिति न प्रयोग इति हृदयं अर्थपदाननुषं
गोऽपि ज्ञानज्ञाप्यत्वं सत्तावत् विशिष्टसत्त्वादिति अत्र हेतूपनययोरतिव्याप्तेराह तादृशेति प्रकृतसाध्यकप्रकृतपक्षकवैशि
ष्ट्यविषयतेत्यर्थः। ननु वैशिष्ट्यविषयताविलक्षणविषयतावत्त्वं पक्षसाध्ययोः अत्र तावज्ज्ञानगतवैशिष्ट्यविषयताविलक्षणा
विषयताप्रसिद्धा तत्ताच्चं न त्वानुगम एवं एकत्वादिविषयतामादाय असंभवोऽपीति अत आह प्रकृतहेतुकेति तेन उभयव्या
प्तिसंग्रहः तेन व्यतिरेकिसाध्यकनिगमनव्युदासः क्रमेण व्याप्तिमाह वह्निव्याप्येत्यादिना वह्निव्याप्यालोकवत् पर्व
तो वह्निमानित्युक्तौ वपर्वतेयत् किंचित् वह्निव्याप्य इति ज्ञाने हेत्ववयवात् स्थापनात् इत्यत आह सधर्मेति अत्रैव
वह्निव्याप्यवत् प्रमेयवत्सधर्मा पर्वतो वह्निमान् तेजोव्याप्यधूमवान् पर्वत इत्यादाववच्छेदकव्यावृत्तिर्बोध्या
वह्निव्याप्येत्यादे अत्र च साध्यहेतूनां नानात्वं शेषे च एकत्वमित्यनयोर्भेदः संबंधभेदमादाय भेद इत्यन्ये अ

अशिक्ष न्यथा आनाकांक्षितानभिधाने अतिप्रसंगो यस्य कस्याभिधानं अतएव आकांक्षाविरहादेवयत्र समयसंबंधस्तत्र न भयोपन्या
२०९ सइतित्तत्वं इदं तु न दनत्वमभिप्रेत्य अन्यथासिषाधयिषयानन्यथाप्रयोगेऽव्याप्तिरिति अत्र यदित्याद्यावयवत्वमुच्यते हेत्वंत
भागे पूर्वोक्तव्यावृत्तिर्न घटेते अर्थविषयवाघटकन्यायांतर्गतत्वं न दाहे त्वंतभागे इति व्याप्तिः तस्मान्न्यायावयवत्वमेव वाच्यं तथा
च सिषाधयिषादिना पूर्वोक्तव्यावृत्तिरवसेयेति ध्येयं यदि च सत्त्वमीदृश्य तत्त्वृत्त्यन्वयिप्रयोगोपवर्तिनीति अनुमितिसमानाका
रकज्ञानजनकमित्यर्थः। अनुमितौ हि पक्षत्वविशिष्टे स्वेअपरेपोकानुकूलवर्त्तमानकालेश्चय त्वसंबंधविषयाभावतेतथै
व प्रतिज्ञायामपि एवमुत्तरत्रापि न तु गोत्वसाध्यकानुमितिसमानविषयकत्वं साध्याभि[illegible]नायंगोरिति प्रतिज्ञाया इत्यत
आह तादात्म्येतितथा चानुमितिविधेयाप्रकारसमानाकारत्वमिति। ननु नदृशायां कथं न गोत्वं साध्यमित्यत आह गोत्व राम
त्वेति गोत्वस्य साध्यत्वे गोत्वत्वेऽनवच्छेदकत्वं ग्राह्यं तत्र नत्वनुपस्थितेन संभवतीति भावः। ननु गवान्यावृत्तित्वादिकमेव गो २०९

त्वस्य व्याप्तिः गोत्वं तु स्वरूपत उपस्थितमेव न त्वाव गोत्वत्वानुपस्थित्या वस्तिगोत्वस्य साध्यत्वमविकलमेव इत्यत आह पदार्थेतावच्छेत्यादि हे
त्वर्थस्य साध्यान्वयित्वं निरूढमेव न त्वाव पदार्थः पदार्थत्वेति न्यायात् आकांक्षाभावादिति। नथैवेति उपनयेहि साध्यप्रतियोगिकव्याप्ति
प्रदर्शनेनेयत्वं नञ्च वह्नेः साध्यत्वे संभवति वह्निमतः साध्यत्वे वह्निमत्वाप्येत्येवव कुमुदिनमिति। शाब्दज्ञानेत्येति समानविभक्तिकयोः
रेवाभेदान्वयस्य व्युत्पन्नत्वादिति भावः एवमितिभेदसाध्ये हि भेदस्य संबंधः संबंधविधया भासते मिद्धं तदुत्पत्र त्रकारतयामित्रमि
त्यत्र तदाश्रयाभेदः आदिशब्देनान्य इत्यादिपरिग्रहः तदायादृशे तिस्वे त्रपक्तकृतिसाध्यकःस्थले हि पाककृतिवैशिष्ट्यबोधिका
~~कृजादेः कृत्यवच्छिन्ने~~ यत्नवतीति प्रतिज्ञा एवं पाककृतिमानित्यत्र तादृशकृतिसमवाय्यभेदबोधिका एवं पक्तेत्यत्र पाककृतिकारक
धर्म्यभेदबोधिकात्तृजादेः कृत्यवच्छिन्न एव शक्तत्वात् अत एव यादृश यादृशेत्युक्तं तादृशानामिति अत्र निवर्त्यत्वं तादृशविशिष्टा
र्थविरोधितया तेन तादृशार्थविषयकसमूहालंबनमादाय अनिवर्त्यत्वं भक्तमिति निरस्तं। इत्थं च निरुक्तं तादृशबोधानिवर्त्यानुमि

अ॰सि॰ तिनिवर्त्तकतयाऽवर्तीत्याद्यव्याप्तिरतः संशयपर्यन्तं तदभावप्रयुक्तविरोधस्फोरकं एतेनाऽभंग्याऽनतिरिक्तविषयकत्वं लब्धं अन्यूनवि
२१० षयतामाह तावतेति अत्र यदि अवयवाघटकन्यायांतर्गतत्वं वेदनस्य वह्निमान् पर्वतः वेदनस्य वह्निसामग्र्यादृत्वात्र हेतुसंवेदनस्य
तिभागघटितप्रतिज्ञाघटके तादृशसमूहालंबनबोधकेऽतिव्याप्तिरिति न्यायावयवत्वं विवक्षितं तथा च तादृशबोधजनके न्यायावय
वत्वमिति तु क्रोडे नेतरासीति प्रतिज्ञायां भेदाश्रयतायाद्वृत्तिहेतोस्तादृशभेदाश्रयतावतीयं तथा चेयमित्याकारके तूपनयेऽतिव्याप्तिवारणा
जनकत्वमभ्युपेत्य लक्षणमिदमित्येके ज्ञानवत्ताज्ञानस्यापि ज्ञानज्ञानत्वेन जनकत्वमभिप्रेत्येत्यन्ये। धर्मितावच्छेदकेति ध
र्मितावच्छेदकविशिष्टधर्मिज्ञानस्य संशयसामान्यहेतुतया साध्यसंदेहजनकपक्षधर्मताज्ञानविषयत्वं धर्मितावच्छेद
के अतिप्रसक्तमित्यर्थः तथात्वेपि धर्मितावच्छेदकस्यासाधारणत्वेपि तद्वृत्तीर्णानेति असाधारणपोत्तीर्णतादशायामपि ध
र्मितावच्छेदकविधया जनकत्वमादाय अतिव्याप्तं स्यादित्यर्थः अन्यथात्र कृतसंशयजनकत्वस्य फलोपधायकस्वरू
पत्वे पक्षादावित्तिसाध्यवत्पक्षे साध्यनिश्चयः साध्याभाववत्तः पक्षत्वे साध्याभावनिश्चयः अत एवोक्तं यथायथमिति को
टिद्वयोपस्थापकत्वमित्यत्र द्वित्वसंवलितस्य तदुपस्थापकत्वं यत्रैकैकोटिद्वयुक्तं तदाह प्रत्येकेति साध्यसंदेहजनकत्व
पक्ष इति कोट्युपस्थिति द्वारा साध्यसंदेहजनकत्वमित्यर्थः सत्प्रतिपक्षेत तज्ज्ञानस्य संदेहजनकत्वे मानाभावः उत्तरका

त्वं कदाचित्साधारणादिधर्मदर्शनादेव संशयरूपमेव कश्चिदित्युक्तं भविष्यति। इदमित्यादि निखिलद्व्यणुकस्य पक्षत्वे नि-
श्चितसाध्यतदभावसहचारितत्त्वमणुत्वस्यासंभवनीयमत आह इदमिति तथा च द्व्यणुकान्तरेऽनित्यत्वसहचारात्साधारण्य-
ग्रहोऽणुत्वे सुलभ इति नित्यत्वसहचरितानणुत्ववदिदं द्व्यणुकमिति ज्ञानस्य विषयोऽणुत्वं द्व्यणुकं च तत्र द्व्यणुकं समवा-
येन सद्धेतुः पक्षधर्मताज्ञानपदानुपादाने तु नाद्विषयत्वाविशेषाद्गगनव[illegible]प्यत्तिव्यादिः स्यादिति तदुपादाने तु द्व्यणु-
कस्य धर्मिवृत्तित्वज्ञानं नजनकं किं त्वणुत्वस्येति तन्निरास इति संशयं चेत्यभ्युपगमवादेन तादृशकोट्युपस्थितजनक-
त्वस्यैव प्रकृतत्वादित्येके अन्ये तु पक्षत्रयं दृष्टेव साध्यसंदेहजनकत्वं कोटिद्वयोपस्थितिजनकत्वं वार्थ इत्याश-
तेन तथा चान्यविधकोट्युपस्थितेरपि साध्यसंदेहजनकत्वं नवो - नुवृत्त्यादिना तथोपस्थितेरपि साध्यसंदेहजन-
कत्वे पूर्वग्रंथविरोधः तत्र कोट्युपस्थितिजनकत्वेप्यनुवृत्त्यादि वि॰ शिष्टधूमवत्ज्ञाज्ञानस्य संशयजनकत्वाभावेन न

अ॰ शि॰ टी॰ स्पष्टं चैतस्य व्याहतिपत्तेति तात्पर्यं । अत एव तत्र कोटुपस्थितिं प्रति पक्षे धर्मेनाज्ञानाद्विशेषितं न दत्तमित्याहुः धर्मिमात्रेति सं
२३९ दिग्धसाध्यकत्वस्य वैयर्थ्याद्वा प्रवेश इति भावः । एवं तदप्रवेशे सं दिग्धसाध्यकत्वस्य प्रवेशे तु नदानीं पक्षत्वाभावादेव न त
दापत्तिरिति भावः । बाधादीत्यादिपदेन स्वरूपासिद्धिपरिग्रहः । तथा च नित्यत्वबाधावतारे पितृत्वनाशित्ववत्त्वग्रहात्तत्त्व
तज्ज्ञानस्य तादृशस्वरूपयोग्यत्वादित्याशङ्किते इष्टत्वादिति पक्षस्य स्वरूपयोग्यत्वेऽपि बाधनिश्चयादेव संशयाभावः । अ
न्यथा बाधावतारे नालन्दात्वे ह्रदो धूमवान् वह्नेरित्यादौ न तु तदलत्वेऽस्य तत्र तयोरन्यतरसौव दोषत्वादित्यत आह । असि
द्धेति तस्य सङ्कीर्णस्यानतिव्याप्तस्यातिरिक्तेति तुल्यन्यायतया विनिगमनाविरहेणाधिकमित्यर्थः । अतश्च यत्रोपष्टम्भकेना राम
यां बाधस्यैव प्राथम्यात्स एव वक्तुमुचितः । तथापि प्राचीननये बाधस्य दोषान्तरसाङ्कर्यात्तन्नाशि बाधायामपदोषधर्मद्वया २३९
दित्याभासत्व अतिरिक्तदोषान्तरासाङ्कर्यं काञ्चनमयधूमादित्यादौ न सुलभमिति तिन्ने त्यादि वह्निमान् धूमादित्यादौ च

कुशि०
२२६

आमाण्यसंशयान्तरमध्ये संशयद्वयम् आह प्रामाण्येति यथा प्रामाण्याप्रामाण्यसहचरितज्ञानत्ववत्ताज्ञाने प्रामाण्यसंशयस्तथात्म
वृत्तित्वतदभावसहचरितज्ञानविषयत्वसाधारणधर्मदर्शनादर्थसंदेह इति ननु तर्हि कथं सामान्यसंशयानुविधानमित्य
त आह प्रामाण्यसंशयेति आत्मवृत्तित्वनिश्चयसत्वे आत्मवृत्तित्वसंशयोऽनुपपन्नः प्रामाण्यसंशयेन चात्मवृत्तित्वज्ञानस्य
भ्रमत्वे शंकाजन्यत्वं यदवच्छेदकं तदवसायत्तद्वृत्तितदनुविधानमिति ग्रघट्टकार्थः। साधारणादिधर्मज्ञानवद्व्याप्य
संशयोऽपि व्यापकसंशयहेतुरिति मते नाह व्याप्यवृत्तेति तस्य साधारणएवांतर्भावः साधारणज्ञानहेतुतायां धर्मस्यैकवं
ज्ञानस्य निश्चयत्वेन विवक्षितमिति मतं असाधारणोक्तस्यांतर्भावइति मतं वमनसिकृत्योक्तं दृष्टोऽभिनिवदाइति व
नेनेति हेत्वाभासत्वोपयोगिसंबंधे नेत्यर्थः नेनेत्यादिसंबंधभेदाय हेतुद्वयानुसरणं व्ययमात्मज्ञानादिन्यत्रविषय मम
तासंबंधेनात्मत्वात्मत्वाभावसहचरितज्ञानवत्ताज्ञानस्य संशयजनकत्वेपि समवायसंबंधेन तस्मिन्नेवत्वात्विया २२६

ष्टिः तेन संबंधेन संशयाजनकत्वादित्यर्थ एवमुत्तरत्रापि यत्तु विषयतासंबंधस्य वृत्तिनियामकत्वाभावात्तेन तद्वत्ताज्ञान
मसंभवीत्यनुशयेन द्वितीयमिति तत्र लक्षणे संशयजनकताया वृत्तिनियामकसंबंधेन प्रवेशे तादात्म्यसंबंधादा
वव्याप्तिप्रसंगादिति प्रत्येकमिति तथा च द्वयपर्याप्तं तत्तद्वारतायेति विप्रतिपत्तेस्तु प्रतियोगिवाचकपदस्य प्रतियोग्युप
स्थापकत्वं न तु स्वभाववाचकत्वमिति ननु पदार्थोपस्थितिं प्रति प्रत्येकं तथात्वेपि शाब्दबोधं प्रति मिलितस्यैव जनक
त्वमस्त्वेवेत्यत आह मिलितस्येति ननतद्वत्वेति न विप्रतिपत्तिमत्ताज्ञानमित्यर्थः ननु बोध्यतासंबंधेन विप्रतिपत्तिम
त्ताज्ञानमस्त्वेवेत्यत आह न चेति तच्छब्दबोधेन तु पस्थापकत्वेनैव जनकत्वं न तु मिलितत्वेनेति भावः ननु पदत्वेन का
रतात्पर्यं मिलितत्वं मास्त्ववच्छेदकमानुपूर्वीज्ञानाधिकारतायां तु तदस्त्वेवेत्यत आह तथात्वेपीति पर्वतो वह्नि
मानित्यत्र यद्यपि द्वौ धर्मताज्ञानाय बोध्यतासंबंधेन विप्रतिपत्तिमत्त्वं तथापि अयं नेतदानस्य व्यभिचारित्वमेवव्या

आशिकृ
२३७

भावववतो ऽपि बोध्यतासंबंधेन विप्रतिपत्तिमत्वात् न चैवमुक्तधर्मितापदेनैव तद्वारणादिति अनुपसंहारित्वेत्यादि एतन्मते व्यभिचारिण
एवानुपसंहारित्वेन लक्ष्यत्वं व्यभिचारित्वमादायैव तत्र लक्षणगमनं अनुपसंहारित्वस्य तादृशोपाधेस्तथात्वाभावादिति मु
क्तक्रमेण यौगपद्याविवक्षणेन तद्ज्ञाने साध्यवत्ताज्ञाने तदुभयं साध्यं तदभाववत्त्वं तद्वित्यमिति धर्मिणि यद्रूपावच्छिन्नतद्
ज्ञानं संशयजनकं हेतोस्तद्रूपस्यावश्यं वाच्यत्वेन व्यभिचारिण एवानुपसंहारित्वेन लक्ष्यत्वं वाच्यं तथा चानुपसंहारि
तादृशायां संशयो वास्तु केवलान्वयिनो वास्तु न कश्चिद्विशेष इति किमर्थमनुपसंहारितादृशायां संशयानुसरणेनेति न
वाच्यं तदपि अनुपसंहारितादृशायां साध्यांशसंशयीभूतत्वसहचरितत्वभानमेव संशयजनकं वाच्यं तस्य तद्विशिष्टवै २३७
शिष्ट्यबोधात्मकत्वेन संशयजनकत्वादिति संशयादीत्यादिपदेन विप्रतिपत्तिपरिग्रहः स्यान्नन्वित्यादि तस्यैव धर्मि
णो घटकत्वनिश्चयवत्त्वलाभाय पूर्वमिति तथा च निश्चितघटकत्वकं तस्यैव धर्मिणः न चेदं तस्य तद्व्यावृत्तत्वमिति घट

त्याग्रह इति असाधारणपदं भ्रमसंपादनाय तत्तत्कालीननिश्चितसाध्यवद्व्यावृत्तत्वं वाच्यं तथा च पूर्वं घटत्वनिश्चये सति तत्कालीनघट
कत्वनिश्चयविषयत्वस्य घटान्तरे सत्त्वात्तन्न व्यावृत्तत्वमिदं त्वस्यास्त्येवाग्रे निश्चयविषयीभवदिति वदन्तीत्यत आह तत्तदि
नेति भिन्नत्वपर्यवसितं तत्तद्व्यावृत्तत्वज्ञानात्त्वं असाधारणे असाधारणत्वेन व्यवह्रियमाणे साहजिकेति वस्तुस्वरूपस्य
सर्वदाऽविशिष्टत्वादिति अनित्यतापक्षेऽपि पूर्वोक्तस्य तेऽसाधारण्यभ्रमं संगमयति एवं चेति शब्दोऽनित्यः शब्दत्वादित्यत्र दो
षताप्रयोजकत्वं निश्चितसाध्यवद्व्यावृत्तत्वं हेतोर्वस्तुतो वर्त्तत इति तदसाधारण्यं यत्रत्विति प्रदर्शितेऽयं घटपदेन व्या
दित्यत्रेत्यर्थः तदपि अनित्यदोषत्वमपि भ्रमेतिनिश्चितसाध्यवद्व्यावृत्तत्वादित्यर्थः केचित्त्विति इदं मिश्रितप्राचीनम
तेन प्राचां मते नित्योपाधिभ्रमाभावात् स्वमतमाह वस्तुत इति यथा साधारण्योपाधौ निश्चितत्वमकिंचित्करत्वं तथा
ऽसाधारण्येऽपीति अनुपदमेव व्यक्तीभविष्यतीत्येवेदं नेत्रासाधारणत्वभ्रमे व्यवहारं घटयति असाधारण्यं त्विति तथा च

अशिकृ
२३८

शब्दोऽनित्यः आकृत्वादित्यादौ पक्षमात्रवृत्तित्वादेव तद्व्यवहार इति भावः एवं चेति साध्यतदभाववद्व्यावृत्तत्वस्यासाधारणत्वादित्यर्थः
ननु तस्या वृत्तित्वरूपस्वरूपासिद्ध्याऽन्यथासिद्धत्वमतः पक्षवृत्तित्वेति तथा च गगनस्य यदा पक्षवृत्तित्वज्ञानं तदाऽस्वरूपासिद्धत्व
ज्ञानाभावादसाधारण्यज्ञानात्प्रतिबंधेन च तस्याधिक्यमिति भावः ननु वृत्तिमत्त्वज्ञानकाले उभयव्यावृत्तित्वज्ञानं न संभवत्येव कु
तोऽसांकर्य्यमित्याशंक्य निषेधति नन्वेति विरोध इति प्राप्त्याभावानवगाहित्वात् आचांमनंतद्विषयतिनिष्ठ्यनेति तुल्यमिति दोषत्वाप्र
योजकस्यापि घटकत्वमित्यर्थः अतिप्रसंगादिति हेत्वाभासव्यवहारस्तत्रापि स्यादिति मानाभावादिति संदेहाप्रयोजकांश
शस्यापि तत्त्वघटकत्वे मानाभावादित्यर्थः ननु असाधारणस्थले शब्दोऽनित्यत्वसंदेहदशायां साध्यवद्व्यावृत्तत्वसामान्याभाव
ज्ञानस्य संभवेऽपि यत्र किंचित्साध्यवद्व्यावृत्तत्वं च धूमादिसाधारणं तद्विषयकं ज्ञानेनिष्ठिन यावत्साध्यवद्व्यावृत्तत्वमुक्तं साधार राम
णतापाओ तु साध्यवद्वृत्तित्वज्ञानादेव निष्ठिन्नभागो व्यर्थ इत्याशङ्क्याह किंचेति साध्यसंदेहजनकतावच्छेदकं रूपं साध्यतदभा २३८

वच्छिन्नसंयुक्तत्वं तस्य संयोगरूपस्य विशेषणत्वे महानसवृत्तिवह्निना समं तादृशसंयोगाभावादव्याप्तिरित्यर्थः । नुपलब्धेर्गणादृत्तितद्वृत्वे
न थाव्याप्तिग्रहेपि प्राचीनोपाधिसंबंधमादायातिव्याप्तिरित्यर्थः द्वयोरपि निरुक्त्याघटितत्वे नुपलब्धेर्गणात्वपक्षएव कोयानितिनिनु सर्वे
षां दोषाणां नित्यत्वेऽन्तरेणेत्यादिमूलमसंगतमित्यत आह असाधारणेति मूलार्थमाहान्यथेति ननु विरुद्धसाध्यासामानाधिकरण्यंन
व ग्रहतहेतोस्तत्संभवतीति प्राचीनमते विरुद्धत्वं संगमयति अनवगतेति द्वयं नसाध्यवद्वृत्तित्वेनेति मूलस्य निष्कृष्टेत्यादि रि
त्याशयः व्यक्तं नन्वनिसंशयप्रयोजकस्य साध्यतदभाववद्वृत्तित्वस्य व्यक्तत्वस्तत्र सत्त्वादिति ननु प्रतिबंधकत्वव्यक्तेदकं साधा
रणत्वादिद्वयं त्वविभाजकं तदा कुतो मूलदोषसंगच्छत इति मूलाभिप्रायं वर्णयति यद्वेति ननु असाधारणत्वादिप्रतिबं
धकमेव इदमपि प्रतिबंधकं स्यादित्यत आह व्यक्तं तस्त्विति एवमिति उत्तरलक्षणोपि विरोधित्वादिज्ञानं न प्रतिबंधकं
ग्राह्याभावानवगाहित्वादिति पक्षवृत्तित्वेसतीत्यादि ननु हेत्वाभासोपाधेर्विरोधित्वमसंभवि ज्ञानस्यैव विरोधित्वादित्यत

अधीकु आह विरोधित्वमिति अयंतेति व्याप्तिशरीरस्य सर्वैकालिकाभाववत्त्वमर्थस्तदवच्छेदश्च यदाकदाचित्तत्त्वेनापि भवति हि
२३९ व अभाववत्त्वनिरासमस्याविनहानस्ववह्निनो यदाकदाचित्तत्त्वमिति नन्विदमुपलक्षणत्वपर्यवसन्नं तथान्यथात्त्वेन हि
न व्याप्तिके व्यतिव्याप्तिरित्यत आह साध्यवद्वृत्तित्वेति तथा च तत्त्वेन सग्राकर्त्यत्ते निश्चितभागं विहाय साध्यवद्वृत्तित्वमेवा
साधारणमिति भावः अपदेति स्वरूपासिद्धत्वोपाधिमतिसद्धेतौ विरुद्धे वाऽतिव्याप्तिवारणायेत्यर्थः ननु यथाऽनमूलं स्व
रूपासिद्धे साधारणाव्याप्तिमत आह संदिग्धेति विशिष्टेति हेतुतावच्छेदकविशिष्टेत्यर्थः संदिग्धत्वं परित्यज्य तन्निष्कर्षमा
ह तथा चेति पक्षतावच्छेदकेत्यनेनाश्रयासिद्धिनिरासः साध्यतावच्छेदकेत्यनेन पक्षसाध्यवैशिष्ट्यमह विरोधिनो बाधस्य गान
सत्त्वेति पक्षस्य च निरासः हेतुतावच्छेदकेत्यनेन साधनाप्रसिद्धिनिरासः अत्रापि पक्षे इत्यस्यान्वयात् पक्षे हेतुवैशिष्ट्यग्रह २३९
विरोधिस्वरूपासिद्धिनिरास इदमेवाह पक्ष इत्यादिनाऽप्रसिद्धीति ह्रदो धूमवान् वह्नेरित्यादौ वह्नेः स्वरूपासिद्धत्वेऽपि साधा

रणत्वविवक्षितरूपसत्त्वात्संग्रहः । ननु साध्यासमानाधिकरणत्वं न विरुद्धत्वं तस्यासाधारणत्वेनोक्तत्वात् अतः साध्यव्यापकीभूता
भावप्रतियोगित्वं वक्तव्यं तच्चोक्तरूपेण न संगृहीतमित्यत आह विरोधइति साध्यव्यापकीभूताभावप्रतियोगित्वस्य यत्फलं साध्यव्या
पकीभूताभावप्रतियोगिमानिति परामर्शरूपं तस्य पक्षसाध्यवैशिष्ट्यज्ञानविरोधित्वात् । ननु साध्यव्यापकीभूताभावप्रतियो
गित्वमेव प्रतिबंधकमन्यथा तज्ज्ञानपरामर्शस्यैव प्रतिबंधकत्वे तस्य पक्षसाध्यवैशिष्ट्यज्ञानाविरोधित्वात् हेत्वाभासतोपा
धित्वानुपपत्तिरित्यनुसारेणाह तदन्यत्वेनेति केचित्तु साध्यव्यापकीभूताभावप्रतियोगित्वमभिप्रेत्य विरोधइति साध्यासमा
नाधिकरणत्वं विरुद्धत्वमित्यभिप्रेत्याह तदन्यत्वेन वेति तन्न साध्यसमानाधिकरणत्वस्यैवसाधारणत्वात्तद्भिन्नसाध्य
वद्व्यावृत्तस्यासाधारणत्वे पूर्वग्रंथविरोधात् अव्याप्तिपदस्योपलक्षणपरतया व्याख्यानत्वेनासाधारणत्वोक्तौ स्तादृशार्था
नतिप्रसंगात् ननु सिद्धांते यद्विरुद्धान्येति विशेषणं तदा विरुद्धसंकीर्णासाधारणेऽव्याप्तिरित्यत आह हेत्विति तत्र साध्या

अ॰शि॰कृ॰ समानाधिकरणत्वस्यैव वैशिष्ट्यस्य प्रवेशादिति भावः संबंधेति मूलस्थसंबंधपदस्यार्थः बाधादीत्यादिपदेनाश्रयासिद्ध्यादिपरि-
२४० ग्रहः आयशब्दस्य व्याचष्टे माइ घटत्वमिति अयमर्थः बाधादौ साध्याभावस्य पक्षसंबंधित्वेनैव ज्ञानं प्रतिबंधकं तथान्वयप्र-
पक्षेऽपि हेतुस्तत्र हेतुसंबंधित्वेनैव बाधाद्युपस्थितेः प्रतिबंधकत्वात्तत्र बाधसत्प्रतिपक्षाश्रयासिद्धि अव्याप्तिः प्रयत्नेनेति तत्सा-
ध्यकतद्धेतुकानुमितित्वावच्छेदेन हेतुनिष्ठतयायत्प्रतिबंधकं तदुक्तं इत्थं च बाधादीनां पक्षविशेषणनियंत्रितत्वात्तद्वारणमि-
त्यर्थः ननु वह्निमान्धूमवान्द्रव्यत्वात् इत्यादौ वह्निमद्वृत्तित्वरूपासाधारण्योपाधेः पक्षहेतुवैशिष्ट्यज्ञानविरोधित्वेनाव्या-
प्तिरित्यत आह वस्तुतस्त्विति स्वरूपासिद्धिसाधारण्याव्याप्त्यातदर्थमाह नाहृशेतिननु तथापि तदव्याप्तिरित्यत आह नयावेति
व्याप्तिग्रहेति वह्निमद्वृत्तित्वग्रहस्य सामानाधिकरण्यग्रहविरोधित्वेन सव्यभिचारोपाधित्वमिति फलमाह तेनेति ननु राम
तथापि साध्याप्रसिद्ध्यादावव्याप्तिरित्यत आह खिवेवाविवक्षितेनेति तथा च साध्यतावच्छेदकावच्छिन्नसाध्यज्ञानाविरोधित्वेन २४०

त्यादिविशेषणादेवनातिप्रसंग इति अत्र विसाध्यव्यापकीभूताभावप्रतियोगित्वस्य विरुद्धत्वस्य सत्प्रतिपक्षोन्नयनद्वारादूष
कत्वेन तस्य व्याप्तिग्रहविरोधित्वाभावादेवनातिव्याप्तिग्रहं प्रत्येव न तस्य तोदूषकं तदा विरुद्धत्वान्येति विशेषणमिति हृदयं न
नुकूले सपक्षविपक्षवृत्तित्वं साधारणत्वमुक्तं न चैतस्य व्याप्तिग्रहविरोधितावच्छेदकरूपत्वं सपक्षमात्रस्य वैयर्थ्यादित्यत आह स
पक्षौ नीति फलान्तरमव्याहतमेवेतीति विशेषणमिति स्वरूपासिद्ध्यादेरप्यसाधकतान्याप्यत्वेन न च व्यभिचारावारकतयाप्य
र्थत्वादिति। ननु यथाश्रुतलक्षणं व्याप्यविरुद्धासाधारणोऽव्याप्तिः स्फोव्याप्यत्वेहेत्वाभासत्वमित्यादि ननु ऽवृत्तित्वरूपोपा
धिमत्तोऽपि हेतुवदाभासत्वमस्त्येवेत्यत आह व्यर्थं चेति ननु ऽवृत्तौ निश्चितसाध्यतदभाववद्वृत्तित्वोपाधिमादायातिलक्ष
रा॰ गमनमित्यत आह एवं चेति व्याप्ति हृदये इति साध्यतदभावनिरूपितव्याप्तीत्यर्थः। हृदयमिति निश्चितसाध्येत्यादिरूपा
धेर्ग्राह्याभावानात्मकत्वेऽपि तत्तल्लक्षणाक्रान्ततया हृदयमिति हेत्वाभासपदस्य फलमाह असिद्ध इति विशेषः व्याप्यत्वासिद्धिः

आ॰श॰क॰ २४१

स्वरूपासिद्धेर्वोद्धीत्याशंक्य कृत्रिमत्वग्रह इति विरोधिनवेदीति कृत्रिमत्वस्य ग्राह्याभावानवगाहित्वादित्यर्थः इदमिति साध्यतदभाव
वद्धावृत्तित्वमित्यर्थः एवकारेणानिष्ठित्तसाध्यतदभाववद्धावृत्तित्वव्यवच्छेदः तस्य ग्राह्याभावानात्मकत्वात् अस्य च सा
मानाधिकरण्यभागं प्रतिग्राह्याभावात्मकत्वादिति विशिष्टेति साध्यतावच्छेदकादिविशिष्टेत्यर्थः लक्षणयोर्भेदायाह व्या
पकेति वीतिरिति हेत्वाभासपदादिष्वित्यर्थः व्याप्यविरुद्धासाधारणयोः प्रकारांतरेणाव्याप्तिं परिहरतांमतमाह केचित्वि
ति तङ्गिन्यमिति वैत्रीयनिष्ठित्तसाध्यतदभाववद्धावृत्तित्वज्ञानमादाय मैत्रस्य व्याप्तिज्ञानकाले प्रतिव्याप्तिः स्यादित्यतः तत्पु
रुषीयतत्कालीनत्वघटितं तत्र वाच्यं तथा च सव्यभिचारित्वस्यापि पुरुषविशेषनियंत्रितत्वे यत्र साधारणो तथाप्रसिद्धा
भावस्तदपि सव्यभिचारित्वं न स्यादित्यर्थः तस्य विरुद्धत्वस्य तदपि सव्यभिचारित्वेन व्यवच्छिद्यते इति भावः अन्येतु स्व राम २४१
रूपसाधकतानुमानपरतया योजयंतीति ननु लक्षणस्योक्तव्याख्यानेक प्रथमिदं दूषणद्वयं इत्यत आह प्रथममित्यादी

तिनन्वेकसपक्षस्थलेसर्वत्वमप्रसिद्धमित्यतआहसपक्षेति अनुपयोगादिति प्रस्तुतानुकूलत्वमवीक्षिनुसिषाधयिषाविर
हविशिष्टसिद्ध्यभावस्यपक्षत्वेशब्दोनित्यःशब्दत्वादित्यादौयदाव्याप्तिग्रहस्तदापिलक्षणेनसंग्रहइत्यतआह सपक्षत्वमि
तियथाश्रुतइतिपक्षातिरिक्तसाध्यवतोःपदयोःकर्मधारयइत्यर्थः।नन्विति भूमध्येस्कन्धपक्षातिरिक्तवृत्तित्वंसाध्यवन्मात्र
वृत्तित्वंचेत्तेननतदतिप्रसंगःशब्दत्वादेरपक्षातिरिक्तवृत्तित्वाभावादेवनतत्संग्रहःयथाश्रुतेनलक्षणेनास्वरूपासिद्धसंकी
र्णासाधारणादावव्याप्तमतःपक्षवृत्तीत्यादीति।ननुसपक्षसत्त्वादेरनुमित्यौपयिकत्वमित्यतआहजनकेतिसपक्षस
त्वादेर्वादिपदेनविपक्षावृत्तित्वादिपरिग्रहात्साधारणासंग्रहः ननुसाध्यवद्व्यावृत्तत्वमसाधारणत्वंनसामानाधिक
रण्यग्रहाविरोधीतितदव्याप्तिरित्यतआहसपक्षेतितथाचैतत्वेनागृहीतमनेद्दमेवासाधारणत्वमितिपक्षेपक्षेव
च्छेदेनसंदेहादित्यनेनसामानाधिकरण्यज्ञानमात्रंप्रत्यविरोधित्वंसूचितं अत्रव्याप्यसत्त्वनिपक्षमोविरोधित्वापद

अ॰ शा॰ क॰
२४२

वृत्तित्वमित्यनेनैव न हेत्वरांपक्षपदस्य संदिग्धसाध्यकत्वादित्यिथ्येयं पक्षवृत्ताविति स्वरूपासिद्धत्वेन पक्षवृत्तेर्विवर्जनेन एवं विरुद्धत्व
न विपक्षविरुद्धमिश्ववृत्तितयोर्व्युदासः साधारणत्वमसाधारणत्वं च तयोरपि वर्जनं इति तत्संग्रहः । कश्चिदित्यनेन सर्वसाधारणप
क्षवृत्तित्वविरुद्धत्वादीनामैक्याभावाद्दूष्यस्य रसस्सूचितः । पूर्वपक्षोक्तदूषणानिरासेनैव मूलेसमाधानमित्यसंगतिं परिहरं
नाशयं दर्शयति पूर्वोक्तेत्यादिना यथामतमिति कस्य विपक्षवृत्तिकत्वेर्मतेसाध्यवद्भावत्वेमेवासाधारणत्वं कस्य चित्तु निश्चि
तसाध्यवद्भावृत्तित्वमिति न घटकमिति प्रतिबंधकतावच्छेदकस्यैव विभागो । बाधितत्वमिति नियमाभावादिति भावः । न तु सा
धारणधर्मवद्धर्मिज्ञानस्य कोट्युपस्थापकत्वेन प्रकृतेन लक्षणे पक्षधर्मताज्ञानाभावात्पूर्वोक्तदर्शितधर्मिरायतिव्याप्ति
रित्यतः साधारणज्ञानमात्रस्यैव कोट्युपस्थापकत्वमिति निवर्तयितुमभिप्रायं दर्शयति संदेहमित्यादिना न च तथात्वेन राम
कोट्युपस्थापकत्वे संदेहं प्रतितथात्वेन कत्वं किमन्यामिति वाच्यं तादृशकोट्युपस्थितौ सत्यामपि कस्मिंश्चिद्धर्मिणिसं २४२

देहोनान्यत्रेति नियमाय तथाजनकत्वात् ननु कोट्युपस्थापकत्वं अनुवृत्तत्वव्यावृत्तत्वविशिष्टधूमादिज्ञानस्यापीति तत्रातिव्या
प्तिरित्यत आह अक्लृप्तमिति अक्लृप्तं अर्थवशात्प्राप्तमित्यर्थः। इत्थं च साधारणधर्मादिज्ञानजन्यकोट्युपस्थितित्वेन संशयं प्र
ति जनकता संदेहस्य धर्मिविशेषनियमार्थं साधारणत्वज्ञानाज्ञानं जनकमिति मतानुसारेणेदं साधारणधर्मवत्ताज्ञानस्य
संशयजनकत्वेऽपि कोट्युपस्थितेस्तथाजनकत्वे मानाभावः विशेषणाज्ञानत्वेनैव कोट्युपस्थितेर्जनकत्वादिति मतान्तरमा
ह यथाकथंचिदिति साधारणज्ञानजन्यकोट्युपस्थितेरेवाजनकत्वेनानुभवसाधारण्यमिति भावः नियामकं संदेहस्य ध
र्मिविशेषनिष्ठत्वनियमकं अन्तरवैनियत्येव कोट्युपस्थितेरनुभवसाधारण्ये न जनकतेत्यर्थः इतरथानुक्रंतरोलेस्फु
र्तिस्वीकारे धारावाहिकत्वानिर्वाहात् इत्थं च संदेहस्यैव तथात्वादिति धर्मितावच्छेदकेति धर्मितीयद्रूपेत्यादिमात्रो
क्तौ यत्र घटकत्वविशिष्टघटादेर्धर्मितावच्छेदकत्वं तत्र घटादावतिव्याप्तिरित्यत आह धर्मितावच्छेदकेति तत्र घटविशि

अधि.क्रि. ष्टे धर्मितावघटत्ववज्ज्ञानं तु न तथेति भावः एवकारेणाकोट्युपकत्वादिव्यवच्छेदः मतान्तरमाह कोटिद्वयेति एतन्मते तु केवल
२४३ मूर्द्धत्वत्वेनोर्द्धत्वज्ञाने साहचर्यगोचरसंस्कारलोपे तु द्बोधकासमवधाने वा संदेहजननप्रसंगश्च साहचर्यगोचरोद्बुद्धसं
स्कारसहकारित्वेनैव निरसनीय इति द्रष्टव्यं न सम्यक् तथापि मतान्तरमिति दीधितिकारेणोक्तेरिति तत्र दूषणमिति न तु वृत्तिरेव न तथा सु
लभ इत्यत आह एकेति तथा च साध्यवद्व्यावृत्तत्वस्य साध्याभाववद्व्यावृत्तत्वस्य धर्मस्य वा ज्ञानं संशयविरोधिनस्येकतरकोटि
मात्रव्यावृत्तत्वज्ञानमेव संदेहप्रतिबंधकमिति गौरवात् तत एव व्याप्यत्वज्ञानप्रतिबंधकत्वे विनमात्रपदप्रक्षेपः न
नु व्याप्यज्ञानप्रतिबंधकत्वे यदि मात्रार्थो न प्रक्षिप्यते तदा सत्प्रतिपक्षिते कथं संशय इत्यत आह सत्प्रतिपक्षितेति तथा
च यावत्परामर्शयोर्न प्रामाण्यसंशयस्तावत्संशयो न भवत्येवेति भावः। व्यावृत्तत्वमित्यनंतरमसाधारण्ये मित्यनुषज्य राम
ते तद्धीत्यादि यावत्साध्यवत्ताविशिष्टयविषयव्यावृत्तत्वमाद्यविकल्पार्थः द्वितीयस्य तु येन येन स्वरूपेणेत्यादि विशेषः २४३

...त्यादि अत्र सर्वाग्निसाध्यकत्वं तु प्रमेयाग्नीत्याद्येव युक्तः पाठः कृत्स्नत्वेन तस्य पूर्वं सर्वाग्निसाध्यकत्वंनीति प्रतिहत्यं वोद्देश्यविध
नभावव्यत्यासप्रवर्तयोर्भेदकरूतिः न्यायानइति तेन तेन रूपेण घटादिव्याप्तत्वग्रहेऽसाधारण्यापात इति न च व्याप्यत्वग्रह
स्यापि सामानाधिकरण्य... ग्रहरूपतया व्यापकेऽपि साध्यवत्त्वग्रहः तस्य सामान्यतो न ग्रहरूपत्वात् अत एवाग्रेनैव दोष इति
शंकितेनेयइति याहृशइति तथाचेत्थमपि व्याप्तिग्रहेनासाधारण्यमिति न्युदासः विशेषलक्षणास्य असाधारण्यलक्षणस्य ननु
शङ्कितेन धा व्याप्तिग्रहदशायां असाधारण्यलक्षणेऽसाकं तत्कमेणाव्यभिचारसामान्यलक्षणां नुस्यादेवेत्यत आह साधा
रण्येति सामान्यलक्षणस्य साधारण्याभावेत्यादि विशेषणफलमाह विशिष्टेति धूमवान् वह्निरित्यादौ व्याप्तिभ्रमेऽपि साधारण्यं स
र्वजनसिद्धं तस्य निश्चयदोषत्वात् विशेषणादानेवतत्राव्याप्तिः स्यादिति एकेनैत्यादि एकस्य व्याप्तिनिश्चयेऽन्यस्य तद्विरहेऽपि
...णोऽसत्त्वाभिप्रायात्वग्रहः सर्ववादिसिद्धः न चात्वन्मतेन स्यादित्यर्थः न च एवं सव्यभिचारित्वमपि न तु ऽसाधारणत्वं स

अ॰शि॰कृ
२४४

अभिचारित्वमपि पुरुषविशेषनियंत्रितमस्त्यकालेऽप्यतिरित्यत आह साध्यादीति शब्दोऽनित्यः शावृत्वादित्यादावनित्यत्वव्यापकत्वं
सर्वमनित्यमिति निश्चयदशायामव्याप्तिप्रसंग इत्यर्थः तदेवोपपादयति नहीति अभिहितेनेति निश्चित अगम्यसंशयेऽनुपयुक्त
त्वादिति ननु निश्चितत्वघटितमनुपयुक्तमेवास्तु शुद्धसाध्यतदभाववद्व्यावृत्तत्वं तु संशयविरोधीति प्रागुक्तं किं तत्तथा च सं
शयः किं न स्यादेवेत्यत आह किंत्विति तत्सहचरितेनैवेति तद्व्यावृत्तत्वरूपसामान्याभावज्ञानमेव संशयविरोधीति भावः
ननु व्याप्यस्य निरुक्तस्य ज्ञातत्वेन ज्ञानकालेऽपि तत्सहचरिताभावप्रतियोगित्वज्ञानात् संशयः स्यादित्यत आह व्याप्य
विरुद्धयोस्त्विति न खलु [illegible] ज्ञानमेव कारणं किंतु प्रतिबंधकाभावोऽपि अपेक्ष्यत इति तदभावादेव न संशयापत्तिरिति म राम
नेतत्सहचरिताभावप्र[illegible]तियोगित्वमेव हेत्वाभासोपाधिः स्यात् व्याप्यत्वज्ञानकालेऽपि तस्य सत्त्वेनाहेत्वाभासो २४४
पाधिरूपत्वादिति भा[illegible]वः विरुद्धान्येति यथोक्तस्य विरुद्धासाधारणोऽव्याप्तिरित्यतोऽव्याप्ते विशिष्टेति।

विरुद्धान्यतरस्य समस्तप्रविष्टत्वाद्विरोधिनासमं नान्वय इत्यत आह यथेतद् इति तेनेत्यादि साध्ये साध्यतावच्छेदकाभावग्रहे साध्य
तावच्छेदकविशिष्टसाध्यसमानाधिकरणपग्रहोन नवत्वन्तस्यास्य न द्विरोधिता एवं साधनाभावाद्यादावपि वृत्तित्वस्येतिसा
ध्यस्य साधनस्य वाऽवृत्तित्वग्रहेन साध्यस्य समानाधिकरणपग्रहः वक्तव्य विवक्षार्थमाह एतत्पदं चेति तथा चेति दृष्टं समा
नविषयत्वेन प्रतिबन्धकत्वमनुपेत्य तेनैतत्रैव धर्मिणि प्रकारान्तरस्य व्यभिचारादि हेतुग्रहेऽपि प्रकारान्तरेणानुमितेर्न काचि
त्क्षतिः सद्धेतुसंयोजयति साध्ये त्वित्यादिवेदमेवास्मिन्नलक्ष्ये ऽसाधारणत्वमित्यर्थः तद्येति यद्धर्मवृत्तित्वं साध्यव्यापकी
भूताभावप्रतियोगिनोग्रहस्य तेन तत्रैवानुमितिविरोधित्वमिति पक्षतावच्छेदकविशिष्टपक्षीय साध्याभावस्यैव बाधत्वादि
ति तादृशोऽरूविवक्षाशालिनो ननु सर्वं साध्याभाववद्वृत्तित्वादि संवलितहेतुमत्ताज्ञानस्योक्तविवक्षाशालित्वा
द्बाधविशेषेऽतिव्याप्तिमाशंक्य निषेधति साध्याभावेति नन्वधिकरणतावच्छेदकानियंत्रितं साध्यवत्त्वज्ञानं कस्यापि न

प्रतिबध्यं तथा च तादृशबाधेऽतिव्याप्तिरित्यत आह साध्येति अनुमितिश्च धर्मितावच्छेदकनियंत्रितैव स्वं च समानविषयत्वादेदिसर्वं घ
टाभाववदिति ज्ञानकाले घटवद्भूमितलं प्रमेयमित्यादिज्ञानात् समानप्रकारकत्वादिमत्त्वेऽपि धर्मितावच्छेदकनियंत्रितमेव ज्ञानं बो
ध्यं अन्यथा फलवैषम्यादिति सूचितं अनुगमकधर्मपरामर्शनिवारयन्नितनेनेति लक्षणानुरोधेनेति मूलं हेत्वाभासस्येति पूरतो
न व्याचष्टे एवकारेणेति अयमाशयः हेत्वाभासलक्षणे हि यस्यानुमितिप्रतिबंधकतावच्छेदकत्वं तस्यैव हेत्वाभासो बाधित्व
मिति प्रतिपादितं अनुगमकरूपस्य तु तथा प्रतिबंधकतावच्छेदकत्वाभावादेव न हेत्वाभासोपाधित्वमिति विकल्पद्वान्येति द्वि
तीयलक्षणाभिप्रायेण तेनासाधारणस्येति मूलं संगमयन्नाह नेनेति अन्यथेति संशयोत्थापकताघटितलक्षणे पुनरव्याप्ति राम
रेवेत्यर्थः क्वचित्तु मूले यद्वेत्यस्य पूर्वं तेनासाधनस्येति फक्किकान्तरमभिप्रायेणैवेदं यत्र तु यद्वेत्यनंतरमेवैतत्फक्किका २४५
तत्र यद्वेति तृतीयलक्षणाभिप्रायेणापि प्रयोजनस्यकरमिति बाधस्यैव साध्याभावज्ञानात्मकत्वेन साध्याभावज्ञापकत्वेन

ति मूलं दुष्टमित्यत आह साध्याभावेति संप्रदायेति न त्वनेकेवलान्वयिधर्मपदकाद्यन्यस्यैव साधारणत्वमिति अत एवेति गाह्या
भावमुद्रयाऽव्यभिचारग्रहस्य प्रतिबंधकत्वेन तदन्यत्वस्य गौरवेणाप्रवेशादिति मोऽनुपसंहार्यसाधारणो निश्चितत्वस्पस
स्य वह्निशरणात्वानिश्चितसाध्यवद्भिन्नत्वं चरमदलात्वन्यनेन चतत्वं संभवति वह्निमान् धूमादित्यत्र धूमेऽनित्यत्वेऽस्तस्य नि
श्चितसाध्यवदन्यपदकृतिमादित्यतोऽव्यवच्छेदे निश्चितइत्यादिनानुसपदात्वं निश्चितसाध्यवत्त्वं तथा च पूर्वोक्तेद इत्यतो
व्याचष्टे इहेति ननु घटाकाशोभयवृत्तिद्वित्वाश्रयत्वं नानुपसंहारिकेवलान्वयिधर्मावच्छिन्नपदकस्यैवानुपसंहारि
त्वादिति निर्मूलमसंलग्नं योजयति इत्यस्येवेति तथा च मूले इति व्यर्थं तः एतस्य च प्रायां मते विरुद्धत्वाद्विरुद्धस्येत्यस्ये
त्युक्तं यत्तु मूलस्य विरुद्धस्येत्यस्यार्थमाह प्रसिद्धस्येवेति यत्तु मूलं विरुद्धस्येति पदार्थेन समभमेदान्वय इति न उव
हितत्वात् प्रसिद्धस्येवेत्याद्यभ्याहारापत्तेरोनुपेद्दितं अन्वय इति माद्भिग्रहानुकूलाप्रतीतेत्यादिना तत्ताभिप्रायेतोह

आशिकु २४६ शब्दत्वमनुपसंहारीति अत एव कश्चिदित्यनेनास्वरसः सूचितः विपक्षाद्यस्य निश्चितसाध्याभाववत्तिप्रसिद्धत्वान्निश्चितपदं व्यर्थमित्यत
आह तत्रेति अत्रार्थं ग्रंथस्वरसमुद्भावयति अनुपदमिति तत्र ज्ञानस्य निश्चितसाध्याभाववद्वृत्तित्वज्ञानस्य वस्तुत इति निश्चितसाध्याभाव
वद्वृत्तित्वमित्यर्थः रूपांतरेणेति अयोगोलकं धूमाभाववद्वृत्तिवह्निर्न वह्निरित्यादिज्ञाने प्रतिबंधादित्यर्थः तत्र व्यभिचारज्ञानं तथा
प्रतिबंधकं साध्याभाववत्त्वप्रकारप्रकारकहेतुवृत्तित्वज्ञानं प्रतिबंधकमित्यर्थः गोत्वादिति साध्याभाववद्वृत्ति हेतुरित्यपेक्ष
गोत्वादित्यर्थः ननु तस्य प्रतिबंधकत्वे निरूढे गौरवमानायत्येवास्थीयत इत्यत आह साध्येति ननु दीर्घो घटो रूपवानित्य
त्र दीर्घत्वरूपयोः सामानाधिकरण्यवत् साध्याभावहेत्वोः सामानाधिकरण्यं भासत एव साध्याभाववदयोगोलकं हेतुम राम
दित्यादिज्ञाने इत्यत आह साध्याभाववद्वृत्तिरिति तत्र साध्याभाववत्त्वांशे प्रकाराभावात् साध्याभाववत्त्वांशप्रकारप्रकारक २४६
हेतुज्ञानस्य संभवादिति। यत्किंचित्यादि साध्याभावांशसंशयान्यसाध्याभाववद्वृत्तित्वज्ञानत्वेनेव प्रतिबंधकत्वमित्यर्थः सा

ध्याभावांशसंशयान्येत्यस्योपष्टंभकमाहान्यथेति न हीति संदिग्धसाध्यकत्वेनोभयोस्तुल्यत्वेपि प्रतिज्ञाद्यविषयत्वेनैव पक्षसमत्व
मित्ति व्याप्तीत्यादिहेतोर्व्याप्तिनिश्चये व्यभिचारनिश्चयाद्व्यभिचारसंशयोनुपपन्न इत्यर्थः। तदनिश्चयदशायां व्याप्त्यनिश्चयदशायां
अनुकूलेति अनुकूलतर्ककालीनव्यभिचारसंशयस्याप्रतिबंधकत्वात्। ननु तदानीं कथं संदिग्धानैकान्तिकत्वमित्यत आह हेतु
साध्येति तथा च तत्र प्रतिबंधकतावच्छेदकसत्त्वात्तत्वमुचितमिति समुदायार्थः। स्वयं यदि व्याप्यो धूम इति ज्ञानकाले पक्षे साध्यसं
देहस्तदा तज्ज्ञानं हेतुमत्त्वं न स्पृशति विरोधिज्ञानस्य ज्ञानाजनकत्वात्। अन्यदा तु व्यभिचारज्ञानस्येष्टत्वादित्याह तत एवेति यत
एवानुकूलतर्काभावकाले पक्षीयव्यभिचारसंशयः प्रतिबंधक इत्यर्थः। साध्येति साध्यस्य विशिष्टाभानरूपतया पर्वतधर्मि
निरिक्तधर्ममादायैव पर्यवसानात् इदं च व्याप्तिरिक्त पर्वतधर्मानिरिक्तधर्मवद्वित्यादिमहाविद्यानुमानहेतत्व इत्यर्थः। बाधे
ति तदव्यवहारे तु तत्र प्रयोजकत्वाभाव इति हृदयं एवमिति वह्निर्दहानुकूलातिरिक्तातीन्द्रियधर्मसमवायीत्यादय इत्यर्थः।

प्राशिक पक्षातिरिक्तवृत्तिपक्षातिरिक्तहेतुमति सर्वत्र साध्यवत्तानिश्चयात्तन्न तत्र व्याप्तिग्रहः कालातिरिक्तपक्षोऽपि पर्वतो व
२४७ ह्निमानित्यादिप्रसिद्धानुमाने पर्वतो वह्न्यभाववान् पर्वतत्वादन्यतरत्वादित्यादिनेत्यर्थः तथा च तस्य पक्षसंदेहस्थाने कालिक
व्यभिचारेणाविस्वीकरणीयमिति। विपक्षपदेन साध्याभाववत्त्वं साध्यवदन्यत्वं वा विवक्षितमित्याशयेन शंकते ज्ञयेति
भावद्वयं साध्यात्यन्ताभावसाध्यवदन्योन्याभावरूपं भवति हि जलह्रदपर्वतान्यतरत्वादित्यादौ सर्वत्रजलह्रदे वह्न्यभावस्य व्य
भिचाराधिकरणस्य पक्षमात्रस्य संदिग्धत्वात् तथा च पक्षीयव्यभिचारसंशयस्य प्रतिबंधकत्वमनायत्येव व्यक्तमिति भा
वः। अव्याप्तिरिति तथा च तस्याभासाधिक्यमिति भावः। इदं च यदि घटवत्ताग्रहं प्रति घटात्यन्ताभावघटवदन्योन्याभावयो
रन्यतरत्वेन प्रतिबंधकत्वं तदा बोध्यं वस्तुतस्तु समानप्रकारतया प्रतिबंधकत्ववादिनां घटवत्तादात्म्यग्रहं प्रति घटवद गम
न्योन्याभावग्रहः प्रतिबंधकः तत्संसर्गविधया तु घटवत्ताग्रहं प्रति तत्तद्घटाभावग्रहः प्रतिबंधक इति पुनरुक्तिरिति तं प्र २४७

निमाप्ति अपि पूर्वोक्तास्वरसस्सूचनाय हेतुमतीत्यादि पूर्ववत्त्वस्य तोहेतोसाध्याभाववदवृत्तित्वेन ग्रहमाणो हेतौसाध्यवदवृत्तित्वग्रहप्र
वप्रतिबंधकः तत्त्वानुमितिं प्रतिहेतुमदवृत्तिः साध्याभाववृत्तिज्ञानं कारणं पक्षे धर्मतांशेनस्य प्रकारकत्वाभावात् न च नाहृशसा
ध्याभावकत्वमेव हेतुनिष्ठं तथेतिवाच्यं गौरवमिति प्रकृतेति साध्यतावच्छेदकावच्छिन्नेत्यर्थः एवमग्रेपि त्रयमर्थः साध्यप्रसिद्धि
परंपरासामानाधिकरण्यानां ग्रसाध्यसाधनकत्वग्रहविरोधित्वाद्युदासः अत एव व्यतिसाध्याप्रसिद्ध्यादीनामिति अत्र विरोधि
तावच्छेदकत्वं विरोधितापटकत्वं तेन व्यभिचारज्ञानत्वस्य विशिष्टस्यावच्छेदकत्वेपि न क्षतिः इत्यन्यज्ञानत्वव्युदासाय वि
षयतयेति अन्वयेति अत्यंताभावाप्रतियोगित्वसाध्यकस्य व्यतिरेकव्याप्तिविरोधिनोऽनुपसंहारित्वस्य व्युदासः असंग्रह इ
ति पूर्वपक्षोक्तानामितिशेषः यदि पुनरिति प्राचांमतेऽत्यंताभावादिगर्भव्याप्तिज्ञानस्यान्योन्याभावादिगर्भव्यभिचारज्ञानं प्र
तिमंत्रादित्याशये नैव प्रतिबंधकतेत्यस्वरसः सूचितः साध्यसामानाधिकरण्येति व्यतिरेकव्याप्तिस्फुरणसाध्यसामानाधिकरण्य

अशिक घटितात्वप्रसिद्धसाध्यसाधारणत्वादिनिरुक्तरूपं ननु सामानाधिकरण्यघटितत्वमात्रं गमकं सामानाधिकरण्यघटितव्याप्तित्वं वा आद्ये
२४८ किंचित्पदार्थघटितसामानाधिकरण्यस्यापि सामानाधिकरण्यघटितत्वेन तद्विरोधित्वापत्तिर्व्याप्तिः। द्वितीये व्याप्तित्वस्यैकस्याभा
वात् कथमनुगम इत्यत आह प्रतिकेति अत्यन्ताभावादिगर्भव्याप्तित्वेनेत्यर्थः। ननु साध्याव्यभिचरितसामानाधिकरण्याभावेऽ
सिद्धिविशेषणस्य तल्लक्षणगतत्वेन व्याप्तत्वमत आह साध्याव्यभिचरितेति साध्याव्यभिचरितसामानाधिकरण्याभावस्यासिद्धित्व
मस्त्वेव निविशिष्ट साध्येति साध्यतावच्छेदकावच्छिन्नेत्यर्थः। एवं साध्यवन्निष्ठसाध्यासिद्ध्यादीनां साधनाघटितव्यापकत्वग्र
हविरोधित्वेन तदुदासः। विरुद्धत्वस्य साध्यासामानाधिकरण्यरूपस्य व्याप्तिज्ञानविरोधित्वेऽपि व्यापकत्वग्रहाविरो
धित्वात् इदमिति हृदयं। पक्षमिति व्यापकत्वान्तर्गतअत्यन्ताभावादिघटितत्वात् तथैवानुगम इत्यर्थः। साध्यतद्व्याप्तिपक्षधर्मत्वा गम
न्वयः व्याप्त्यादीत्यादिपदेन व्याप्त्यन्यकधर्मसंग्रहः। अत्र विरोधित्वस्य व्याप्त्यादिव्यापृतत्वं विरोधित्वेन किं सिद्धेलिङ्गे २४८

नियतंच छपि तथापि तद्रूपत्वमेव तत्र आवर्त्तकमित्येके परे तु ग्राह्यसंशयस्य प्रतिबंधकत्वं स्वीकुर्वंतः संशयसाधारणं यज्ज्ञानं
प्रतिबंधकमिति निवर्णयंतो व्याप्यादिव्यावृत्तं साध्याभावस्य विरोधित्वं वदंतीति तत्र साध्याभावव्याप्यादिव्यावृत्तं साध्यव
त्ताज्ञानविरोधि निरूढं च विरोधितावच्छेदकं साध्याभावत्वरूपेणावोध्यं तेन प्रकारांतरेण हेतुसमानाधिकरण्याभावग्रह
विरोधिनि नातिव्याप्तिः व्याप्यादिव्यावृत्तत्वस्य दुर्वचनतया प्रकारांतरेण साध्यवत्ताग्रहविरोधिनीति तादृशाभावो हेतुस
मानाधिकरण्याभावः नाभासइति तथा सहेत्वाभासतावच्छेदकपदेनैव व्यावृत्तिरिति नतु घटवत्त्वं दूटरूपान्यतरत्वे सा
मानाधिकरण्यविरोधिनि अतिव्याप्तिरिति चेन्न अत्र केचित् यादृशहेत्वाभासतावच्छेदकोपाध्यवच्छेदेन हेतुसाध्या
भावव्याप्यहेतुसमानाधिकरण्याभावग्रहविरोधित्वं तत्त्वं न चेह बाधकत्वावच्छेदेन तथा अन्यपदार्थबाधे तदभावा
दिति तच्चिंत्यं तेन साध्यकत्वहेतुकबाधत्वस्यैकस्याभावात् पदार्थभेदेन भिन्नत्वात् साध्याभावव्याप्यवत्त्वकबाधकत्वाव

आशि.क हेतुत्वेनव्यक्तेर्विसंभवात् तस्मादेवं व्यर्थं तद्धेतुकत्वं न साध्यकत्वं ज्ञानीयहेत्वाभासानां सर्वेषामेवोद्बोधकत्वं न त्वविशिष्टं स्वरूपं यत्र
२४९ वी केति यत्र साध्याभावव्याप्यहेतुसामानाधिकरण्याभावग्रहोऽप्रसिद्धः तदंशे मेवं तत्र व्याहार्यज्ञानं प्रसिद्धं तत्र हेत्वाभासत्वं तो
करीत्या समाधेयमिति त्रुपदर्शितेति साध्याव्यभिचरितसामानाधि[illegible]भावद्वयमर्थः तथा च पूर्वं तस्यानैकान्तिकत्वमनुपगमवा
देनोक्तमिति भावः क्वचिदिति व्यभिचारज्ञानाभावसहकृतं सहचारज्ञानं कारणमिति ग्रंथानुरोधेनोक्तं न च सहचारज्ञानस्य सहचारी
व्यभिचारज्ञानाभावः तत्र नियोगिव्यभिचारज्ञानं तद्विषयाव्यभिचार इति तदभावकूटस्य सहकारित्वादिति नन्वप्यनुभावनिश्चयस्या
पि सहकारित्वाव्याप्तेर्ग्राहकत्वात् व्याप्यभावरूपा या मसिद्धौ अनिव्याप्तिः यत्र ज्ञानत्वावच्छिन्नाभावत्वेन सहकारित्वस्य विवक्षणान्न भ राम
वतीति व्यभिचारज्ञानस्य ज्ञानत्वेनैव प्रतिबंधकत्वमिति असिद्धिज्ञानस्य निश्चयत्वेनैव प्रतिबंधकत्वमिति एतन्मतास्वरसत्वक व्याप्ति २४९
ग्राहकसहचारज्ञानसहकारित्वापेक्षयानथाविधव्याप्तिग्राहक[illegible]कमिति ज्ञानादितिमतोक्तमतेपुसर्वसाधव व्याहन

मेव तत्र ज्ञातस्यैव साध्याभावव्यतिरेकव्याप्तिरूपत्वात्तस्यैव विपक्षबाधकत्वमिति तेनेति पर्वतो धूमवान् वह्नेरयोगोलकत्वादित्यत्र अयो
गोलकत्वे यावद्विशिष्टधूमव्याप्तत्वस्य सत्वादिति ननु भूरनित्या गंधवत्वादित्यादौ अनित्यत्वे विपक्षतापि विपरमाणुवृत्तित्वस्य
गंधे सत्वादव्याप्तिरत आह विपक्षत्वस्येति तथा च तद्दशायां परमाणावपि संदेहात्तन्न विपक्षत्वमिति निश्चयवृत्तिपूर्वं साधारण
सांकर्यं अत्र तु विरोधसांकर्यमिति प्राचामनित्यदोषस्य प्रमाणमुपगमेन तत्त्वतं कटाक्षयति इत्यपीति रत्नस्य निश्चितरूपसाध्यकत
त्वादिवृत्तित्व सत्वेपि जलस्य नीरसत्वभ्रमेण द्रुम सांकर्यमिति साध्यनिश्चयकालेपि पक्षधर्मिविषयावच्छिन्नात्सत्वेपि नासाधारणपमि
त्यतो व्याप्तेः पक्षत्वमिति मतं प्राचां मतं अन्यमतेनेति तत्र विपक्षत्वं तथा व्याप्तिप्रविष्टसामानाधिकरण्यविघटकतया वा दोषत्वे व्या
प्तीत्यादिग्रंथासंगतिः स्यादिति अत एव प्रागप्युक्तं प्राचां मतेनेति नाभावत्वमिति कारणीभूतसहचारज्ञानविघटकत्वेऽनुमि[illegible]का
रणप्रतिबंधकतयाहेत्वाभासत्वानुपपत्तिरिति ननु सहचारज्ञानविघटकत्वेपि व्याप्तिप्रविष्टसामानाधिकरण्यग्रहप्रतिबंधक

त्वे न हेत्वाभासत्वं स्यादत आह एकधर्मीति अयमभिप्रायः एतन्मते निरुक्तपदव्यालोचनया तत्तद्धर्मिव्यावृत्तत्वमेव आधारत्वं तच्च न व्या
प्तिप्रविष्टसामानाधिकरण्यघटकाभावतया विरोधिसामानाधिकरण्याभावानात्मकत्वात् इदमेव विशदयति धर्म्यन्तरवृत्ति धर्म्यन्तरेऽधि
करणान्तरे हेतोः साध्यसामानाधिकरण्यसंभवादित्यर्थः अन्यथा तत्तद्धर्मिव्यावृत्तत्वस्य प्राचीनमतसिद्धस्य सामानाधिकरण्यसामान्यविरो
धित्वे सत्तोरिति समीचीनयोर्हेतुसाध्ययोरित्यर्थः भवति हि वह्निधूमयोर्व्याप्तौ धूमस्य वह्निमदयोगोलकव्यावृत्तत्वेऽपि धूमे वह्निसा
मानाधिकरण्यं तत्र यदि यत्किंचिद्वह्निमद्व्यावृत्तत्वं सामानाधिकरण्यसामान्यविरोधि स्याद्धूमो वह्न्यसमानाधिकरणः स्यादिति व्य
तिरेकित्वं न च यत्किंचित्साध्यवद्व्यावृत्तत्वं हेतोः यत्किंचिद्धेतुमद्व्यावृत्तत्वं वा साध्यस्य ननु चात्र साध्यस्य यत्किंचिद्व्यावृत्तत्वस्य
व्यभिचारित्वेनासमीचीनत्वादिति चेन्न अत्र समीचीनत्वेन समानाधिकरणत्वस्योक्तत्वात् न च व्यभिचारिणोऽपि सामानाधिकर
ण्यसत्त्वेन तन्मते तदपि न स्यादिति। संप्रदायः वस्तुतस्तु सत्त्ववृत्तिमत्त्वं व्यतिरेकित्वं यत्किंचिदधिकरणावृत्त्यभावप्रतियोगि

वेन यत्र वह्निमान् धूमादित्यत्र वह्निधूमयोर्व्यतिरेकव्याप्यभावप्रतिरोधित्वेन कृत्रिमत्वज्ञानविरोधितया धूमवद्वह्निवदकृत्रिमत्वं वह्नौ वा धूम
त्वाद्युपाधिरेकिमिति न स्यात् केवलान्वयित्वेन कृत्रिमत्वं स्यादिति फलितार्थः तथा च यत्राधिकरणे कृत्रिमत्वविरोधीनान्यस्यत्रेति भावः शं
कितुमूलस्य — नन्वित्यादिना शंकितुः तदुक्तानिरासस्य मूले व्याप्तीत्यादिना कारणविघटनमुद्भयेव दोषत्वे संभवति संशायकत्वे
न दोषतायाः कल्पनीयत्वेन गुरुतयोपव्यादितः संशयितुराशंकितिकृत्ता संशायकत्वमपि स्फुटमिति मात्रं परिष्कृतं स्फुटत्व
मेव विवेचयति चतुर्थ्यादिना संशयद्वारा व्याप्यभावज्ञानत्वेनैव प्रतिबंधकत्वमिति हृदयं आदिमस्य संशयस्य द्वितीयस्य
निश्चयस्य तयोर्व्यभिचारसत्प्रतिपक्षयोः अत एवेति यत एव संशयस्य सामग्रीत्वेन दूषकत्वं संशयेन यत्र धर्मिणि संशयः साधा
रणादीनां तत्कृत्रिमत्वज्ञानं कारणं अत एवेत्यर्थः ननु साध्याभाववद्वृत्तित्वस्य व्याप्येकदेशाव्यभिचारसाधारण्याद्विरोधित्वेन हेत्वाभा
सांतरत्वं स्यात् नन्वमतेन तस्य सव्यभिचारभिन्नत्वादित्यत आह साध्याभावेतिन थाचतस्यासिद्धिमध्यप्रवेशापत्तेरिति भावः ननु सा

अ.शि.कृ. ध्या सामानाधिकरण्यरूपविरोधस्यापि व्याप्येकदेशसामानाधिकरण्यविरोधित्वेनाक्षिप्तत्वं स्यादित्यत आह विरोधान्येति पूर्वपक्षे आयुक्तं
२५१ रूपत्वमेव कुत्र यत्निमेवमित्यादिना ग्राह्याभावज्ञानत्वेन प्रतिबंधकत्वस्य लघुत्वेपि व्याप्यदर्शनादीनामुत्तेजकतया निश्चयत्वस्य कार्य-
तावच्छेदकतया न तस्य हेयत्वादिति ननु संप्रदायमते निश्चयत्वं संशयत्वं च कार्यतावच्छेदकमेव न च व्याप्यदर्शनादीनामुत्तेजकत्वेनो-
रवं व्याप्यदर्शनस्यापरकोटिप्रतिबंधकत्वेन संशयानंतरं व्याप्यदर्शनकालेन तद्विरोधिज्ञानानुपपत्तिरित्यस्वरसादाह साधारणेति
साधारणादीत्यर्थः साधारणत्वं वा सव्यभिचारपदं प्रथमोपस्थितत्वेन साधारणमेवाभिहितं अन्यद्दुष्टमिति तु तत्त्वं ननु यदे-
वसाधारण्यज्ञानं सामग्र्यात्मकतापरं तदेव दोषः स्यादित्यत आह सामग्रीत्वेनेति हेत्वाभासत्वेति सामग्र्यास्वरूपसत्या एव प्रति-
बंधकत्वं न तु ज्ञायमानत्वेनेति तल्लक्षणायोग इति भावः। अन्यथा साधारणज्ञानमात्रस्य सामग्रीत्वे हेत्वाभासत्वे चेत्यर्थः। व- २५१
ह्निमान् धूमादित्यत्रापि वह्न्यभाववद्वृत्तिमेयत्ववान् पर्वत इति ज्ञानस्य साधारणज्ञानतया संशयसामग्रीत्वात् संशयः स्यात्

नत्वनुमितिविशि— त्वं नत्तेन दूषितेन हेत्वाभासः स्यादिति एवं स्वरूपसत्प्रतिबंधकसामग्र्याः प्रतिबंधकत्वे तत्तज्ज्ञानमात्रस्यैव सामग्री
त्वे दोषांतरमव्याहृएवमिति न तु मूले विपक्षव्यावृत्तत्वसहितसपक्षव्यावृत्तमात्रस्यैव दोषत्वं वादिनमुद्भवेन कालाभावेन प्रत्य
ख्यानवानिति भंग्यंतरेण हएवं विशिष्टेति न तु परार्थस्यजे सपक्षव्यावृत्तत्वं दोषोमास्तु किंतु तदुपदर्शितदृष्टांतस्य साधनवैक
ल्यमेवासाधारणं क्रम इत्यत आह वाद्युपदर्शितेति तत्संभवात्सपक्षदृष्टांतत्वसंभवात् ननु दृष्टांतस्य साधनवैकल्यस्यादोषत्वेक
थं तस्य प्रतिवादिनोद्भावनं क्रियत इत्यत आह उद्भावनं त्विति तद्विभाजकं निग्रहस्थानविभाजकं अयं भावः अनुक्तविग्रहस्थाना
नां समुच्चयो हेत्वाभासाश्च यथोक्ता इति वचनस्य चकारेण क्रियत इति निबंधकारैर्व्याख्यानं तत्र न घटते तत्र स्थितस्य
त्रैयथोक्तानामुद्देश्यत्वात् हेत्वाभासत्वस्य विधेयत्वादिति व्यंजयन्नाह तद्विभाजकेति तथा च निग्रहस्थानविभाजकसूत्रे
द्वाविंशतेः प्रतिज्ञाहान्यादीनां निग्रहस्थानत्वं विधेयं अनुक्तानामपि चकारेण समुच्चितानां निग्रहस्थानत्वं विधीयत इति

का०शि०कृ त्वनुपादेयत्वेन निर्वहति तदा कथं निग्रहस्थानत्वं तत्त्वं कल्प्यमित्यत आह यदाहरणस्येति ननु दृष्टान्तस्यावश्यकत्वात् कथमुदाह
२५१ रणाभासत्वं दृष्टान्तहीनस्य साधनविकलदृष्टान्तस्य वा तुल्यत्वादित्यत आहावश्यकश्चेति मात्रमिति मूले तु द्रावनकालाभावेनेवासा
धारणं निराकृतं तच्च परार्थस्थलपरं न निर्वहतीति भावः । मूले सत्त्वेति पदोन्नायकत्वमनुसृत्या व्यवस्थापनादाहुस्त्वमतद्वृत्तिबाकारशून्यं
मूलं व्याचष्टे अर्थादिनीति व्यतिरेकिलये स्वस्यार्थमाह व्यतिरेकिमुद्रयेति अर्थादित्यस्य व्याख्यानमसर्थवशसंपन्नमिति साध्यदित्ति फ
लं नेसंभवतीति स्वरूपयोग्यत्वगर्भसाधकत्वमुक्तं विकल्पमयसिद्धानुकूलव्याप्यादिमत्त्वमेकस्य न संभवतीति व्याप्यादिग्रहपर्यन्तं
र नवेति विकल्पभयव्यतिरेकव्याप्तिमुद्रया ज्ञानद्रव्यार्थः । ननु ध्वंसेत्यादि अयमर्थः । शब्दत्वाभावस्य नित्यत्वानित्यत्वव्यापकत्वेऽग्राह्ये शब्द राम
त्वाभावरूपव्यापकाभाववति शब्दे नित्यत्वानित्यत्वयोः संदेहाद्धि घटवृत्तित्वसंदेहे कथं व्यापकत्वग्रह इति तथात्वे पीति स्वपिनाश शब्दत्वाभावा २५१
भाववद्वृत्तित्वज्ञानमेव नित्यत्वानित्यत्वयोरनिश्चायकं ज्ञानं ननु शब्दत्ववद्वृत्तित्वज्ञाने निश्चितस्वविषयतादृशेति व्यभिचारज्ञानस्य विशिष्टेविशे

रूपत्वेन सर्वदैव तत्स्यावतारे प्रमाणाभावादिति तथात्वनिश्चये व्यापकनिश्चयेनाश्रयप्रतीतिकाल एव शब्दत्वग्रहध्रौव्यात् नित्यत्वानित्यत्वयोः सं
देहदशायां तथा ज्ञानं भविष्यत्येवेत्यत आह आश्रयमिति यद्यपि शब्दो नित्यो नवेत्यत्र शब्दत्वं स्वरूपेणाभासते तत्र नशब्दत्वाभावव्यापकत्वग्रहे प्र
तिबंधकं प्रतिबंधकं च शब्दत्ववानित्यो नवेति ज्ञानं तत्र तत्सार्वदिकं तथाप्युदाहरणसौकर्यादिदमुक्तं अत एव वक्ष्यति अतिसुलभत्वादि
ति द्रव्यं पृथिवी सुरभिर्वा इत्यादौ पृथिवीत्ववत्वेन निश्चितः पाषाणः सपक्षः तदभाववत्वेन निश्चितं पानीयं विपक्षः तथा च पृथिवीत्वतत्
दभावयोर्व्यापकत्वे सौरभाभावस्य ग्राह्ये सुरभिः पृथिवी न वेति संदेहो व्यभिचारज्ञानत्वेन विरोधीवाच्यः न सत्र संभवति सौरभज्ञाने
सुरभिज्ञानानावश्यकत्वात् शब्दत्वस्य तु जातिरूपतया तदावश्यकत्वमिति त्रयं असाधारणः ननु शब्दत्वे नित्यत्वान्वयव्याप्यभावा
त् कथं सत्प्रतिपक्षत्वमित्यत आह व्याप्तेरिति अव्यापकत्वादिति व्यतिरेकि सत्प्रतिपक्षस्थले न्वयव्याप्यभावादित्यर्थः एवं विधे ति
तदभावव्याप्यज्ञानं प्रतिबंधकं तेद्वेकं द्वयं वा विशिष्टमित्यर्थः नन्वसिद्धेः शेषत्वं तत्र तत्र कत्वं न नियामकमत आह तदभावसाधकमि

अ॰शि॰ १५३ निरुद्धपलद्वारान्तसाधकेन द्रव्यसाधकत्वभ्रमस्त्वेति स्थापनवादिनापि व कुशाकत्वादिति वस्तुतो भवदुक्तहेतुनैवमयासाध्याभावःसा
धनीय इति प्रतिवादिप्रोटिविशेषरव्यापकत्वेन पार्थक्यमिति सव्यभिचारेति असाधारणस्सत्प्रतिपक्षसंकरेपि सव्यभिचारसत्प्रतिपक्षयोः
परंपरासांकर्यस्यत्वस्त्वाद्दोषइतितेषां हृदयं सव्यभिचाराद्युपाधेःसांकर्येपि इष्टतोपाधेर्वैलक्षण्यं पारिभाषिकमेवेत्यस्वरसः के
चिदित्यनेन सूचितः ननु सत्प्रतिपक्षोत्थापकतयाद्दूषकत्वमुक्तं न सर्वनिश्चितसाध्यवद्वावृत्तत्वेन सत्प्रतिपक्षः संभवतीत्यतो व्याचष्टे स
पक्ष इति पक्षवृत्तित्वे सतीति दृढं च विरोधि परामर्शनिर्वाहाय ननु साध्यव्यापकीभूताभावप्रतियोगित्वं विरुद्धमित्याकारमुक्तं तथा च
सांकर्यमित्यत आह विरोध इति अन्वयेति अन्वयव्याप्तेरेव सामानाधिकरण्यघटितत्वादित्यर्थः ननु शब्दोऽनित्यः शब्दत्वादित्यत्र श
ब्दत्वे साध्यव्यापकीभूताभावप्रतियोगित्वस्यासंभवाद्व्याप्तिरत आह साध्यसमानाधिकरणेति दृष्टविशेष इति असाधारणस्य राम
नित्यदोषत्ववादिनां तन्मतेपि न क्षतिरिति भावः निश्चमतं इष्टम् अपि तु उपन्यस्यतित वीना इति सामग्रीति साध्यव्यापकता ग्राहिका सा २५३

ध्याभावव्यापकताग्राहिकात्वेत्यर्थः अनयोः सामग्र्योर्मिथो विरो[illegible]नैकतरनिरूपितव्यापकताग्रह इत्यर्थः। वृत्तिमत्वेति अवृत्तिगमनाद्यभा
वस्य तु विरुद्धोभयव्यापकत्वम् आहत्तमिति भवितव्यं स्यात्व्याप्तमित्यर्थः विरोधीति विरोधिपरामर्शयोस्तदभावव्याप्यत्वेन विरोधित्वं विरो
धिसहचारग्रहयो[illegible] विरोधिसामग्रीत्वेनेति विशेषः साध्यतदभावयोरित्यनन्तरं संग्राहयतीति अन्यं हेत्वभावे उभयव्यापकत्वग्रह वि
रोधस्तत्प्रतियोगिनि हेतौ न वृत्तिमत्त्वं विरोधघटकमिति वक्तां विघटयन्नाह वृत्तिमत्प्रतियोगिकश्चेति योजयतीति नवीना इति शेषः
ननु परस्परविरोधेन यदि न हेत्वभावस्योभयव्यापकत्वग्रहस्तदा कथं व्याप्तिवृत्तित्वं ज्ञानमिति मूलमाह ज्ञानमिति तथा च हेत्वभावो यदि
न तूभयव्यापकत्वेन ज्ञानयोग्यस्तदा न तूभयव्यापकत्ववान् स्यात् [illegible] इत्यंशमाह तत्रेति उभयव्यापकत्वज्ञानदशायां नाह
शोति न तूभयव्यापके इत्यर्थः ननूभयव्यापकव्यतिरेकप्रतियोगित्वेन ज्ञाने [illegible] कथं साध्यं साधयेदिति मूलमतो व्यावर्त्य इति न तु
भया[illegible]ति साध्यतदभावोभयमित्यर्थः ननु विरुद्धोभयसहचारः कथमित्यत आह व्यापक इति अतथाभाव इति न तूभयसहचरितत्वा

त्रिसू भावइत्यर्थः। अयमर्थः यदि शब्दत्वाभावो नित्यत्वानित्यत्वयोर्व्यापकः स्यात्तदा तदभाववति शब्दे नित्यत्वानित्यत्वोभयं स्यात् न च तत्संभवतीन
२५४ वा शब्दः शब्दत्वाभावाभावरहितस्तस्मात्परिशेषेण व्यापकत्वमेव तस्य नास्तीति अत एव चरमं व्याप्तेरिति तथाभावद्वयसहचरितत्वं
साध्यं तदभावो व्यापक इति मूले यथा श्रुते फलोपधानपदे स्वरूपयोग्यतापदे बाधितमतो व्याचष्टे ऽत इत्यादिना ज्ञानस्तदभावस्य
पदार्थनित्यात्तदोष इति मूलस्य व्याख्यानं व्याप्तीति मिश्रमते सत्प्रतिपक्षोद्भाविति मूलं योजयति सत्पतीति तस्य सत्प्रतिपक्षस्य यदि
भवतां मिथो विरोधेन व्याप्तिग्रहो न भवेत्तदा एकत्र हेतावितिहेतुद्वये पि तत्स्यादित्यर्थः एवं सतीति असाधारणस्थले यद्विसहचा
र ज्ञानं न तु व्याप्तिग्रह इत्यर्थः नन्वधिकरणांतरे व्यभिचारशंका निराकरणार्थं तत्सार्थकं भविष्यतीत्यत आह व्यभिचारग्रहेति राम
तथा चाज्ञानसंपादकं यत्तत्तद्धेत्वाभासदूषकतायामुपयुज्यते तस्य ज्ञानस्यैवोपयोगित्वात् कृत्रिमत्वादीति अकृत्रिमप्रतियोगिका २५४
भावस्य विरुद्धोभयव्यापकत्वं संभवत्येवेति प्रागुक्तं विरोधविषयत्वेति कृत्रिमत्वेत्यादि पूर्वोक्तप्रतिसंधानेनैवास्य विरोधित्वमि

ति रुपदर्शिनेति वृत्तिमतेत्यादिनोपदर्शितेत्यर्थः न कशरीरेऽसाधारणोपाधिः शरीरे न याव त्वदीयासाधारणोपाधौ ज्ञायमानेन तज्ज्ञानमा
वश्यकमिति क्वचिद्विरोधिविषयत्वमिति भावः ननु व्यापकत्वेनैव मिथो विरुद्धस्यानामित्यत आह व्यापकतयोरिति केवलान्वयिनि मिथो
विरुद्धोभयव्यापकत्वसत्त्वादित्यर्थः दर्शितेति शब्दत्वाभावाभाववति शब्दे नित्यत्वानित्यत्वयोः संदेहदशायां यद्व्यापकत्वज्ञानं न जाय
ते तत्र व्यभिचारज्ञानमेव प्रयोजकं न तु विरोधिव्याप्तिग्रहसामग्रीत्वमित्यर्थः अत एव व्यभिचारसंदेहाधीनप्रतिबंधकत्वादेव अनुकू
लतर्केति अनुकूलतर्कस्य व्यभिचारशंकानिवर्तकत्वादिति अनुकूलतर्कापेक्षायां प्रकारांतरेणोपयोगित्वं ये वदंति तन्मतं दूष
यति एतेनेत्यादिना तन्मते नु व्यवहितविरोधिसहचारज्ञानत्वेन पृथगेव प्रतिबंधकत्वं तदेव चासाधारणसंपादकमिति तर्कस्ये
ति व्यभिचारप्रतिबंधे नोपयोगित्वे संभवति कल्पनांतरस्यान्याय्यत्वादिति सामग्रीत्वेनेति तस्याश्च स्वरूपसत्याः प्रतिबंधकत्वे हेत्वा
भासत्वायोग इति ननु सत्प्रतिपक्षस्य न एव विरोधित्वे हेत्वाभासत्वेन विरोधसामग्रीत्वं प्रयोजकमुक्तमित्यत आह सत्प्रतिपक्षे वे

अशि॰ २५५ तित्तथा वासिद्धमसिद्धेन साधयतो महानैयायिकत्वमिति ध्वनितं ननु यदि तु स्वबलविरोधिसामग्रीत्वेन न प्रतिबंधकं सत्प्रतिप
क्षस्थले तदा बाधावतारे ऽपि हेत्वंतरेणानुमितिर्न जन्येतेत्यत आह बाधावतारे ऽपीति तथा च तत्र यावत्कालं बाधितहेतुपरामर्शेनाप्रामा
ण्यशंकाधानं तावदनुमित्यभावो ऽभ्युपगम्यत एवेति भावः मूलोक्तन्यूनतां परिहरन्नु विषयविभागमाह सद्धेतुत्वमित्यादि केवलान्व
यिनि साधने केवलान्वयिसाध्यके सद्धेतुत्वं व्यतिरेकिणि साध्ये ऽनुसाधारणत्वं व्यतिरेकिणः साधनस्य केवलान्वयिधर्मावच्छिन्नपक्ष
केतु घटत्वादेर्भागासिद्धत्वं सर्वं धूमवद्वह्नेरित्यत्र व्यभिचारित्वं सर्वं धूमवत्त्वदिरत्वादित्यत्र विरुद्धत्वं द्रव्यादिनेयं द्रष्टव्यं मूले के
वलान्वयिसाध्यके ऽपि घटत्वादिहेतौ यद्भागासिद्धत्वं तत्स्वरूपत्रं व्यतिरेकिसाध्यके तु भागासिद्धत्वविरुद्धत्वान्यायन्यूनत्वं
तदपि परिहृतमिति केवलान्वयिसाध्यके ऽपि सर्वं प्रमेयं वाच्यत्वादित्यादावित्यर्थः व्यतिरेकीति सत्यं तदलं रणाणार्थं केवला राम
न्वयिनि धर्मावच्छिन्नपक्षके ऽपीति छिन्नव्याप्तिके ऽपि सिद्धिकाले सिषाधयिषाभावाशय पक्षतासत्त्वे ऽप्यनुपसंहारित्वभावादाह २५५

पक्षत्वमित्यनेन च संदिग्धसाध्यकत्वं किंत्वपेक्षितं संदेहाभावेपि सिद्धिबाधयोरनवतारेप्यनुपसंहारित्वस्येष्टत्वात् ननु बाधकमानं
साध्याभावः न च केवलान्वयिनि तत्संभवीत्यत आह केवलान्वयिसाध्यक इति तक्केवेति पक्षनिष्ठाभावप्रतियोगित्वादिवैशिष्ट्यं साध्याभा
व इत्यर्थः सत्त्वं चेति यदि बाधकमानपदेन साध्याभावग्राहकमुच्यते तदा तदभावेनैव व्यतिरेकिसाध्यकत्वे लब्धे तत्पदं व्यर्थं स्यादिति ननु साधारणो वि
रुद्ध इत्यव्याप्तिरित्यत आह निश्चितेति नन्वेतयोर्नित्यदोषत्वादिदं लक्षणं न युक्तमित्यत आह साधारणत्वाद्यग्रहदशायामिति नन्वत्यं
ताभावप्रतियोगित्वविशेषणं केवलान्वयिसद्धेतुवारणाय दत्तं तस्यानुपसंहारित्वे सद्धेतुत्वमेव नेत्यत आह सद्धेतुत्वं चेति तथा
तत्व्याप्तिनिश्चयकालेनुसत्त्वं तत्सार्थक्यमित्यनेन त्वनुपसंहारिणापि संदेहात्मकसहचारप्रत्ययसत्त्वादयुक्तमित्यतो निश्चयपरत
या व्याचष्टे निश्चितेति ननु लक्षणादिना सद्धेतुरेवेत्यवधारितेपि लक्षणं तत्रातिव्याप्तिमत आह तथा चेति तत्पददाने एव विशिष्टाभा
वसत्त्वात्तत्रातिव्याप्तिरिति यदि तत्पददानं तदा कथं मूले तत्रातिव्याप्तिकथनमत आह विशेषकत्वेति मूले लक्षणादिना सद्धेतु

अशिक्ष

२५६

रेवेत्यनेन निरुक्तोक्तं पदं नदेयमिति दूषकेन न्यूनताभंगाय विकल्पोभयमेव दूषितमिति निराकृतोऽनित्यः शब्दत्वादित्यादौ व्यतिरेकसहचारस्य व्य
तिग्रहानुकूलस्य प्रतीतेरतिव्याप्तिर्न स्यादतः केवलान्वयिसाध्यकपरतया व्याचष्टे साधारणाद्वित्यादि ननु तत्र विपक्षाप्रसिद्ध्या कुसाधा
रण्येनास्तीत्यत आह सपक्षेत्यादि इति पक्षतादशायामिति अन्यदशायां तु पक्ष एव तादृशसहचारनिश्चयसत्वादिति एवं वह्निमान्द्रव्य
त्वादित्यादौ विरुद्धेपि साध्याभावे व्यतिरेकसहचारसत्वादतिव्याप्तिर्नास्तीति तद्विशेषपरतया व्याचष्टे जलमिति अत्र साध्यहेत्वभा
वयोरपि मिथो विरोधात् व्यतिरेकसामानाधिकरण्यमिति निस्वरूपासिद्धासौ कथ्यं यज्जलमिति पक्षानुधारनं नैवमपि बाधसांकर्य
पक्षेनादशायां तस्यानवनाशात् नवस्वरूपासिद्धानवनारदशायां पक्षत्वं क्रियतामिति वाच्यं दूनः स्वरूपासिद्धिभूत्यस्यैवसं
भ्यकत्वात् ननु स्नेहाभावशीतस्पर्शयोर्जलावयविन्येव सत्वाद्व्यतिरेकावपि स्नेहशीतस्पर्शाभावोऽत्रास्य इति साध्यान्तरमाह रू
पमिति पक्षे हेतोः स्वरूपासिद्धिरित्यत आह जलमिति गुणावत्वादिति हेतौ गुणाभावेद्रव्यत्वयोरवयविन्येव सहचारसत्वादाह गु

राम

२५६

णाकर्मीभूतनीतिन वह्निः स्नेहसाध्यकेन सहरूपपदीकस्य तुल्यतान्तत्रावयविनि कालभेदेन उभयसहचारसत्वात् इह तु इत्यभेदाभाव इत्य
त्येगुणाभावयोर्व्यतिरेकयोरेव सहचारसत्वादिति भेदान्न सहचाराभावस्येति ग्राह्याभावमुद्रया सहचाराभावज्ञानमेव विरोधितत्तुसह
चार प्रतीत्यभाव इति न च कारणाभावमुद्रयासो विदोषः तत्वेहेत्वाभासत्वानुपपत्तेरुक्तत्वादिति अनैकान्तिकशङ्केति ताहशव्या
प्तिग्रह प्रतिबंधकतावच्छेदकरूपानैकान्तिकशब्दार्थ इत्यर्थः ततो हि प्रत्येकमेव व्याप्तिग्रह प्रतिबंधकतावच्छेदकं प्रतीयते न तु सामा
न्यमिति इत्थं चानुपपत्त्येति यथाश्रुतशब्दार्थ एव समर्थित इति मिश्रमतमाहकेचित्त्विति तथा चेदमसाधकमनैकान्तिकत्वादित्य
त्रोभयकोट्युपस्थापकत्वादौ साध्योपस्थापकत्वादेर्व्यर्थत्वादिति आकुरित्यस्वरसवीजं तु दूषकशब्दस्य संमुखोऽर्थः प्रति
बंधकत्वं असाधकतासाधनेय नत्वपरित्याग इति मूलोक्तदूषणानुसारेणा विकल्पयति पक्ष इति साध्यवत्वज्ञानविरोधित्वं उभ
यस्येवेति भावः उभयत्रेति विकल्पद्वयमित्यर्थः अद्येत्तत्वव्याप्यवृत्तिकत्वे सर्वं प्रमेयं वाच्यत्वादित्यत्र व्याप्तिग्रहदशायां विप्रति

अशिकृ पक्षविषयत्वव्याप्यवृत्तिकत्वात्तत्रातिव्याप्तिः सर्वस्येति कश्चित्कयादोषांतरविधयायोजयितिद्वितीययइतितथाचकेवलान्वयिधर्मा
२५७ वच्छिन्नपक्षस्यैवलक्ष्यत्वसंभवएवेतिभावः अत्रैवक मूलेचकारः इरसीयइति ननु उपसंहारः सहचारव्यतिरेकिव्यतिरेकयो
रेवहेतौनुतद्भावएवेति व्यतिरेकिण्यतिव्याप्तिरित्यतो व्याचष्टे यत्रेतिइत्यंतवचनसमर्थनं तद्धेतुकानुमित्यनुकूलत्वेन व्यतिरेक
योरपि व्याप्तिस्तत्संबंधिन्येवेति अधिकरणानुनेताट्टशपरस्परयेतिभावः तथाचेति हेत्वभिमतपदं हेतुतावच्छेदकावच्छि
न्नहेतुपरमित्यर्थः तेनैकस्यैव हेतोः प्रकारांतरेण निरुक्तव्याप्तिकत्वं प्रकारांतरमादायानुपसंहारित्वमिति प्रसिद्धेति तेन सर्वं
घटभिन्नं घटत्वादित्यादौ लक्षणगमनमिति नासंभवः ननु प्रसिद्धानुपसंहारिणां तल्लक्ष्यमेव न वाच्यमित्यत आह अतिव्यापकं चेति राम
स्वरूपसत्त्वेनेति एवकारेणाज्ञायमानत्वव्यतिरेकः तथा च ज्ञायमानत्वगर्भहेत्वाभासत्वं नेति भावः व्याप्तिनिश्चयदशायामपि सिषाधयि २५७
षाविरहविशिष्टसिद्ध्यभावगर्भायाः पक्षतायाः सत्त्वादाह पक्षइत्यादि साध्यं पक्षवृत्तिर्नवेति पक्षः साध्यवान्नवेत्यादिसंदेहा

नामननुगमादाहसाध्यनिश्चयेति आदिपदेन साध्यपक्षवृत्तित्वनिश्चयस्य संग्रहः विषयः कश्चिद्विशेष्यः साध्यविशेष्यकेतु वृत्तित्वकोटावच्छेदकके
टिप्रविष्टत्वं अनुगमश्च साध्यतावच्छेदकावच्छिन्नसाध्येतद्वृत्तित्वनिश्चयविरोधितावच्छेदकरूपेणानुसंदेहविषयतावच्छेदकत्वं संदेहविष
